A.C. Joshi Library
P.U. Chandigarh

MSS No. 278 I Subject Religion

Name of MSS रामनाम महात्मय (RAMANAMA MAHATMYA)

Author हरिकवि

Period Folios 42

Script Sanskrit Source Prithipal Singh

Missing Folios

A.C. Joshi Library
P.U. Chandigarh

MSS No. 278 II Subject RELIGION

Name of MSS रामनाम महात्मय (RAMANAMA MAHATMYA)

Author हरिकवि

Period Folios 59

Script Sanskrit Source Prithipal Singh

Missing Folios

रामनाम महात्मय ; हरि कविकृत
मिल पत्रक ॥ ल० म० १५ पं० प्र० पृ०

ह० ल०

ACCESSION NO. 278

AUTHOR. HARI KAVI.

TITLE. RAMANAMA MAHATMYA.

ॐ श्रीगणेशाय नमः ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् १
श्रीरामपरमानंदं त्रैलोक्यनिलयं विभुं नत्वा श्रीरामचंद्राख्यं वक्ष्ये माहात्म्यमद्भुतं २ इह खलु मन्वादिस्मृ
तिविहितद्वादशाब्दिकादिप्रायश्चित्तैः सर्वपापमपरिहार्यमित्यवेक्ष्य सर्वश्रुतिस्मृतिपुराणेतिहास
निर्णीतं श्रीमद्विष्णोः श्रवणस्मरणनामसंकीर्तनरूपं सर्वपापप्रणाशनाविद्योच्छेदकपरमं प्रायश्चित्तमुच्य
ते तथा हि श्रीभागवते सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा वैकुंठनामग्रहणमशेषाघहरं विदुः
इति सर्वप्रायश्चित्तरूपं भगवन्नामैव नान्यत् किंच प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् कामतो
व्यवहार्यस्तु वचनादिह जायते इति मनुस्मृतिवचनात् ज्ञानतश्चिसंसर्गेनैकमेवाहिकं पापं नश्यति न
तेनातीतानागतवर्तमानानि कृतानि क्रियमाणानि भविष्यन्ति च पातकानि न हि केशरिणा मत्तेभकुंभ
विदारीनीति ऋग्विधानवचनात् महापातकोपपातकानि ... कायकृतानि प्रारब्धानि
रनिवृत्तानि नश्यन्तीति ज्ञायते नकृतः पुनः पापप्रवृत्तिदर्शनात् ततः पूर्वोक्तानां पापानामनेकद्वादशाब्दे
पापक्षयमात्रोपदेशोच्छेदार्थं श्रीमद्विष्णोः श्रवणस्मरणनामसंकीर्तनरूपप्रायश्चित्तमुच्यते न केवलं
पापक्षयपर्याप्तिमोक्षपर्यवसितनाद्यविद्याकृतनिरासं संसारक्षयं ज्ञानसाधनीभूतमोक्षार्थं चेति
पठतिश्रोभने पापक्षयश्च भवति ... ... स्मरणे कोऽस्माकं
अतिरेकभयाद्दुःप्रायश्चित्तानां तं च यानं ... महान् ... ...
नन्वास्तिक ... ...

विंदस्यचकीर्त्तनात् इदानींश्रोतृन्प्रार्थयते अभिमानंपरित्यज्यचेतसांशुद्धरूपिणा श्रावंतुरामभद्र
स्यनाममाहात्म्यमद्भुतं इतिश्रोतृन्सन्मुखीकृत्यग्रन्थनिर्विघ्नपरिसमाप्त्यर्थमिष्टदेवंश्रीरामंनम
स्करोति यंवेदाःस्मृतयःपुराणानिचयाकल्पाल्लयासंहिता वेदव्यासप्रकाद्दिसर्वमुनयोयंसंगिरंते
निशंयोयमन्सर्वविशेषवर्जनाद्दिदंभूत्वास्वयंसंस्थितंसंविश्वेश्वराद्दिर्विशेषरहितंश्रीरामभद्रंन
मः अस्यार्थः तंश्रीरामंनमः वयंनमस्कुर्मः सकः इदंविश्वंयोमधात्रा कथंभूतंविश्वं सर्वविशेषव
त् सर्वभूतभौतिकघटपटादिविशेषवत् किंकृत्वानेनरूपेणभूत्वानत्रविश्वेस्मिन्स्वयंव्यापकते
नस्थितः तथाचश्रुतिः तत्सृष्ट्वातदेवानुप्राविशदिति अस्यापि अनेनजीवात्मनानुप्रविश्यनाम
रूपेव्यापकरवाणीतिच कथंभूतंतंविश्वेश्वराद्दरिं विश्वेश्वराश्चासौहरिं विश्वेश्वरश्चासौहरिश्च यंवेदाःश्रु
तयःस्मृतयोमन्वाद्युक्ताःपुराणानिचयाःअष्टादशपुराणानिआदिशब्देनोपपुराणादीनियंवेद
व्यासादयोमुनयश्चसंगिरंतेस्तुवंतिकुर्वंतिप्रतिशंसर्वदापुनःकिंलक्षणंविशेषरहितंघटपटादिवि
शेषरहितंअद्वयद्वंद्वमसंगमसंगं असंगोह्ययंपुरुषइति एकमेवाद्वितीयंब्रह्मनेहनानास्तिकिंच
नमस्कोः समस्तुमाप्नोतियइहनानेवपश्यतीत्यादिश्रुतिभ्यः संदिग्धार्थप्रतिपादिकः संहितास्त्र्यमे
वप्रतिपादकाःसंगिरंतेश्राद्धतत्वमस्यर्थः श्रीरामंनमस्कृत्यतद्रूपंश्रीगुरुंप्रणमति गुरुदेवता
त्मात्मतिवचनात् भवार्णवनिमग्नेयोमहावाक्योपदेशतः उज्जहाराश्रुतशिष्यंतंगुरुंनौमिचिन्मयं

रा.म.
म.
२
2

विद्वानंदाश्रमं नत्वा ग्रंथं ब्रूते च्युताश्रमः श्रीरामनाममाहात्म्यं नाम्ना संसारतारकं नन्विंस्वकृतैर्वाक्यैर्ब्रूते
उत यस्य स्वैरित्याह श्रुतिस्मृतिपुराणेतिहासवाक्यैर्नकल्पितैः सोकार्थ्यैक्यं क्रमं कृत्वा संक्षेपेण प्रकीर्त्य
ते तदुक्तं श्रीमहाभारते शांतिपर्वणि पृश्नाईं श्रीभगवानुवाच ऋग्वेदे शायजुर्वेदे तथैवाथर्वसामसु पु
राणे सोपनिषदे तथैव ज्योतिषेर्जुन सांख्ये च योगशास्त्रे च आयुर्वेदे तथैव च बहूनि मम नामानि
कीर्त्तितानि महर्षिभिः गौणानि तत्र नामानि कर्मजानि च कानिचित् तथोक्तं स्कांदे वेदे रामाय
णे चैव पुराणे भारते तथा आदौ मध्ये तथा चांते हरिः सर्वत्र कीर्त्यते किमर्थं कीर्त्तनप्रयासः इति
वेदं कीर्त्तने दोषश्रवणात् तदुक्तं कूर्मपुराणे जिह्वां लब्ध्वापि यो विष्णुं कीर्त्तनीयं न कीर्त्तयेत्
लब्ध्वापि मोक्षनिःश्रेणीं स नारोहति दुर्मतिः किंच पापवल्लीमुखे तस्य जिह्वारूपेण वर्त्तते या न
गोविंद गोविंद गोविंदेति प्रभाषते इयमेव परा हानिरुपसर्गोयमेव च अभाग्यं परमं चैतद्वा
सुदेवं न कीर्त्तयेत् इति वचनेभ्यः ननु भगवदनुचरास्तद्विकीर्त्तनेऽजर्वत्येवं केषामर्थे क्रि
यत इति चेत्तत्राह न भजंति हरिं येतन्मायावृतचेतसः वेदशास्त्रानभिज्ञा ये केवलाग्रहका
रिणः किंच हरेरहरिकथाः केचित् हरेश्चाच्युतकीर्त्तनैः ब्राह्मणाः क्षत्रिया वैश्याः ह्रीते तेषामिती
र्यते तथा च श्रुतिः न मस्तोतारः पूर्वं यथा विदऋतस्य गर्भं जनुषा पिपर्त्तन आस्य जानंतो नाम चिद्वि
वक्तन महस्ते विष्णो सुमतिं भजामहे अस्यार्थः हे स्तोतारः स्तुतिकुशलाः ते परमात्मनः ते परमात्मा

तंविसृजन्त्यामनस्यदेहेनपि पर्ज्जनस्त्याप्रीणयनप्रीतिंप्रापयत अथवास्तोतारः [illegible]थमितिविपरि

णामः किंलक्षणाश्चर्थ्युः अनादिनं त अनादेः परमेश्वरस्य विष्णोः स्तोत्रं असमर्था इति चेन्नत्राह यथाविद्य

याजानीत अथवास्तोतारः कथमितिविपरिणामः कथंभूतं पुनः ऋतस्य गर्भं ऋतं सत्यं परंनिषत् तस्य ग

र्भं जठरे वर्त्तमानं यद्वा ऋतस्य सत्यस्यास्मिन्पलक्षितं पंचानां यामिणां सर्वत्र जगति वाह्याभ्यंतरे व्यापकत्वेन

वर्त्तमानं व्यापकं महद् इति पाठे प्रकाशरूपं अतः मधुरं मित्यत्र सकलं चित्स्वरूपमिति व्यासवचनात्

किंच हे ज्ञानंतः ज्ञातारः अस्य विष्णोर्नाम विवक्तन वदंतः कीर्त्तयंतः कथंभूतं नाम चिद्धेतन्यात्मके यत्र

किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा अंतर्वहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेः पुनः किंलक्षणा इ

हत उत्कृष्टं कीर्त्तिनादिना भक्तानां संसारत्तयकरं यतः एव हे विष्णो ते तव सुमतिं वयं भजामहे सेवयामह

इति प्रार्थयत्वित्यर्थः अन्यापि श्रुतिराह मर्त्ता अमर्त्यस्य ते भूरिनाम मनामहे विप्रासो जातवेदसः अयमर्थः

वयं मर्त्ताः मरणधर्मात्मकाः हे विष्णो ते अमर्त्यस्य नित्यस्य परमात्मनः नाम मनामहे चिंतयामहे कीर्त्त

यामह इत्यर्थः भूरिवारं यथा भवति तथा नामस्मरणेन वयं विप्रासः विप्राः ब्राह्मणा भवाम विप्रा इति

वक्तव्ये विप्रास इति छंदसः प्रयोगः जन्मना ब्राह्मणः स्मृत इति स्मृति वचनात् किंलक्षणा वयं जात

वेदसः अग्निरूपाः तेजिष्ठाः त्वन्नामसंकीर्त्तनेन पापहत्याच्छितमुद्दिदाराज्ज्ञानदेत इत्यर्थः इति ऋग्वे

दोक्तश्रुतिभ्यां जपोते नैव शरीरेण दैवनादर्शनं करोति कलौ नान्यथा भवति इत्यर्थ एवं णापनिष

क्रुते छेदांगस्मानिधिप्रियाः शाकायनऋषिनामेति सर्वाणि रूपाणि विचित्य धीरः नामानि

रा॰ना॰ कृत्वामिवद्दलितथालाप्रस्ताग्रमदाजहार प्राकृःप्रविद्वान्प्रदिशश्चतस्रः तमेवविद्वानमृतइहभवति नान्यःपं
थाविद्यतेऽयनायेतियजुर्वेदोक्तश्रुतिभ्यां नामैवब्रह्मरूपेणाकृतयस्मात्तुः सदारामोऽहमित्येतत्तत्त्वतःप्रवदंति
२ ये ततेसंसारिणोनूनंरामएवनसंशयः इत्युपनिषद्य एवंवेदसमुक्तोभवतीतियाज्ञवल्क्यः अत्रश्रुत्याश्रा
3 वोभिधीयते रमंतेयोगिनोनंतेसत्यानंदेचिदात्मनि इतिरामपदेनासौपरंब्रह्माभिधीयते दृष्टांतत्वेनाह
यथैववटबीजस्थः प्राकृतश्चमहाद्रुमः तथैवरामबीजस्थंजगदेतच्चराचरं तथाचबृहदारण्यकेब्रह्मैतद्धिसर्वा
णिनामानिबिभर्तीति तथाचाश्वलायनोपनिषत् सर्वाण्येवैतानिप्रज्ञानस्यनामधेयानिभवंतीति नहिरामस्य
ब्रह्मणःकिमर्थमाकारत्वमितिचेत्तत्राह चिन्मयस्याद्वितीयस्यनिष्कलस्याशरीरिणः उपासकानांकार्यार्थंब्रह्म
णोरूपकल्पना ततस्तत्वमित्यर्थः इत्यथर्वणशाखायांरामतापनीयोपनिषद्भ्यः तथाचवामनस्तुतौ त्रिदेवः
पृथिवीमेषएतांविचक्रमेशतर्चिसमहित्वा प्रविष्णुरस्तुतवसस्तवीयान् त्वेषंह्यस्यस्थविरस्यनामइति ऋ
ग्वेदे एतद्वैनारायणाष्टाक्षरंपदंयोहवैनारायणस्याष्टाक्षरंपदमध्येति ततोमृतत्वमश्नुते ततोमृतत्वम
श्नुतइतिनारायणोपनिषच्छ्रुतेः यथानामीवाचकेननाम्नायोभिमुखोभवेत् तथाबीजात्मकोमंत्रोमंत्रिणो
भिमुखोभवेत् क्रियाकर्मेज्यकर्तॄणांमंत्रंमंत्रोवरत्मथ मननात्त्राणनान्मंत्रःसर्ववाचस्यवाचक इतिश्रीरामपू
र्वतापनीयोपनिषच्छ्रुतेः पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यमिति यदुहस्यानतोग्रप्रविष्टइतियच्चकिंचिज्जगत्सर्वं
दृश्यतेश्रूयतेपिवा अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितइति सर्वंखल्विदंब्रह्मेति इदंविश्वंयदयमात्मेति
वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमनेकशाखाश्रुतिभ्यः अतएवचैतन्यात्मकेहरेर्नामकीर्तयेत्

अकीर्त्तितेनन्नरकपातस्यादितिश्रुतीनां सर्वशास्त्रोक्तानामर्थानामर्थं मत्वा सम्यग्ज्ञात इति सत्येनार्थवादः श्रुतिहन्ता
स्मृतीराह ननु नं भगवता सततं कीर्तयंतो मां यतंतश्च दृढव्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते अ
पिचेत्सुदुराचारो भजते मामनन्यभाक् साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः क्षिप्रं भवति धर्मात्मा शश्वच्छां
तिं निगच्छति कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः स्त्रियो वै
श्यास्तथा शूद्रास्तेपि यांति परां गतिं किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा अनित्यमसुखं लोकमिमं
प्राप्य भजस्व मां मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायण इति गी
तास्वतेः सततमित्यारभ्य सर्वश्लोकानां पुण्यपदार्थमाह ये मत्प्राप्त्युपाये यत्नपराः शमादिधर्माः आचांचल
व्रताश्च सततं ब्रह्मस्वरूपं मां कीर्तयंतो नमस्यंतः सतः मद्भक्त्या युक्ता युक्ता उपासते अपि च मद्भक्तेरवितर्क्यः प्र
भाव इति दर्शयन्नाह अपि चेत्सुदुराचार इत्यस्यार्थमाह अत्यंतदुराचारोपि नरो यदि दृष्टफलकेतदेवतांतरभ
क्तिमकुर्वन्मामेव परमेश्वरं भजते तर्हि साधुः श्रेष्ठ एव स मंतव्यः तत्राह यतो सौ सम्यग्व्यवसितः शोभनमध्य
वसायं कृतत्वात् ननु कथं समीचीनाध्यवसायमात्रेण साधुर्मंतव्यः दुराचारोपि मां भजन् शीघ्रं धर्मचित्तो
भवति ततश्च शाश्वतीं शांतिं शाश्वतीमुपशांतिं परमेश्वरमेश्वरनिष्ठां निरंतरां गच्छति प्राप्नोति ऋजु नर्ककर्कशावादि
नो नैतन्मन्येरन्निति शंकाशोकाकुलमर्जुनं प्रोत्साहयति हे कौंतेय पटहढक्काहालादिघोषपूर्वकं विवि
दमानानां सभां गत्वा बाहुमुद्धृत्य निःशंकं प्रतिजानीहि प्रतिज्ञां कुरु कथं मे परमेश्वरस्य भक्तो दुराचारो
पि न प्रणश्यति अपि तु कृतार्थ एव भवतीति ततश्च ते त्वद्गौरवादिविजृंभविध्वंसितजल्पकाः निःसंशयं त्वामे
व गुरुत्वेनाश्रयेरन् आचारभ्रष्टं मद्भक्तिः पवित्रीकरोतीति किमत्र चित्रं यतो मद्भक्तिर्दुष्कुलानप्यनधि

रा॰ म॰
४
5

कामिनोपि संसारान्मोचयतीत्याह मांहीति ये पि पापयोनयः स्युर्निकृष्टजन्मानोन्त्यजादयो भवेयुः ये पि वै
श्याः केवलं कृष्यादिनिरताः स्त्रियः शूद्राश्चाध्ययनादिरहितास्तेपि मांमपाश्रित्य संसेव्य परां गतिं यांति य
दैवं तदा सत्कुलाः सदाचाराश्च मद्भक्ताः परां गतिं यांतीति किं वक्तव्यमित्याह किंपुनरिति पुण्याः सुकृतिनो ब्रा
ह्मणाः तथा राजानश्च ते ऋषयश्च एवं भूताः परां गतिं यांतीति किं वक्तव्यं अतस्त्वमिमं राजर्षिरूपं देहं प्राप्य
लब्ध्वा मां भजस्व किंच अनित्यमध्रुवं सुखरहितं च लोकं प्राप्य अनित्यत्वाद्विलंबमकुर्वन् सुखरहितत्वात्
सुखप्राप्त्यर्थं महितामामेव भजस्वेत्यर्थः भजनप्रकारं दर्शयन्नुपसंहरति मन्मना इति मय्येव मनो
यस्य सः मन्मनास्त्वं भव तथा ममैव भक्तः सेवको भव मद्याजी मद्यजनशीलो भव मामेव वंदनं नमस्कुरु एव
मेभिः प्रकारैर्मत्परायणः सन्नात्मानं मनो मयि युक्त्वा समाधाय मामेव परमानंदरूपमेष्यसि इ
ति गीतास्वेतैः स्वकृतश्लोकमनुवदति यत्पादपद्मेवलतो विभंगयत्पादजाग्रेणशिला विमुक्ता फ
लंच यन्नामजपादिमुक्तोस्थाननामितमहं प्रपद्ये इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणोक्तेभ्य
स्तावत्समसंग्रहिते प्रथमोध्यायः १ वरं हुतवहज्वालापंजरांतर्व्यवस्थितिः न शौरिचिंताविमुखजनसं
वासवैशसम् इति कात्यायनस्मृते श्वादेरण्ये यथा रसातिथंवे नेथनवं नयनेच्छया तथा हे विश्वकर्त्तारं
कोनमुच्चेत्तवं यतनात् यथाप्लपतेमूर्खो देशरामादिकं वद नथाचित्प्रलयेन्मृत्युं त्वं कोन मुच्येत्तवं यतना
दिति बृहस्पतिस्मृतेः तथा चित्तं समासक्तं जंतोर्विषयगोचरे तथा नारायणोप्यासक्तं को न मुच्येत्तवं यतना
त् याहृशं रमते चित्तं नरणीप्रमदादिषु तथा चेत् श्रीपतौ पतितः को न मुच्येत्तवं यतनात् इति नरदाग्नि
स्मृते विप्रो वा क्षत्रियो वापि वैश्यो वा पादजोपि वा वरं श्रोयत्नमेतेषां मानसं विष्णुचिंतनमिति विष्णु ४

स्मृतेः ब्रह्मघ्नो वा पितृघ्नो वा मातृघ्नो वा लमित्रहा स्त्रीजातीपक्षघ्नी च गुरुगम्यागमनी तथा सर्वपापरतश्चैव श
होनेष्कृतिकस्तथा सुराप्रोपोवृषलस्वामी योयस्मात्मनं निर्दहति वै ध्यानेनोद्यन्ततेनालेन पुण्यं च नष्ट भक्ते ध्यानेन
दह्यते सर्वपापपुण्यकृते फलं शुभाशुभपापफले दग्ध्ये स्यानेन तस्य न विद्यते श्लोकेल्पध्यानपरो ब्रह्मध्यायं कल्प
ते इति सनत्कुमारवचनात् प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान्ध्यानेनानी
श्वरान्गुणानिति शौनकस्मृतिवचनात् यदसाध्यं तत्किंचिद्योगी कुर्यात्प्रमादतः योगमेव निषेवेत ना
न्यं यत्नेस्समाचरेदिति विष्णुस्मृतिवचनात् सकृदुच्चरितं येन हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय
गमनं प्रतीति गौतमस्मृतिवचनात् जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्रा
ह्मण उच्यत इति मनुस्मृतिवचनात् तथा चाथर्वणश्रुतिः जपान्नैव शरीरेण देवतादर्शनं करोतीति
कलौ नान्यथा भवति पयोपवासाद्युत्थापं पुरुषस्य विनश्यति प्राणायामशतेनैव तत्पापं नश्यते नृणां
प्राणायामसहस्रेण यत्पापं नश्यते नृणां । तत्क्षणमात्रेण तत्पापं हरेद्ध्यानात्प्राणप्रणीतीति वृद्धशातातपस्मृ
तिवचनात् कृच्छ्रैर्देहाद्दिशुद्धिस्तु न तन्नशनवपुषो विष्णुनाम्ना विशुद्धिरिति विष्णुधर्मोक्तेः भक्तानां तु न त्र योवि
द्येवदृश्यानेविष्टोयं तं तेज्ञानस्येश्वरज्ञानाद्विशुद्धिः परमा मतेति याज्ञवल्क्यस्मृतेः नियमार्येयं ते विष्णुध्याने द्वे
मोजपस्तथा नामकथाश्रवणं चैव तन्नामस्तुतिप्रकीर्तनं तन्माद्यतीर्थसेवा च तत्त्रिविदितभोमंत्र प्रणामस्तु सप्त
रमोनन्तेनगीतवादिनमिति वसिष्ठस्मृतौ प्रथमाध्याये उक्तत्वात् व्यासः यावैसायनसंपत्तिः पुरुषार्थं च तत्
पृथे तथा विना नान्यदाप्नोति नरो नारायणाश्रय इति व्यासस्मृतेः अयं भावः जड़ब्राह्मकर्मस्वपि प्रायश्चित्तात्

ना॰ न॰
५
5

श्रीविष्णुनामसंकीर्तनश्रवणस्मरणाद्रूपस्यप्रायश्चित्तस्यसहस्रगुणाधिकांमुक्तिंभवतीतिसिद्धिःश्रनेनैवप्रका
रेणाष्टादशस्मृतिषुभगवन्नामकीर्त्तनादेः सर्वाकृतमावश्यकत्वमस्तीतिसूच्छाग्रहैरपिमंतव्यं तन्नग्रंथवद्ध
लत्वशंकयानैवस्माभिः श्रुतीस्मृतिर्दर्शयित्वापुराणादर्शयति तत्रादौभवति ममसर्वेंद्रियाणांप्रवृत्तिरस्त्वि
तिप्रार्थयते वाणीगुणानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नः स्मृत्यांशिरस्तवनिवा
सजगत्प्रणामेदृष्टिःसतां दर्शनेस्तुभवत्तनूनां इदानींभगवन्नामसंकीर्त्तनादिभिः शुभांसंसारंनप्राप्नोतीत्या
ह श्रृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिचमंगलानिते क्रियासुयस्त्वच्चरणारविंदयोराविष्टचि
त्तोनभवायकल्पते एवसतिहरिनामसंकीर्त्तनंनकरोतितन्मूर्खमपवित्रमीत्याह ननहचास्मित्रयदंहरेर्यशो
जगत्पवित्रंप्रगृणीतकर्हिचित् तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्युशिक्षयाः श्रतएव तद्वाग्विस
र्गोजननाघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंति
साधवः श्रतएव महानुभावैर्हरिगुणानुवादएव पुरुषस्यतपश्चादीनांफलरूपोर्थउक्तइत्याह श्रयंहिपुंस
स्तपसः श्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः अविच्युतोर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानु
वर्णनं श्रीवासुदेवगुणानुवादश्रवणंउक्तस्य सर्वसंसारक्लेशशांतिकरंभवति यत्रतत्रकिंवक्तव्यंभगवच्च
रणारविंदेकायवाङ्मनोभिर्निष्ठायासांसंसारक्लेशंनाशयतीत्याह श्रशेषसंक्लेशशमंविधत्तेगुणानुवा
दःश्रवणंमुरारेः किंवापुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा यथायथानामसंकीर्त्तनादिभजनंतथा
तथाशुद्धसत्त्वः श्रात्मदर्शनंभवतीत्याह यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः तथातथा

पश्यतिवस्तस्तत्त्वंचवत्तर्यथैवांगनसंप्रयुक्तेः सर्वंतत्त्वमननेप्रवृत्तस्यभावप्राप्तिमार्गोनदुर्लभइत्याह यद्वावि
नामतत्त्वकामदयप्रनामपद्धेः श्रेयोत्तत्त्वकथामपुरातनतराणि यद्विन्नभिन्नलिवतंभवतोस्तिरूपंवैकुंठना
थपदवीर्नहितैर्दुराया हेयप्रनामयेसवाचितत्त्वनामकतोनतत्त्वकथाहृदयेतवश्रीमत्स्वरूपंतस्यभक्तस्यत
त्त्वप्राप्तिमार्गोनदुरापोनदुःसाध्यश्रपितनामसंकीर्तनश्रवणस्मरणैःसुप्राप्यइत्यर्थः यथाहरिकथाश्रवण
नामसंकीर्त्तनादिभिः नृणांशुद्धिर्नतथादानाध्ययनादिभिरित्याह शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्या
श्रुताध्ययनदानतपःक्रियाभिः सत्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात् न
दाह वाग्गद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपु
नाति ननुकर्मणैवपाप्मनःशुद्धिर्नेत्याह कर्मणाकर्मनिर्हारोनह्यात्यंतिकइष्यते अविद्वदधिकारित्वात्प्रा
यश्चित्तंविमर्शनं अस्यार्थः काम्यरूपेप्रायश्चित्तेतीर्थयात्राचांद्रायणादौअविद्वान्मर्त्योदेहाद्यहंबुद्धिः पुरुषो
धिकारीनतुविद्वान्तर्हिमुख्यंप्रायश्चित्तंकिमित्याह प्रायश्चित्तंविमर्शनंआत्मविन्नहरेःस्मरणमिति क
र्मणाप्रायश्चित्तेनपुनःपापप्रवृत्तिर्भवतीत्यतोव्यर्थमित्याह क्वचिन्निवर्त्ततेभद्रात्क्वचिच्चरतितत्पुनः प्राय
श्चित्तमतोपार्थंमन्येकुंजरशौचवत् अपार्थंव्यर्थमित्यर्थः अभद्रात्पापात् तदुक्तमाश्वलायनशाखायां
हरिश्चंद्रोपाख्यानेशुनःशेपेन यःसकृत्पातकंकुर्यात्कुर्यादेनस्ततोपरं नायागणाद्धोद्धान्यायादसंधेयत
याकृतमित्यसंधेयमिति विश्वामित्रस्यांकमाससादेतिश्रुतेः एवंकेवलस्यकर्मणश्चित्तशुद्धावकिंचित्क
रत्वंविनिश्चित्यातोमुकुंदनामकीर्त्तनाद्युपायैर्हरिरेवसेव्यइत्याह तस्मात्सर्वात्मनाराजन्हरिःसर्वत्रसर्वदा

ना॰ ना॰ ९ 6

श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयं अभयं मोक्षमिच्छता पुरुषेण सर्वात्मना सर्वप्रकारेणेत्यर्थः तदुक्तं
गीतासु स्मृतौ नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा स्पष्टार्थः श्लोकः
तर्हि केनोपायेन द्रष्टुं शक्यः सत्यं तत्राह भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च
परंतप अनन्यया मदेकनिष्ठया भक्त्या तु एवंभूतो विश्वरूपोऽहं तत्त्वेन परमार्थतो ज्ञातुं शक्यः शास्त्रतः द्रष्टुं च प्र
त्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यः नान्यैरुपायैः अतः शास्त्रार्थसारं परमं रहस्यं सर्वश्रुतिविदाह मत्कर्मकृन्मत्प
रमो मद्भक्तः सङ्गवर्जितः निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव मदर्थं कर्म करोतीति मत्कर्मकृत् गृहमेव
परमपुरुषार्थाय यस्य सः ममैव भक्तः आश्रितः पुत्रादिसंगवर्जितः निर्वैरश्च सर्वभूतेषु एवंभूतो यः स मां प्रा
प्नोति नान्य इति सिद्धं तथोक्तं श्रीधराचार्यैः देवैरपि सुदुर्दर्शं तपोयज्ञादिकोटिभिः भक्त्यैव भगवाने
वं विश्वरूपमदर्शयत् इति एतद्दर्शं सदाचारं प्रमाणयति हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः अध्य
गान्महदाख्यानं नित्यं विष्णुजनप्रियः महदाख्यानं श्रीमद्भागवतशास्त्रं अध्यगात् कीर्त्तनाय पठितवान्
भगवंतं मुक्ता अपि भजंतीत्यादि आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे कुर्वन्त्यहैतुकीं भक्तिमित्थंभू
तगुणो हरिः ब्रह्मात्मैक्यज्ञानात् निर्ग्रन्थाः ग्रन्थिरहंकारः देहोऽहमिति तद्रहिताः तदुक्तं भिद्यते हृदय
ग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वर इति श्रुतेः एवंभूता अपि भगवति
निष्कामां भक्तिं कुर्वंति यतः अतो मुमुक्षुणाहर्निशं सेव्य इत्यर्थः न केवलं हरिभजनेन मुमुक्षुस्ते पवित्रय।
ति अपि तु सर्वान्नामसंकीर्त्तनश्रवणपरान् तारयतीत्याह वासुदेवः कथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि वक्ता ९

श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं अभयं मेऽस्त्विच्छता पुरुषेण सर्वात्मना सर्वप्रकारेणासमर्थः त
दुक्तं गीतासु स्मृतौ नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा स्पष्टार्थः श्रो
कः तर्हि केनोपायेन द्रष्टुं शक्य इत्यत आह भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्र
वेष्टुं च परंतप अनन्यामदेकनिष्ठया भक्त्या त्वेवंभूतो विश्वरूपोऽहं तत्त्वेन परमार्थतो ज्ञातुं शक्यः शा
स्त्रतः द्रष्टुं च प्रत्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यः नान्यैरुपायैः अतः शास्त्रार्थः सारं परमं रहस्यं शृणु इत्य
माह मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव मत्कर्मकरो
तीति मत्कर्मकृत् अहमेव परमपुरुषार्थो यस्य सः ममैव भक्तः आश्रितः पुत्रादिसंगवर्जितः निर्वैर
स्सर्वभूतेषु एवंभूतो यः स मां प्राप्नोति नान्य इति सिद्धं तथोक्तं श्रीधराचार्यैः दैवैरपि हि दुर्दर्शं लब्धोपायना
दिकोटिभिः भक्ताय भगवानेवं विश्वरूपमदर्शयत् इति एतदर्थे सदाचारं प्रमाणयति हरेर्गुणाक्षिप्त
मतिर्भगवान्बादरायणिः अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः महदाख्यानं श्रीमद्भागवतशास्त्र
अध्यगात् कीर्तनाय पठितवान् भगवंतं मुक्ता अपि भजंतीत्यादि आत्मारामश्च मुनयो निर्ग्रन्था अप्युरुक्रमे
कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः अत्रात्मैक्यज्ञानात् निर्ग्रन्थाः ग्रन्थिरहंकारः देहोऽहमिति तद्गताः
तदुक्तं भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वर इति श्रुतेः एवंभू
ता अपि भगवति निष्कामां भक्तिं कुर्वंति यतः अतो गुणो हरिः सेव्य इत्यर्थः न केवलं हरिभजनं स्वमं तं
पवित्रयति अपितु सर्वान्नामसंकीर्तनश्रवणपरान् तारयतीत्याह वासुदेवकथाप्रश्नः पुरुषांस्त्री

गा॰ ना॰ रेणुकणत्वेनतस्मात्सलिलंयथा तस्मात्सलिलंगंगोदकमित्यर्थः एकांगसंगिनीगंगापावयेदखिलंजगत् अं
७ गप्रसंगसंस्पर्शिनानकिंकर्तव्यमहम् इतिवायुपुराणोक्तत्वात् तस्माद्गंगोदकमेवपावनीयेति तदुक्तंश्रीमद्भागवतेय
स्यामलेहिवियशःप्रथितंरसायांश्च मोक्षचतेभुवनमंगलदिग्वितानं मंदाकिनीतिदिविचभोगवतीतिचाधोगंगेति
चेहचरणांबुपुनातिविश्वं हेभुवनमंगलवाम्हदेवतेचरणांबुचरणोदकंविश्वंपुनातिपवित्रयतियस्यतव
अमलेष्वहंयशःकीर्तिरूपंदिग्वितानंदिशामाच्छादनंभवतिप्रथितंवेदादिषुप्रसिद्धंकिलतच्चरणांबुस्व
र्गेमर्त्यपातालेषुमंदाकिनीगंगाभोगवतीतिक्रमेणप्रसिद्धमित्यर्थः तथोक्तंकाशीखंडे त्रैलोक्येयानिती
र्थानिपुण्यक्षेत्राणियानिच सर्वत्रसर्वधर्माश्चसर्वयज्ञाःसदक्षिणाः तपांसिकृच्छ्रपाराणि श्रुतिःसांगाचतुर्वि
धा ब्रह्मविष्णुमहेशाद्यादेवतानांगणास्तथा पुरुषार्थाश्चसर्वेवैशक्तयोविविधास्तथा गंगायांसर्वएवैतेस
त्सरूपेणसंस्थिताः स्नातःसर्वतीर्थेषुसर्वक्रतुषुदीक्षितः चीर्णाशेषव्रतःसोपियस्तुगंगांनिषेवते तथासिते
ननप्राप्तिसर्वदानप्रदस्तुसः सःप्राप्तयोगनियमोयस्तुगंगां सर्ववर्णाश्रमेभ्यश्चवेदविद्भ्यश्चवै तथाशास्त्रा
र्थपरगेभ्यश्च गंगास्नायीविशिष्यते मनोवाक्कायजैर्दोषैर्दुष्टोबहुविधैरपि वीक्ष्यगंगांभवेत्पूतः पुरुषोना
त्रसंशयः कृतेसर्वाणितीर्थानित्रेतायांपुष्करंपरं द्वापरेतुकुरुक्षेत्रंकलौगंगैवकेवलं योदेहपातनेयाव
द्गंगातीरंनमुंचति सहिवेदांतविद्योगीब्रह्मचर्यव्रतीसदा कलौकलुषचित्तानांपापद्रव्यरतात्मनां विधिही
नक्रियाणांचगतिर्गंगांविनानहि अलक्ष्मीःकालकर्णीचदुःस्वप्नोदुर्विचिंतितं गंगागंगेतिजपनान्नाशमायांतितो
पविष्टंनहि यज्ञदानतपोयोगजपाःसनियमायमाः गंगासेवासहस्रांशंनलभंतेकलौक्वचित् किमत्र ७

गेनयोगेनकिंतपोभिः किमध्वरैः वासएवहिगंगायांब्रह्मज्ञानस्यकारणं अपिदूरस्थितस्यापिगंगामाहात्म्यवेदि
नः अयोग्यस्यापिगोविंदेगंगाभक्त्याप्रसीदति इतिमहादेववचनात् तदुक्तंब्रह्मांडे गंगागंगेतियोब्रूयाद्यो
जनानांशतैरपि मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति इदंब्रह्मांडेविष्णुरिदंमाहात्म्येवोहरः एतद्ब्रह्मनिरा
कारंकेवलंतानाहुर्बीजंल मितिभगवच्चरणतीर्थमहिमानिरूपिता सच्छन्नश्लोकः श्रीवैकुंठहरेजनार्दनजग
न्नाथार्यविश्वंभर श्रीरामाखिलविश्वपालनपरश्रीकंठनारायणः लक्ष्मीकांतजगन्निवासजगदाधारांघ्रि
नानेदर कृत्वेकीर्तिकरंप्रभोभवभयात्श्रीराममामुद्धर इतिश्रीरामनाममाहात्म्येअगस्त्यसंहितापुराणेतिहा
सोक्तेश्रुतसंग्रथितेद्वितीयोध्यायः २ एवंभगवच्चरणोदकगंगामहिमानमुक्त्वाइदानींवर्णाश्रमवतांब्रा
ह्मणादीनामुत्पादकेभगवतेनामसंकीर्तनादिनानभजंति किंविष्णुनाउत्पन्नाजानंतिचेन्नहिब्रह्मणादयोयःप
ततीत्याह तदुक्तंभागवते यएषांपुरुषंसाक्षादात्मप्रभवमीश्वरं नभजंत्यवजानंतिस्थानाद्भ्रष्टाःपतंत्यधः स्था
नाद्वर्णाश्रमाद्भ्रष्टाःच्युताः संतः अधःपतंतिअपरेरसकरादियोनिप्राप्नुवंतीत्यर्थः किंच लब्ध्वाजन्माऽमरैःप्रार्थ्यं
मानुष्यंतद्द्विजाग्र्यतां तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिं अयमर्थः नेचाशुभांगतिंअपरसकरादियो
नियांति किंकृत्वामनुष्यदेहदेवैःप्रार्थितंतत्रापित्रैवर्णिकेतत्रापिब्राह्मणदेहंलब्ध्वापियेहरिंनभजंतिना
मसंकीर्तनादिनाइत्यर्थः एवंजानन्नपिनभजतिचेन्नारायणंतर्हिनहेहस्यासर्वेंद्रियाणांवैयर्थ्यंस्यादिति
शौनकःसूतंप्रत्याह विलेवतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्यजिह्वासतीदार्दुरिकेवसूत
नचोपगायत्युरुगायगाथाः तेमनुष्याणांनेत्रेमयूरपिछवर्त्मनेत्रजन्मत्याह वर्हायितेतेनयनेनराणां

ग.म.
8

लिंगानि विष्णोर्न निरीक्षतो ये पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ भारः परं पट्टकिरी
टजुष्टमप्युत्तमांगं न नमेन्मुकुंदं शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा तदश्मसारं
हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः एवमीश्व
रभजनं तु सत्संगं विना न लभ्यते केचित्त्वदनएव इदानीं सत्संगाभावे देहेऽपावनत्वमित्याह जीवच्छवो भा
गवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गंधं यस्तु प्र
मादिशास्त्ररणाद्विदे समर्पिततुलसीगंधनासानघ्रानि सश्वासयुक्तोऽपि शवतुल्यः भागवतांघ्रिरेणुं
न लभेत तेनैव सत्संगः सर्वेषां कार्येऽमृतसिंचितमतः प्रसंगोऽन सत्संगप्रशंसति ननु केवलदेवेन दुर्लभो मा
नुषो देहो देहिनां क्षणभंगुरः तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं मया दुर्लभं लब्धमहोभाग्यमित्याह
वहवो देहा भवंति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोऽपि मानुषो देहो दुर्लभः परमपुरुषार्थसाधक
त्वात् वैकुंठप्रियो येषां ते वैकुंठस्य वा प्रियास्तेषां दर्शनं यतः अत आत्यंतिकं क्षेमं पृच्छामो भवतोऽनघाः
संसारेऽस्मिन् क्षणार्धोऽपि सत्संगः शेवधिर्नृणां निधिर्लाभे यथानंदो भवति तथात्र परमानंदो भवतीत्य
र्थः किंच नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः भवद्विधा
भागवतास्तीर्थभूताः स्वयं प्रभो तीर्थीकुर्वंति तीर्थानि स्वांतस्थेन गदाभृता किंच महत्सेवां द्वारमाहु
र्विमुक्तेस्तमोद्वारं योषितां संगिसंगं महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये अस्यार्थः
महत्सेवां हरिदाससेवां हरिदाससेवां हरिदासमेवां मुक्तेर्मोक्षद्वारं प्रवेशमार्गं मुनयस्याहुरवदन् योषितां ९

नोस्त्रीणां संगं तत्संगिनां गृहस्थानां संगं तमोद्वारं नरकप्रवेशमार्गं वाहुः कथंभूता महांतः समचित्ताः समे ब्रह्मणि
चित्तं येषां ते सर्वभूतसमा वा अतएव क्षमालवः विमन्यवः अक्रोधाः अतएव सर्वभूतसुहृद इत्यर्थः महत्से
वामित्युक्ते प्रसंगात्सेवास्थानान्याह सूर्योग्निर्ब्राह्मणा गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र
पूजापदानि मे न येन साधुः सेव्य इत्युक्ते असाधुस्त्याज्य इत्याह स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवा
न् क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः न तथास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः योषित्संगाद्य
था पुंसो यथा तत्संगिसंगतः पुनः साधुप्रशंसामाह नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो
यदर्थः महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् अनर्थापगमः अनर्थः संसारस्तस्या
पगमो नाश इत्यर्थः एषां प्राणिनां मतिर्मनो वा स्मृत्या उरुक्रमो वासुदेवस्तस्य चरणारविंदं ध्यानादिना न
तिष्ठति तावत् यावन्महीयसां महानुभावानां वैष्णवानां सर्वभूतसमदृष्टीनां कृपालूनां चरणरजसा
स्नानं न कृतं किंच यदानेषां वैष्णवानां समागमस्तदैव तत्पादरजःप्राप्तिरिति भावः भवापवर्गो भ्रमतो य
दा भवेज्जनस्य तर्ह्यच्युत सत्समागमः सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः अपवर्गो
भ्रमतो लोकस्य संसारनाशस्तदा भवेद्यदा सत्संगो भवेत् हे अच्युत यदा सत्समागमः स्यात्तदा सद्गतौ सतो
भक्तानां प्राप्ये त्वयि मतिर्मनो वा स्मृत्या जायते भवति कथंभूते भवति कथंभूते त्वयि परावरेशे सर्वमनुष्य
ब्रह्मादीश इत्यर्थः इति मुचुकुंदवचनात् अतएव सत्संगेन सर्वे मुक्ता इत्याह यदुक्तं भागवते सत्संगेन
हि दैतेया यातुधानाः खगा मृगाः गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः विद्याधरा मनुष्येषु वैश्याः

रा॰ ना॰ मृगाद्यास्तिर्यंचपन्नगाः रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेनघ: वहवोमत्पदंप्राप्तास्त्वाष्ट्रकायाधवादयः
८ वृषपर्वाबलिर्बाणोमयश्चाथविभीषणः सुग्रीवोहनुमानृक्षोगजोगृध्रोवणिक्पथः व्याधःकुब्जाव्रजेगोपी
9 यायज्ञपत्न्यस्तथापरे तेनाधीतश्रुतिगणानोपासितमहत्तमाः अव्रतातप्ततपसोमत्संगान्मामुपागताः
केवलेनहिभावेनगोप्योगावोनगामृगाः येन्येमूढधियोनागाः सिद्धामामीयुरंजसा यंनयोगेनसांख्ये
नदानव्रततपोध्वरैः व्याख्यास्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि अतःसत्संगमाहात्म्यमनन्तस्वरूप
विदोऽबलाः ब्रह्मापरमंप्रापुः संगान्मनसहस्रशः तथोक्तंवासिष्ठरामायणे महासंतोभिगंतव्या
यद्यप्युपदिशंतिन यात्तेषांस्वैरकथास्ताएवोपदेशाभवंतिते अतःमहानुभावसंपर्कःसंसारार्णवलंघने
युक्तिःसंप्राप्यतेरामदृढानौरिवनाविकात् अतएव वृक्षेष्वेषोनन्तत्वेनाभिमज्ञनपादपः
सफलःशीतलच्छायोनन्तत्वनिवसेद्विजे यस्मात्समुत्प्रमाणानामेतिसंस्थितिरप्यसत्साधते अपत्स्वपदिवाभा
तिविद्वज्जनसमागमात् इदानीसत्संगस्थिन्नजयेकारणमाह सत्संगोवासनात्यागोध्यात्मविद्याविचारणं
प्राणस्पंदनिरोधश्चप्रपायाश्चेनसोजये मोक्षद्वारेद्वारपालाश्चत्वारःपरिकीर्तिताः शमोविचारःसं
तोषश्चतुर्थःसाधुसंगमः एतत्सर्वंतुपायवत्क्लेशोकद्वंसत्संगादेवभवतीत्यर्थः तदुक्तंविष्णुधर्मो
त्तरे साधूनांदर्शनंपुण्यंतीर्थभूताहिसाधवः कालेनफलतेतीर्थंसद्यःसाधुसमागमः एवंसाधुसं
गप्रशंसायोसत्संगावहिर्मुखतयाचःसाधुसंगंनकरोतितंनिंदति भागवतेच यस्यात्मबुद्धिःसलिले
नकर्हिचिज्जनेष्वभिज्ञेषुसएवगोखरः अस्यार्थः कुणपेदेहे यस्यात्मबुद्धिःकथंभूतेदेहेत्रिधातुकेवात ५

पित्तश्लेष्मात्मके कलत्रादिषु प्रियापुत्रादिषु स्वधीर्ममताबुद्धिः यस्य भौमे पार्थिवप्रतिमायां इज्यबुद्धिः देवताबुद्धिः य
स्य ग्रहेषु सलिले जले तीर्थबुद्धिः शोधक भावनाय स्याभिज्ञेषु जनेषु पूर्णो वासुदेवभक्तेषु पवित्रबुद्धिर्नास्ति स
पुरुषः महानुभावैः ज्ञात्वेनाव गोखरस्त्वक्तः पशुश्चेत्यर्थः इदानीं साधकभागवतलक्षणान्युच्छति तदेवोक्तं
बृहन्नारदीयपुराणे मार्कंडेय उवाच किंलक्षणा भागवता ज्ञायंते येन कर्मणा एतदिच्छाम्यहं श्रोतुं कौतूह
लपरो यतः श्रीभगवानुवाच ये हिताः सर्वजंतूनां गतासूया विमत्सराः वशिनो निःस्पृहाः शांतास्ते वै भागवतो
त्तमाः कर्मणा मनसा वाचा परपीडां न कुर्वते अपरिग्रहशीलाश्च ते वै० सत्कथाश्रवणे येषां वर्तते सात्विकी म
तिः तद्भक्तविष्णुभक्ताश्च ते वै० भक्तानां च यतीनां च परिचर्यापराश्च ये विमुक्तपरनिंदाश्च ते वै सर्वेषां हितवा
क्यानि ये वदंति नरोत्तमाः तीर्थयात्रापरा ये च ते वै० येषां मुदकं दृष्ट्वा आनंदं यांति मानवाः हरिनामपरा ये
च ते वै ये भिनंदंति नामानि श्रुत्वातिहर्षिताः रोमांचितशरीराश्च ते वै तुलसीकाननं दृष्ट्वा ये नमस्कु
र्वते नराः तत्काष्ठांकितदेहाश्च ते वै शिवप्रियाः शिवासक्ताः शिवपादार्चने रताः त्रिपुंड्रधारिणो ये च ते वै०
व्याहरंति च नामानि ये शंभोः परमात्मनः रुद्राक्षालंकृता ये च ते वै० ये यजंति महादेवं क्रतुभिर्बहुदक्षिणैः ह
रिं वा परया भक्त्या ते वै शिवे च परमेशाने विष्णौ च परमात्मनि समबुद्ध्या प्रवर्तंते ते वै नन्मानसाश्रमद्भक्ता
मद्भक्तजनलोलुपाः सर्वभूतदयायुक्ता ते वै बहुनात्र किमुक्तेन संक्षेपात्ते ब्रवीम्यहं कृष्णनामरता ये च ते भक्ता
नात्र संशयः अत एव महापातकसंयुक्तोपि व्रजेद्धि सर्वमंदिरे याचयेदन्नमस्तेन तदभावे जलं पिबेत् वैष्ण
वान्नप्राशनस्य फलमाह विष्णुभक्तस्य ये दासा वैष्णवान्नभुजश्च ये ते पिक्रतुमतां ब्रह्मन् गतिं यांति निरा

रा॰ का॰
१
10

ऊला: यतः शुद्धं भागवतस्यान्नं शुद्धं भागीरथीजलं शुद्धं विष्णुपरं चित्तं शुद्धमेकादशीव्रतं शुद्धं भागवतस्या
न्नेनतत्कृतइत्याह षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्त्तितं शुद्धं विष्णुपरं चित्तं शुद्धमेकादशीव्रतं शुद्धं भागव
तस्यान्नेनतत्कृतइत्याह षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्त्तितं विष्णोर्नैवेद्यसिक्थेन फलेन तज्जनानां कलाविति
वासुदेवसमर्पणाद्देहस्यान्नस्यापि पावनत्वं विपदे दोषमाह अनर्पितेऽन्ने विंदेयदन्नं यच्चैव जलं अन्नं विष्ठा
समं चानेतज्जलं स्यात्सुरयासमं तदुक्तं गीतासु यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा
ये पचंत्यात्मकारणात् यत्तोयं विष्णुसिक्तं केवलाघो भवति केवलादीति श्रुतेरात्ता तदुक्तं भवति य
त्प्रमाण्विष्णुमनिवेद्य भक्ष्यते स्वयमेव केवलं सः अघमेवाश्नातीत्यर्थः नकेवलमन्नोदकस्यैव समर्पणं किंतु
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं दाराः सुता गृहाः प्राणाः तत्परस्मै निवेदने प्राणानिति देहादीत्यर्थः
तदुक्तं भगवता यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते इति भग
वदात्मया वैष्णवैर्गृहस्थाः सर्वपुत्रकलत्राद्याः पदार्थाः परमात्मनि हरौ समर्पणीयाः सिद्धेरित्याह अयतिष्ठ
न्नि यत्किंचित्कल्पितात्परं गृहे पक्वमन्नं समानीय सर्वोपस्करसंयुतं यथाकालं मनुष्याद्यैर्भोक्तुमात्मशरी
रिभिः तेन सर्वेण सर्वात्मा प्रीयतां भगवान्हरिः स्कांदपुराणोक्तं च जन्मप्रभृति यत्किंचित्करोम्यामरणांतिकं त
त्सर्वं ब्रह्मणो कुर्याद्दर्पणं तदुक्ताहृतं अन्यत्रापि प्रातः प्रबोधितो विष्णो हृषीकेशेन यत्त्वया यद्यत्कार्यस
कर्मं तत्करोमि त्वदाज्ञया किंच प्रातरारभ्य सायांतं सायात्प्रातस्तंततन्यत्करोमि जगन्नाथ तदस्तु तव पू
जनं वासिष्ठेच शिवे सर्वगते शांते वीयात्मकमहेश्वरे तदेकभावेन रामसर्वन्यागइति स्मृतः सर्वन्यागः स १

कर्मार्पणमित्यर्थः यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तद्ब्रह्मैव विनिश्चयः अन्य
त्र शिवपूजाप्रकरणे आत्मा त्वं गिरिजा मतिः प्राणमेतदाराधनमिति शेषः समस्तकर्मात्मालसेव्यप्रवेकभा
वने मलिनद्वैतनिर्भासमेतद्देवे समर्पणं नद्युयोगे विद्वत्तीनेयोगं वृत्तेन बृहद्यः ब्रह्मसर्वं जगदेहं चेति ब्रह्मा
र्पणं विदुः इत्यादिप्रकारेणैवं सर्वसामान्यादेशनिशोधकत्वे सत्यनार्थवादः इदं चपुरुषोत्तमादिस्थानादि
षु तथाच वामनपुराणे यदन्नेनपच्यते तदन्नमाभोक्ता देवो जनार्दनः चाण्डालेनापिसंस्पृष्टं तदन्नं पावनं मह
त् अनपंवोक्तवैसवान्नग्राह्यमित्यर्थः संकृतश्लोकः कामक्रोधाविष्टचित्तस्य नित्यं नित्यानन्दोहि अहं देः प्र
सिद्धेः सर्वं द्वन्द्वे रामतत्त्वस्यालसस्य श्रीरामे मे सर्वदा भक्तिरस्तु इति श्रीरामनाममहात्म्यकृतिः स्कन्दपुराणे निहा
सोक्ते अच्युताश्रमविरचिते तृतीयप्रकरणं ३ एवं प्रकरणोक्तिं लब्धा भगवतार्चायं नेयोनकर्मणा इत्यादि
ना भगवता भगवतालालनेनाश्रुते अहमतिस्वभक्तेरमायां मत्तेदर्शयति पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्र
यच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः अयमर्थः पत्रपुष्पादिमात्रं यः पि मह्यं भक्त्या प्रीत्या यः प्रयच्छ
ति मह्यं प्रयतात्मनः शुद्धचित्तस्य निष्कामभक्तस्य यत्पत्रपुष्पादिकं तेन भक्त्या उपसंहृतं समर्पितं तदहमश्नामि श्री
प्रीत्या गृह्णामि न हि महाविभूतिपरमेश्वरस्य मम देवतानां मित्र बहुवित्तसाध्ययागादिभिः परितोषः स्या
त् किंतु भक्तिमात्रेण अतो भक्तेन समर्पयति किंचित्पत्रादिमात्रमपि तदन्नपहार्थमेवाश्नामीति भावः न च फलपु
ष्पादिकमपि यज्ञार्थं पशुसोमादिद्रव्यवत्मर्थमेवोच्चैरायासमर्पणीयं किं तर्हि यत्करोषि यदश्नासि यज्जुहो
षि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं स्वभावतो वा शास्त्रतो वा यत्किंचित्कर्म करोषि तथाय

गी॰ टी॰
२२

दश्नासि यज्जुहोषि यद्ददासि यत्तपस्यसि तपः करोषि तत्सर्वं मदर्पितं यथा भवत्येवं कुरुष्व भारते भगवद्धनमर्जुनप्रति भी
ष्मद्रोणादिहननं कर्णस्य हननं स्वबांधवान् युद्धे हननान्नजनितं पातकं मम कथं भवेदित्यत आह: शुभाशुभकर्मफलैरेतैश्च
कार्यैतैर्बन्धमोक्ष्यसे सर्वान्मुच्यते कर्मसर्वथा उवाचास्मि निपुणवमिति एवं प्रकारेण साधवा साधुवा कर्म
यद्यदाचरितं मया मत्सर्वं भगवान्विष्णोर्महानारायणं परमिति एवं यत्फलं प्राप्स्यसि तच्छृणु शुभाशुभफलै
रेवं मोक्ष्यसे कर्मबंधनैः संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि एवं कुर्वन्कर्मबंधनैः कर्मनिमित्तैरिष्टा
निष्टैः फलैर्मुक्तो भविष्यति कर्मणाम विसमर्पितत्वेन तत्तत्फलसंबंधानुपपत्तेः तेभ्यो मुक्तः संन्यासयोग
युक्तात्मा संन्यासः कर्मणामर्पणं स एव योगस्तेन युक्तः आत्मा चित्तं यस्य स तथाभूतस्त्वं मां प्राप्स्यसि यदि भ
क्तेभ्य एवं मोक्षं ददासि नाभक्तेभ्यः तर्हि तवापि किं रागद्वेषादिकृतं वैषम्यं अस्तीत्यत आह समोहं सर्वभूते
षु न मे द्वेष्योस्ति न प्रियः ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं समोहं सर्वेष्वपि भूतेषु अतो मम प्रि
यश्च द्वेष्यश्च नास्त्येव एवं सत्यपि ये भजंति ते भक्ता मयि वर्तंते अहमपि तेषु अनुग्राहकतया वर्ते अयं भा
वः यथाग्नेः स्वसेवकेष्वेव तमः शीतादिदुःखमपाकुर्वतोपि वैषम्यं न यथा वा कल्पवृक्षस्य तथैव भक्तप
क्षपातित्वेपि मम नास्त्येव वैषम्यं किंतु मद्भक्तेरेवायं महिमेति तथा च श्रुतिः समो नागेन समो मशकेन सम
एभिस्त्रिलोकैः समोनेन सर्वेणेति अपि च मद्भक्तेरचिंत्यः प्रभाव इति दर्शयन्नाह अपि चेत्सुदुराचारो
भजते मामनन्यभाक् साधुरेव स मंतव्यः सम्यग्व्यवसितो हि स इति भगवदाज्ञया वेत्तव्यानां श्रेष्ठत्वमस्तीत्यर्थः
एवं तावत भागवता उक्ताः भक्तेरनायासेन चरितं इदानीं आगामि तत्पथमीक्ष्यछति ये वै भगवता प्रोक्ता उपाया ॥

स्यात्मलब्धये अंजः पुंसामविदुषांविद्धिभागवतान्हितान् मन्वादिस्वेनवर्णाश्रमादिधर्मोक्ता अतिरहस्य
त्वात्स्वमुखेनैवभगवताअविदुषामपिपुंसामंजःसुखेनैवात्मलब्धयेयेउपायाःप्रोक्तास्तान्भागवतधर्मान्वि
द्धिः अंजःपदेनोक्तंसुकरत्वंविवृणोति यानास्थायनरोराजन्नप्रमाद्येतकर्हिचित् धावन्निमील्यवानेत्रेनस्खले
न्नपतेदिह यान्धर्मानास्थायाश्रित्ययोगादिष्विवनप्रमाद्येतविघ्नैर्नविहन्येत किंच नेत्रेनिमील्यधावन्नपि
इहएषुभागवतधर्मेषुनस्खलेत्निमीलनंनामाज्ञानं यथाहुः श्रुतिस्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते एके
नविकलःकाणोद्वाभ्यामंधःप्रकीर्तितइति अज्ञात्वापीत्यर्थः यथापदन्यासस्थानमतिक्रम्यशीघ्रंपरतःपदन्या
सेनगतिर्धावनं तद्वत्रापिकिंचित्किंचिदतिक्रम्यातिशीघ्रमनुष्ठानेनतथानुतिष्ठन्नपिनस्खलेत्प्रत्यवायीस्यात्
ननुकेतेभागवतधर्माः ईश्वरार्पितसर्वकर्माणीत्याह कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् क
रोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् आत्मनाचित्तेनअहंकारेणवा अनुसृतोयःस्वभावस्तस्मात्
अयमर्थः नकेवलंविधितःकृतमेवेति ननियमःकिंतुस्वभावानुसारिलौकिकमपीति तथाचगीतासु यत्करोषि
यदश्नासीत्यादि यद्वाब्राह्मणादीनामुक्तान्यथाकश्चिदकुर्वाणोभागवद्धर्मान्श्रवणनामसंकीर्तनादिलक्ष
णात् कुर्वाणस्तत्फलंप्राप्नुयादितिभावः ननुकायादीनामेवकर्मनात्मनउपाधेक्यानाह अध्यासेनानुसृता
न्यहंतादिस्वभावाद्यद्यत्करोतीत्यर्थः तत्सकलंपरस्मैपरमेश्वरायनारायणायसमर्पयेत् तथासतिसकलंभा
गवतधर्मोभवतीतिभावः ननुकिमेवंपरमेश्वरभजनेन अज्ञानकल्पितस्यभयस्यज्ञानैकनिवर्त्यत्वादित्याशं
क्याह भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोस्मृतिः तन्माययातोबुधआभजेत्तंभक्त्यैकयेशं
गुरुदेवतात्मा यतोभयंतन्माययाभवेत् अतोबुद्धोबुद्धिमान्तमेवभजेत् ननुभयंदेहाद्यभिनिवेशतोभ

ए.भा. वति सचदेहादतः सचस्वरूपास्मरणात्किमत्रतस्यमायाकरोति अतआह ईशादपेतस्येति ईशाद्विमुखस्यतन्माय
१२ यास्मृतिः भगवत्स्वरूपास्फूर्तिस्ततोविपर्ययोदेहोस्मीति ततोद्वितीयाभिनिवेशाद्भयंभवति एवंहिप्रसिद्धाखिलो
12 किकींवपिमायास्तु उक्तंचभगवता दैवीह्येषागुणमयीममामायादुरत्यया मामेवयेप्रपद्यंतेमायामेतांतरंतिते
इति एकयाअव्यभिचारिण्याभक्त्याभजेत् किंच गुरुदेवतात्मागुरुरेवदेवताईश्वरः आत्माप्रेष्टश्चयस्यतथादृष्टिः
सन्नित्यर्थः ननुविषयविदिष्टस्य कुतोऽव्यभिचारिणीभक्तिःसंभवति कुतस्तरामभयंतत्रनतावद्विषयोना
मवास्तवोस्तिकिंतुमनोविलासमात्रमतोमनोनियमनेनभयंस्यादित्याह अविद्यमानोप्यवभातिहिद्वयेध्यात
र्धियास्वप्नमनोरथौयथा तत्कर्मसंकल्पविकल्पकंमनोबुधोनिरुंध्यादभयंततःस्यात् द्वयःअयंद्वैतप्रपंचःध्या
तुःपुंसोधियामनसास्वप्नमनोरथयथयोरर्थः तस्मात्कर्माणिसंकल्पयतिविकल्पयतीतिकर्मसंकल्प
विकल्पकंएतादृशंयन्मनस्तन्निरुंध्यात् नियच्छेत्ततस्त्वेकयाभक्त्याभजनादभयंस्यादित्यर्थः एतदत्यंता
शक्यमित्याशंक्यासुगममार्गमाह शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके गीता
निनामानितदर्थकानिगायन्विलज्जोविचरेदसंगः तदर्थकानिजन्मानिकर्माणिचअर्थोयेषांतानिएता
न्यपिसाकल्येनज्ञातुमशक्यानीत्याशंक्याह यानिलोकेगीतानिप्रसिद्धानिश्रावणगायंश्चविचरेत् असंगो
निःस्पृहः एवंचमज्जनेसंप्राप्तेमल्लक्षणभक्तियोगस्यसंसारधर्मातीतांगतिमाह एवंव्रतःस्वप्रियनामकीर्त्या
जातानुरागोद्रुतचित्तउच्चैःहसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः एवंव्रतेषुतेयस्यसः
स्वप्रियस्यहरेर्नामकीर्त्याजातानुरागःप्रेमयस्यसः अतएवद्रुतचित्तःश्लथत्हृदयःकदाचिन्नक्रपराजितभ
गवंतमाकलय्योच्चैर्हसति एतावंतंकालमुपेक्षितोस्मीतिरोदिति अयोत्स्याङ्घ्रीतिक्रोशति अतिहर्षे १२

णगायतिजितंजितमितिनृत्यति किंदांभिकवन्नेत्याह प्रकाशयितुं नउन्मादवत् ग्रहगृहीतवत् लो
कवाह्यःविवशः किंच खंवायुमग्निंसलिलंमहींचज्योतींषिसत्वानिदिशोद्रुमादीन् सरित्समुद्रांश्च
हरेःशरीरंयत्किंचिभूतंप्रणमेदनन्यः सर्वाणिभूतानिआकाशादीनियत्किंचिद्भूतमात्रंहरेःशरीरंमत्वाप्र
णमेत् संभावनायांलिङ् ननियमात् कथंयोगानामपिबहुजन्मसाध्यदुर्लभामतिः कथंनामकीर्तन
मात्रेणैकस्मिन्नेवजन्मनिभवेदित्याशंक्यसदृष्टांतमाह भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिकए
ककालः प्रपद्यमानस्ययथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोनुग्रासं प्रपद्यमानस्यहरिंभजतःप्रेम
भक्तिःप्रेमलक्षणापरेशानुभवः भगवद्रूपस्फूर्तिलक्षणानिर्वृतस्यान्येदिनस्यततोन्यत्रगृहादिषुविरक्ति
रित्येषत्रिकंएककालमभजनसमकालमेवस्यात् यथाश्नतोभुंजानस्यप्रतिग्रासंतुष्टिःसुखंपुष्टिरुदर
भरणंक्षुन्निवृत्तिश्चप्रतिग्रासंस्युः एकलक्षणमेतन्निमित्तकमपितथाभ्युदयस्तद्वत् एवमेकैकस्मिन्भजनेप्रे
मादित्रिकेजायमानेऽप्यनुवृत्याभजतःपरमप्रेमादित्रिकंजायतेवहुधासमभोजिनइवपरमतृप्त्यादिमत
श्चभगवत्प्रसादेनकृतार्थोभवतीत्याह इत्यच्युतांघ्रिंभजतोऽनुवृत्याभक्तिर्विरक्तिर्भगवत्प्रबोधः भवंति
वैभागवतस्यराजन्ततःपरांशांतिमुपैतिसाक्षात् इदंचातिसंक्षेपेणैवयैवकथ्यमित्युद्धवंप्रत्युक्तंतेनप्रति
श्रीभगवानुवाच मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने आच
रन्सेवमानः मदर्थेमत्प्रीत्यर्थंमदपाश्रयः अहमेवअपाश्रयोयस्यसः धर्मांतरमाह आज्ञायैवंगुणान्दो
षान्मयादिष्टानपिस्वकान् धर्मान्संत्यज्ययःसर्वान्मांभजेत्सचसत्तमः ज्ञात्वाज्ञात्वाथयेवैमांयावान्य

स्यास्मि यादृशः भजेत्तत्तन्मभावेन ते मे प्रियतमा मताः क्रमेण श्लोकद्वयस्यार्थमाह यथा वेदत्रयेणादिष्टा
न पि स्वधर्मानन्यत्तस्य यो मां भजेत्तत्सोऽपि एवं सर्वोत्तमः प्रवत्तमः किमज्ञाना नास्तिक्याद्वा न धर्मांश्चरणेन स
न च तु आदीनां गुणान्विपत्दोषांश्चाज्ञाय ज्ञात्वापि मध्याना दिविक्षेपतया मद्भक्त्यैव सर्वं भविष्यतीति
दृढ निश्चयेनैव धर्मान् संत्यज्य ह्यामभक्तिर्दोषेन निवृत्त्याधिकारतया संत्यज्य स्वधर्मा विहितकाद्यशीत्
स्पैकाद्यपञ्चप्रवासानिवेद्य आहारयोग्य भक्ति विरुद्धाधर्मा ज्ञात्वा संत्यज्येत्यर्थः किंच यावान्देश
कालाद्यपरिच्छिन्नः सर्वात्मा यादृशः सच्चिदानंदरूपस्तं मां ज्ञात्वा यज्ज्ञात्वापि यद्वा विशेषणः पुनः
पुनर्ज्ञात्वा एकांतभावेन ये मां भजंतेमीतिसाधुत्तलक्षणमद्भक्तं प्रकृतिमनुसरति वेत्स्यदो वेत्स्यवान्दृष्टा
प्रणमेदंडवद्भुवि उभयोरंतरा विस्मृः श्रीचक्रगदाधरः शालिग्रामेततः कार्यैवस्त्रवपुरयाम्मुदा स
रन्ने स्मारयन्विष्णुनामान्युच्चारयन्हरेः यतो वै सर्वस्वामी सर्वमाचेग्गोतरस्याप्यपिनः सद्भक्तिस्तत्राग्नि
तेन भवतीति किमस्वप्रयोजनमित्याह समीपेतिष्ठते यस्त्वंतकालेपि वैष्णवः स्पाच्छेद्दे सर्वस्यानेयप
पि ब्रह्महा भवेत् तदुक्तं वामदेवेन नारदीयपुराणे हरिभक्तिपरायणैस्तहरेर्नामपरायणाः वर्णावाच
र्णावाद्यावाप्त्वा ते भ्योनित्यं नमोनमः संसारसागरंतर्तुं यत्र्छेत्सत्येषान्नमः सभवेद्भक्तभक्तानाभक्तः स्त
पापहारकः सप्तन्मंजन्मजन्मनिष्टचन्नतिष्ठत्स्व वंदे स्वस्था यो वक्ति हरिनामानि तस्मै नित्यं नमो नमः
तस्मात्पुराणार हस्येऽथासः केवलेकवलेतर्वं नोयदि स्यात्कोटिने उपवासी सविज्ञेयः सोत्रदोषैः
न लिप्यते नृसिंहपुराणे च मार्कंडेयः यत्र यत्र चरन्मां नृसिंहस्तत्र वर्तते गच्छेस्मि पुच्छन्वपतं

जननाद्यत्वपिद्दसन्नपि नृसिंहेति नृसिंहेति नृसिंहेति सदाभ्यसन् पुमान्न लिप्यते पापैर्भक्तिं मुक्तिं च विंदति
नारी सुभगतामेति सौभाग्यं च सुरूपतां भर्तुः प्रियत्वं लभते नैवयक्ष्मं च विंदति नमस्यन्नीचजन्मेति स
म्यग्ज्ञानी द्विजो भवेत् चांडालोपि भगवद्भक्तो लोकान्पुनातीमाह सूतः संभाषितो वापि पूजितो वा द्विजो
त्तमः पुनाति भगवद्भक्तश्चांडालोपि यदृच्छया श्रीनारद उवाच श्वपचोपि महीदेवाः विष्णुभक्तो द्विजा
धिकः विष्णुभक्तिविहीनस्तु ब्राह्मणः श्वपचाधमः श्रीभागवतेपि विप्राद्द्विषड्गुणयुतादरविंदनाभ
पादारविंदविमुखाच्छ्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः अपि
मानो बह्वभिमानो ब्राह्मणो भवेद्देवेभवः स तु श्वपचादहीनः भगवद्भक्तः श्वपचस्तु विप्रादपि कतुलिआसमपुः
काभिप्रायः पुनरेतच्छ्लोकेन पद्याभिप्रायो वर्ण्यते अहो बत श्वपचोतो गरीयान्यज्जिह्वाग्रे वर्तते नाम
तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ये तुभ्यं तव नामस्मरणं तिउच्चारयंति तैः
श्वपचैरपि तपोदानाध्ययनसर्वतीर्थस्नानफलं प्राप्तं यद्यातैर्जन्मजन्मसु पूर्वमेतत्साधनादिकं पादि
ते भवन्नतोस्मिन्जन्मनि तव नामसंकीर्तनं कुर्वंति सर्वेदाभूतिकारणात् भागवतां श्वष्ठाः स्मृताः विष्णु
धर्मोत्तरे जन्मांतरसहस्रेषु तपोदानसमाधिभिः नराणां क्षीणपापानां हरौ भक्तिः प्रजायते गीतासु अपि
चेत्सुदुराचारस्त्यादिनाच यत्रास्मिन्नृपेयत्रयत्र पुनरुक्तिः स्यात्प्रकरणाद्युद्धार्थो भक्तिप्रवृत्तिर्विश्वासा
यवेत्सदोषः देवाखेडे भगवद्वचने न मे प्रियश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः तस्मै देयं ततो ग्राह्यं स च य
थाह्यहमितिप्रकारेण जीविते विष्णुभक्तस्य वरं पंच दिनानि चेत्याह न कल्पसहस्राणि भक्तिही

रा० ना०

१४

14

नमस्केशवेत्यभक्तस्याप्ययंसर्ग्यः उच्यमानमानाभ्यांतुष्टैवायुर्हरतीत्याह तदुक्तंभागवते आयुर्हरतिवैपुंसामुद्यन्न
स्तमयंन्नसौ नस्यर्तेयत्क्षणोनीतउत्तमश्लोकवार्तया यत्क्षणः यः कालः उत्तमश्लोकोहरिस्तस्यवार्तयाकथयेत्य
र्थः यद्विजीवितमात्रेणपुरुषार्थइतिचेत्तत्राह तरवः किंनजीवंतिभस्त्राः किंनश्वसंत्युत नखादंतिनमेहंतिकिंग्रा
माः पशवोपरे वदत्यतिच दाह किंनजीवंतिभस्त्राः किंनश्वसंतिभस्त्रिका कश्चिद्धीणामवदतिसजीवतेननाम्ना
कदाचिदपि हरिकथांनशृणोतियः पश्वादितस्सत्याह विड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः नयत्कर्णप
थोपेतोजातुनामगदाग्रजः श्रीकृष्णइत्यर्थः ननुहरिभजनेप्रयासइतिचेन्नेत्याह नह्यच्युतंप्रीणयतोबह्वाया
सोसुरात्मजाः आत्मत्वात्सर्वभूतानांसिद्धत्वादिहसर्वतः इहजगतिसिद्धत्वात्स्थितत्वात्सर्वतःसर्वत्रपूर्णत्वात्
नप्रयासइत्यर्थः तदुक्तंविष्णुपुराणे भूतानिविष्णुर्भुवनानिविष्णुर्वनानिविष्णुर्गिरयोदिशश्च नद्यःसमुद्राः
सरितश्चसर्वायदस्तियन्नास्तिचविष्णुरेव इत्युक्तत्वात् किंच कोतिप्रयासोसुरबालकाहरेरुपासनेस्वहृदिछि
द्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनांसामान्यतः किंविषयोपपादनैः हृदिछिद्रवत् हृदयावकाशवत्स
ख्युः मित्रस्यस्वस्यअशेषदेहिनांचात्मनः एवंभूतस्यहरेरुपासनेभक्तौहिअसुरबालकाः कोतिप्रयासः नको
पीत्यर्थः एवंसतिअभजनेतुमान्स्यतत्वस्यइत्याह मानुष्यदुर्लभप्राप्योहरिर्नार्च्यतेलघुः तस्मात्स्वंतस्यकोपि
कोन्यस्तस्मादचेतनः नकोपीत्यर्थः इतिनारदीयेभागवतेच यः प्राप्यमानुषंलोकेमुक्तिद्वारमपावृतं गृहेषु
खगवत्सक्तस्तमारूढच्युतंविदुः श्रीमन्नृसिंहरघुनाथदरेमुकुंद नामानिलोचनरच्युतमखंडमविष्णो राजापि
राजपुरुषोत्तमचक्रपाणेत्वंमोचयिष्यसिकदाप्युततत्त्वनाम्ना इतिश्रीनामामहात्म्येफलनिरूपणेति १५

हासोक्तेचतुर्थप्रकरणं ४ एवंप्रकरणेवैष्णवत्वादिप्रमाणंनारदीयपुराणेश्रीमद्भगवद्गीतासुउक्तं इदानींवसि
ष्ठस्मृत्युक्तत्वात्वैष्णवधर्ममाह गरुडमित्याद्युक्तेष्वथवसिष्ठंब्रह्मसंभवं पप्रच्छुर्मुनयःसर्वेपराशरभृगो
गमाः भगवन्भवताप्रोक्तायज्ञदानव्रतादयः वर्णाश्रमाणांकर्तव्यास्त्वधाराज्ञोमहीभृतो अथनाम्नात
मिच्छामोविप्राणांविष्णुसेविनां कीदृशियाःप्रकर्तव्यानित्यनैमित्तिकाःक्रियाः वैष्णवानांमुनिश्रेष्ठब्रू
हिसर्वमशेषतः वसिष्ठः शृणुध्वंमुनयःसर्वेस्वधर्मंसनातनं वैष्णवानांहिविप्राणांयथाचाचरणं
शुभं सर्वेषांब्राह्मणानांस्वधावैष्णवांशेनचोदिताः इतरेत्रयोवर्णाब्राह्मणाविष्णुसूनुना तस्माद्वै
वैष्णवाविप्राःप्रकृत्याद्विजसत्तमाः अवैष्णवत्वविप्राणांमहापातकसंमिते अवैष्णवस्तुयोविप्रःस
र्वकर्मसुगर्हितः रौरवेनरकेप्राप्यचंडालयोनिमाप्नुयात् नित्यनैमित्तिकेकाम्येत्रिविधंश्रुतिचोदि
ते अवैष्णवानांविप्राणांकर्मतन्निष्फलंभवेत् योमोहाद्विष्णुमन्येनहीनदेवेनदुर्मतिः साधारणं
सकृद्वृत्तेमोहात्सजोनात्सजोत्सजः योविष्णुंश्चैवमात्मानमन्यंशोधंप्रपद्यते सचंडालोमहापापीरौरवंनर
केव्रजेत् अवैष्णवत्वविप्राणांआत्मनाशस्यकारणं अब्रह्मण्यंहतेहत्वंचश्रनाचारहतेकुले नदास्या
वासुदेवस्यसर्वलोकेश्वरस्यये तेषांहिनरकेवासःकल्पायुतशतैरपि चतुर्वेदीचयोविप्रोवासुदेवे
नविंदति वेदभारभराक्रांतःसवैब्राह्मणगर्दभः तस्माद्वैष्णवत्वेनब्राह्मण्याद्विविहीयते वैष्णवत्वे
नसंसिद्धिलभतेनात्रसंशयः नारायणःपरंब्रह्मब्राह्मणानांहिदैवतं सोमरुद्रादयोदेवाःतत्क्रिया
णांविद्यामपि शूद्राहीनाःतस्याद्यायाश्चर्चनीयाःप्रकीर्तिताः यत्ररुद्रार्चनंप्रोक्तंपुराणेषुस्मृतिष्वपि

तद्ब्रह्मण्यं विषयमेवमाह प्रजापतिः हृद्यार्चनं त्रिपुंड्रं च यत्पुराणेषु गीयते तत्र विद्भिः शूद्रजातीनां नेत
रेषां तदुच्यते तस्मात्त्रिपुंड्रं विप्राणां नान्यार्थमिति सत्तमाः यच्छ्रुतानां तु विभ्रयुः पतितास्तेन संशयः
ऊर्ध्वपुंड्रं तु विप्राणां मतं तेषु श्रुतिचोदितं ऊर्ध्वपुंड्रं मृदा शुभ्रं ललाटे यस्य दृश्यते सर्वपापविशुद्धात्मा
स याति हरिमंदिरं तथा चाथर्वणी श्रुतिः धृतोर्ध्वपुंड्रो दरचक्रधारी स्वात् विष्णुं ध्यायति यो महात्मा
स याति नाकं दुरितानि विधूय विशंति यद्यतयो वीतरागा इति अस्यार्थः यः पुरुषो वैष्णवः शुभ्रया मृद
कृत्वा धृतोर्ध्वपुंड्रः यश्च विष्णुं ध्यायति स नाकं याति न विद्यते अकं दुःखं यस्मिन् स नाकः स कथंभूतः
दरचक्रधारी दरः शंखश्चक्रं च धारयति यः यः किं कृत्वा दुरितानि विधूय नाशयित्वा निखिलत्वेन
नाकं यत् यं वीतरागा यतः विशंति प्रविशंति नाके वैकुंठ इत्यर्थः श्रुतेतरं यजुर्वेदे अश्वक्रांते र
थक्रांते इति मृत्तिके हर मे पापमित्यादि याज्ञवल्क्योपनिषदि हरेः पदाकृतिमात्मनो हिताय म
ध्ये छिद्रमूर्ध्वपुंड्रं यो धारयति स परस्य प्रियो भवति स पुण्यवान् भवति स मुक्तिवान् भवतीति
कठवल्लाम महोपनिषदि धृतोर्ध्वपुंड्रो दरचक्रधारीत्यादि मंगलोपनिषदि धृतोर्ध्वपुंड्रमिति
आचम्य धारयेत् पुंड्रं मृदा शुभ्रं तु सर्ववित् तस्य प्रमाणमाह नासिकामूलमारभ्य केशांतं सम
कल्पयेत् मध्येऽङ्गुलस्य विस्तारस्त्वंतरंगुलमेव च एकांगुलो द्व्यंगुलो वा इति तस्य विधा मताः सां
तरालं द्विजः कुर्यात्तथा चांगुलमात्रकः धारयेदूर्ध्वपुंड्राणि ललाटादिषु वा क्रमात् ऊर्ध्वपुंड्रस्य
मध्ये तु लक्ष्मीस्थाने प्रकल्पयेत् हारिद्रेणाथ चूर्णेन कुंकुमेन तु शोभिना उक्ते चान्यस्मृतौ दंडकार १५

ललाटे वै हृदये पद्मपत्रवत् वंशपत्राकृतीबाह्वोः दीपादीपकलाः स्मृताः तिलकंनयतिःकुर्यान्नूर्ध्वंमाकुर्व
यात्स्मरेति इतिसच्छास्त्रे इत्यादिवाक्यैर्वैष्णवानांतिलकविधिरुक्तः यत्तोर्ध्वपुंड्रनिषेधः सतुशैवानामेव
नवैष्णवानांयत्रत्रिपुंड्रनिषेधः सतुवैष्णवानामेव नशैवानांचोर्ध्वपुंड्रग्रहणेन एवंभेदक्रमभवतीतिसंप्रदा
यानुसारेणवर्तितव्यमितिभावः नहिनिंदानिंदितप्रवृत्तान्यपिनविधेयंलोकसिद्धिन्यायात् द्वेषोमा
स्तुनिंदाकृतप्रत्यवायात् प्रकृतमनुसरति संध्यादानंजपोहोमः स्वाध्यायपितृतर्पणंभस्मीभवति
तत्सर्वमूर्ध्वपुंड्रविनाकृते समस्तमिवीतरागैरप्रमत्तैः समाहितैः ऊर्ध्वपुंड्रंहरेःपूजात्रिमार्गैरनु
ष्ठिते ब्राह्मणेनैवमर्दयात्भस्मनचचंदने यद्यद्धयानविश्वासायास्विन्नोभवेन्नरः नत्रिपुंड्रंदि
जैर्धार्यंपट्टिकाकारमेवच नचान्यदेवताभक्तिरापद्यपिकदाचन यस्तुनारायणादन्यंस्वातंत्र्येणप्रप
नयेत् भवेत्तुनिष्फलास्तस्ययज्ञदानादिसत्क्रियाः संगाभावेनदेवानामर्चनेनतिषिध्यते सतंत्रवु
ध्यायः कुर्याद्ब्राह्मणोनरकंव्रजेत् तस्माद्ब्राह्मणोनित्यंप्रयत्नेनार्चयेद्धरिं नदावरणाभेदेनदेवताः
परितोर्चयेत् अवैष्णवस्तुयोविप्रःश्वपाकादधमःस्मृतः नतेनसहवक्तव्यमापद्यपिकदाचन सुदर्शना
दिपुंड्राणांधारणंप्रथमेस्मृतं तन्मंत्राध्ययनेचैवतदीयाराधनेतथा अन्यात्रापि नित्यमाराधनेविष्णो
र्ध्यानेहोमेजपस्तथा तत्कथाश्रवणेचैवतन्नाम्नस्तुप्रकीर्तितं तत्पादतीर्थसेवाचतन्निवेदितभोजने
प्रमाणान्तस्यपुरतोनर्तने प्रकृतमनुसरति तत्स्तोत्रपठनेचैवतद्भक्तानामसेवने एवंसंपूजयेन्नित्यं
नारायणमनामयं सवैष्णवोभवेद्विप्रःसर्वलोकेषुपूजितः ललाटेचोर्ध्वपुंड्रंबाहुमूलेहृद्देशे कंठपद्म

ग॰ मा॰ तमालानपवित्रेदक्षिणेकरे वैष्णवेनसदाधार्योहरिसंवेयथवेदतः शंखचक्रांकनेकुर्याद्वाहुमूलेतोवक्ष
स्थलयोः कलशापद्मभस्मेषुग्रुप्रस्ताद्विस्वपिनक्षये सपुत्रपशुदाराणांब्राह्मणानांविशेषतः कुर्याद्दवे
१८ तनानांचवैष्णवानांमलद्वाच शंखचक्रेसुलेकुर्यात्प्रतसेवांहूमूलयोः सर्वाश्रमेषुचसतांब्राह्मणोचक्षां
16 तिचोदनात् होमाग्निनैवसंतप्तेचक्रमादायवैष्णवः दक्षिणेवाहूमूलेनदग्धकर्मसमाचरेत् विधि
नाधारयित्वेवपवित्रेचक्रमुत्तमं ततः सवैष्णवेयातिनाम्सचाहितमत्तमा तस्मात्सुविधिवच्चक्रंधा
रयित्वासुदर्शनं यस्मात्सर्वाणिकर्माणिकुर्वीतद्विजसत्तमाः कटवल्लीमुग्रोपनिषदि दक्षिणेत
भुजोविप्रोविभृयाद्वैसुदर्शनमित्यादि चक्रस्यधारणेकालेब्राह्मणानांविदुर्बुधाः जातकर्मणिवेऽ
थाचौलोपनयनेपिवा मंत्राध्ययनकालेवाचक्रंधार्यंविधानतः प्रमस्मृतौ उपवीतशिखावद्ध
क्रलाञ्छनसंयुतः चक्रलाञ्छनहीनस्तुसविप्रोनिष्फलोभवेत् वामस्मृतौ ललाटेतुगदाधार्यामू
र्ध्निचापंशरोत्तथा हृन्मध्येनंदकंचैवशंखचक्रौभुजद्वये इतिवेद्या चक्रांकिताःप्रवेष्टव्यायावदाग
मनेमम नाशुद्धिताप्रवेष्टव्यायावद्दागमनेमम वराहसंहितायं योहिवैष्णवलोकमालेर्धर्मानतुतिष्ठमा
नोऽग्निनाचक्रंपद्मैःग्निवैसहस्रार सहस्रारेणनेमिनेमिनेमिनानतप्ततनुः सायुज्यसलोकतामाप्नोतीति
चक्रेविमंत्रिविपुषामिनिनद्वलंदेवावामस्तनस्यविष्णोः सप्ततिनाकेहरिनाविपश्यविमस्यविप्रोति
पद्यतयोवीतरागाः इतियजुषि विपन्नेविष्णोरन्नचक्षेस्तनप्रभृत्याद्यायुच्चा स्कंदोगपरिशिष्टे स्मृतयश्च
नाग्निनैवतप्तेनतप्तेचक्रमादायवैष्णवः दाहयेत्सर्वगात्राणिवाहुसिन्धालेसमात्मरिदये ब्रह्माण्डे कृताधा १८

तस्मद्धीमुद्रां तापयित्वा स्वकां तनुं चक्रादि चिह्नितं भूपयावद्धे हैस्ववीनरः नारदपंचरात्रे द्वादशारं तु षट्
कोणं वलयत्रयसंयुतं हरेः सुदर्शनं तप्तं धारयेत् द्विजसत्तमः महाभारते ब्राह्मणाः क्षत्रिया वैश्याः शू
द्राः स्वकुलतत्पराः अर्चनीयः ससेव्यश्च नित्ययुक्तैः स्वकर्मभिः स्कांदे ऊर्ध्वं द्विजे देति ब्रह्मांडे संवत्सरेण
यत्पापं मनसा कर्मणा कृतं तत्सर्वं नश्यते तेषां सकृच्चक्रांकदर्शनात् पद्मपुराणे ज्वरदाहभयं चैव चक्र
गृधारभयं तथा सर्वं नश्यति शंखेयानि तप्तचक्रांकधारणात् वाराहे म्लेच्छदेशे शुभेवापि चक्रांको यस्तिष्ठति
वृति योजनानि तथा त्रीणि मम क्षेत्रं वसुंधरा मत्स्यपुराणे विष्णुचक्रांकितं देहं यस्य वै त्रमतिर्विश्रुतिं च
क्रांकितापदानं खट्वांगसकृत् द्विजोत्तमैः नारदीये चक्रांकितस्य सान्निध्ये पलमं कृतेन नरः स्नानं दानं तपो हो
मः सर्वं वा व्यर्थं भवेत् भविष्योत्तरे सत्यचक्रांकितदेहोपि सद्धर्मो भुवि दुर्लभाः नवाग्नेनि वंशं समतोरस्यथानम
वानरः मार्कंडेयपुराणे चक्रादिधारणं पुण्यं विष्णुसेवेच पवेदनाम् प्रतिकृतस्य ने तो हि स्मृतपत्रस्य कार
णं वामनपुराणे लीलया विष्णुविग्रहल्लवाद्भुमलेभ्य दर्शनं कुलकोटिसमुद्धृत्य समगच्छेद्धैस्वं वपदं वृक्षवे
वर्णं चक्रांकितभुजे यत्र यो वै तिष्ठति सुदर्धीः सयाति सर्वकेवलो रथावृत्तमतं सत्वं चक्रांकितं नरं दृष्ट्वा
पत्सुतं नाभिवादयेत् निर्धनो निश्वतं प्राप्य विष्ठायां जायते कृमिः ये केचवे दुत्रपुरुषा विष्णुचक्रेण मुद्रिताः
तेषां दर्शनमात्रेण महापातकनाशनं स्कंदपुराणे चतुर्वेदाधिकोयस्य शुंखवत्स चक्रादिचिह्नितः गृहे यस्य
गृहस्थस्य किं करिष्यति यमः किं करिष्यति भूपाल प्रयागमरणेनवा चक्रांकितशरीरस्य गृहे तिष्ठंति प्र
कीर्तिताः दृष्ट्वा चक्रांकितं देहं मरणे समुपस्थिते यमदूताः पलायंते आगच्छंति हरेर्गणाः कृत्स्नात्रयो

ग॰ ना॰
७
17

किंतेदेहंचेष्टतेयत्रऊत्रवै श्मशानमपितत्कुर्द्दकिंपुनःप्राणममयः अत्राप्याख्यायिका सुदर्शनोनामरा
जाशत्रुभिश्चपराजितः हृतराज्यस्तीर्णबलोभरद्वाजमुवाचहेब्रह्मन्जोवा ब्रूहिनिप्रजयोमम्श्यामीदृशस्यभ
वनकथं महाजउवाच वक्ष्यामिशृणुराजेंद्रत्वंराज्येचयथाभवेत् वृत्रेणनिर्जिताःसर्वेपुरादेवाःसवा
सवाः हृतराज्यबलादैत्यैर्देवाःसर्वेजनेश्वरः ब्रह्मादयोग्रमयःसर्वेशंकरप्रमुखास्तथा त्राहित्राहिजग
न्नाथवृत्रेणनिहतावयं त्रैलोक्याधिपतिर्जातोवृत्रोनिर्जितकंटकः यथावायेनवास्माकंतथाऊरुज
नार्दन श्रीभगवानुवाच ममायुधःस्वदेहानिलोक्यपिबास्यरोत्तमाः यूयंतोसम्मरेदेयंमंत्रप्रसादेनदेव
ताः ममायुधानिकिंनेर्देहेभवतोत्वंह्रसमक्रमः तयेयास्यतिसम्मरेमत्प्रसादेनलीलया एवमुक्तेप्रणम्यते
ब्रह्मरुद्रपुरोगमाः हृतास्तत्रेगतादेवाःस्वस्थानेत्मुदान्विताः ततःप्रभृतिब्रह्माद्याःसर्वेदेवाःसवास
वाः विहंकृतायुधेदेदेहेकर्मचक्रुरतेद्विताः अरययःसिंहगोयर्शोणातालेपद्मगोस्वरा देहेऊर्वेतिविहा
निशंखेचक्रमथान्यपि तस्मात्वमपिराजेंद्रकुरुकृष्णायुधांकितं स्वदेहंसर्वसंग्रामेजयस्त्वंभविष्य
सि इतिश्रुत्वाव्यासशिष्यान्नैमिषारण्यवासिने सुदर्शनस्तनेस्तनेचक्रेकृत्वायुधहरेः श्रीकृष्णायुध
माहात्म्यंयःपठेत्प्रयतःनरः द्वादश्यामथवामत्रनैवाप्नोतियमालयं नभयंविद्यतेतस्यत्रैलोक्येसा
पिसत्तये वाग्भिद्येनैवचाप्नोतिलक्ष्मींनचआवनेत्रहानं सप्तजन्मकृतंपापमेतत्कृत्वाप्रयाहति इतिश्री
स्कंदपुराणेसनत्शौनकादिसंवादेकृष्णायुधस्तोत्रंसमाप्तं ५ तथाचगारुडे श्रीभगवानुवाच शृणुष्वविहगे
श्यानेसदामेवचनंमम शृणुष्वविहगेशानेसदामेवचनंमम कलिस्मरनिस्वरूपेणजगदाहासुपकारकं स १८

वं धर्माधिकारस्य शुचीनामेव चोदितः अविरत्नं निश्चमेतत्सत्ययो विभज्याशुभानि मे अश्वमेधसहस्रस्य वाजपेये
यपुतस्य च यत्फलं श्रूयते तत्समदीयाशुभयाचरणात् पर्वताग्रे नदीतीरे देवतायतनेषु च तपसा यत्फलं
तत्समदीयाशुभयाचरणात् तद्धारणाविधिं वक्ष्ये महापातकनाशनं चक्रशंखौ समासाद्य यश्च शुभ्रादिभिः
शुभैः अनवद्यं च नैवेद्यं विनिवेद्य च भक्तितः सुदर्शन नमस्तेस्तु पांचजन्य नमोस्तु ते इति मंत्रस्य स्वाये
नमस्कुर्यात्पुनः पुनः जुहुयाद्धविषग्नौ हविषा वैजयन्त्यथीः याठः मूलेन षोडशाहुतीः चक्रं च पांचजन्यं
च तस्मिन्नग्नौ विनिक्षिपेत् पुनः प्रजापूर्वकं आगो यप्र ओमहारकैः मद्भक्तानभ्यर्च्य नाम्ना तस्मादाप्रणा
मेत्वथीः अग्निनैव तु संतप्तं चक्रमादाय मामकं दक्षिणे बाहुमूलेन संदहेत्तु तसाथसः अथवा नेनके
नापि वैष्णवेन महात्मना लांछितं विप्रयाचक्रेण पांचजन्येन चैव च उच्चारयन्निमं मंत्रं हृदये मां विचिन्तये
त् सुदर्शन महाज्वाल कोटिसूर्यसमप्रभ अज्ञानांधस्य मे नित्यं विष्णोर्मार्गं प्रदर्शयेति सुदर्शनमंत्रः अ
थ शंखस्य मंत्रमुच्यते तद्यथा पांचजन्य निजध्वानध्वस्तपातकसंचय पाहि मां पापिनं घोरसंसारा
र्णवपातिनमिति इमं मंत्रं समुच्चार्य देहे संस्कृत भुजे स्वके यप्तेन प्रकारेण शंखं वे चक्रं च धारयेत् त्रिषुलो
केषु संदिग्धं मद्भक्त मिति गीयते श्रीगरुड उवाच अस्याधिकारिणो ब्रूहि विधिवत्पुरुषोत्तम तद्दते
मम वक्तव्य नामोस्ति भुवनत्रये श्रीभगवानुवाच गरुड सर्वविशेषतः सर्ववर्णाश्रयं विधिं आख्यादि
सर्वलोकस्य मम प्रीतिकरः परः विप्राणां क्षत्रियाणां च वैश्यशूद्रस्त्रियैव च अनेनैव कर्तानामश्च चक्रांका
ममवल्लभाः चक्रांकितानां यद्दातं कोटिद्विजानये यो दद्यात्तिनरः प्राज्ञः संभवेत्तु फलं तथा यः शरीरे

रा॰ना॰ यस्यकस्यापिहस्तेवैष्णवदर्शने तस्मैकुर्वीतपदौद्विजनमस्कारंस्मृतादयः तथाचश्रुतिः चरणंपवित्रमिमा
दि तिर्यञ्चेपि पवित्रेचरणेचक्रेलोकद्वारेस्पृष्टेन पर्यायवाचकाद्येतेचक्रस्यपरमात्मनः मन्त्रक्तौकिं
९ नदेहेषुयस्तुहृत्वेषंसमाचरेत् वदेद्वापुरुषंकिंचिन्ममद्वेषीनसंशयः चक्रौकिंतुमताहस्त्ययोन्यास्मै
18 प्रदद्यातिच हृत्वैकर्मसर्वेयातिनिरयंनात्रसंशयः तस्मात्सर्वप्रयत्नेनमन्द्रक्रांहितमाचरेत् स
र्वोपचारैरनिशंतोषितोहंनसंशयः इत्यादिश्रुतिस्मृतिपुराणवाक्येभ्योनिश्चयं कृत्वाभग
वद्भक्तैर्यत्नेनस्वेशंखचक्रादिधारणंपरमात्मश्रीविष्णोर्नियेषुवस्मसेवयाऽरणंकर्तव्यं नैवा
त्रसंदेहःकार्यः इतिश्रीगरुडपुराणेभगवद्भक्तिनिर्णयसारोद्धारेत्रयस्त्रिंशोऽध्यायः ——— अथवैष्णवपरिशि
ष्टादेवाभोयत्रविनतेनवाङ्मनात्स्पर्शनेनप्रयताःसर्वमाप्नुत्य येनाकिंतामनवोलोकस्पृष्टिंविन
त्वनेब्राह्मणास्तद्वहन्तीति तन्मेवप्रकृत्य पाद्मे उपवीताद्भिर्व्रतासौशंखचक्रादयस्तथा ब्राह्मणा
स्यविशेषेणवैष्णवस्यविशेषतः नारदीये श्रीकृष्णस्याङ्कविहीनगात्रःश्मशानतुल्यःपुरुषोथ
नारी हृष्ट्वातेनरंतेनस्पृष्ट्वातेसवासाङ्गात्वासमर्चयेद्धरिमंगानिनामेति पाद्मे तप्तचक्रांकितेहृष्ट्वायेति
देतिनराधमः अवलोक्यमुखंतेषामादित्यमवलोकयेत् अग्निपुराणे अवलोक्यप्रतिपितृर्वाकं पि
लाद्वहिकृत्वाकिंवाप्रतिमायाहरेर्मया किंमयापशिष्टंस्पृष्टस्यविस्मृभक्तस्यकर्हिचित् तन्मुद्रांकि
तदेहस्यचेतसमानादरस्फुटंतः तेनकर्मविपाकेनपुत्रशोकोममेदृशः प्रकृतमनुसरति तस्मात् य
त्नाविधिवच्चक्रयदिकर्मसमाचरेत् विपाकंतनभवेत्सर्वसिद्धाहुर्नैर्द्विजोत्तमः इतिवसिष्ठस्मृते १८

यस्यनाम्निविलसद्राघवेमतिसर्वदोषदहनेऽज्ञाप्नी ममस्मरणनिश्चयेनशोभतेसोपजीवतिस्थिरयाम्भ्रमारः
इतिश्रीरामनाममहात्म्येश्रुतिस्मृतिपुराणेतिहासोक्तेश्चस्तुतास्रमविशेचितेचमेप्रकरणं ५ सर्वेकर
णेवशिष्टेनस्यमस्यइदमुक्तंब्राह्मणाःविप्राइंग्गाडुमन्त्राःहविर्याइयस्तुब्रह्मणोगाडुमन्त्रास्तुप्रयं
लेवक्राद्विपारणाकर्त्तव्यमिस्युक्तं इदानींनद्वारणप्रकारंशौनकोक्तप्रकारेणादर्शयति शौनकोक्तम
कारेणनम्रस्कृत्वोकथारणं कर्त्तव्यंवैष्णवैस्सर्वैःसंप्रदायानुरोधतः तथाचश्रुतिः अतप्ततनूर्नतदामो
अश्नुतेशृतासइद्वहंतस्तत्समाशत तयोःपवित्रेविततंदिव्यप्रदेशोऽचेतेगोऽस्यतेमस्योवशिरक इ
तिऋग्वेदे चरणंपवित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृतानितेनपवित्रेणशुद्धेनपूताः अतिपा
प्मानमरातिंतरेम लोकस्यद्वारमर्चिमत्पवित्रंज्योतिष्मद्भ्राजमानंमहस्वत् अमृतस्यधाराबहुधा
दोहमानं चरणंनोलोकेसुधितांदधातु तथाचित्तेवेदे पवित्रंचरणंचरणंचरणंचक्रेलोकद्वा
रस्यदर्शने पर्यायवाचकान्येतेचक्रस्यपरमात्मनस्तुति सद्दोवाच याज्ञवल्क्यहामुलानात्मस्तिहिता
यप्रेणाह्वरिंमजेत् स्वेष्टाकमौलेर्वर्मणाग्निनासंतप्तानितंयत्नेरस्यजवंदे एतद्विष्णोरस्त्रचक्रेशत
नेजन्मोभौचिंतर्तवेचधर्मणोह्नः मूलेवाहोर्दर्शयतेपुराणानिलिंगान्यग्निनाप्तायुधानिधार्यंतः इति
सामवेदः उरुक्रमस्यविष्णोरंकितालोकेऽरूणायामवेम इत्यथर्ववेदः अग्निहोत्रंयथानित्यंवेदस्या
ध्ययनंयथा ब्राह्मणस्यतथानित्यंतप्तचक्रांकधारणमिति पद्मपुराणे श्रुतिस्मृतिनेशाहरूकैः
तत्प्रकारःप्रतन्यते वक्ष्यचपरिशिष्टेयथोक्तंयच्छौनकादिभिः षोडशोपचारैःसलेनभगवतम

रा॰ म॰ मर्च्य कृत्वोत्तरे परमव्योमन् शान्तो मित्रः शंवरुणाद्यैस्ताभ्यां मंत्राभ्यां चक्रंशंखंचाभ्यर्च्य वैश्वानरस्य
ना॰ सुसमौस्थाममन्त्रैश्चपचरेत् पुरुषसूक्तेन षोडशाहुतीर्हुत्वा भगवंतं पुरुषसूक्तेन संपूज्योपस्थाय यो
१९ वृक्षाणामिति इदंविष्णुरेतो निपतेत् द्वादशारेनहितज्जराय वर्वर्त्ति चक्रं परि द्यामृतस्य अग्नेर्मैवप्रय
19 मस्यमेताभ्यां मंत्राभ्यां शंखंचचक्रंच ग्रावाद्ध्यात् सुदर्शनमंत्रो यथा सुदर्शनमहाज्वालसूर्यकोटि
समप्रभ अज्ञानांधस्य मे नित्यं मार्गं प्रदर्शय इत्यादाय अथ सुदर्शनगायत्री सुदर्शनाय विद्महे
महाज्वालाय धीमहि तन्नश्चक्रं प्रचोदयात् इति चक्राधानं पांचजन्य निजध्यानध्वस्तपातकसंचय
पाहि मां पापिनं घोरे संसारार्णवपातिनं इत्यादय अथ शंखगायत्री पांचजन्याय विद्महे पवमानाय
धीमहि तन्नः शंखः प्रचोदयात् इति शंखधारणफलमाह तत्रैव विष्णुधर्मोत्तरे शंखचक्रांकितो
विप्रः श्मशाने म्रियते यदि प्रयागे या गतिर्यस्य सा गतिस्तस्य नारदेति एवं यः कुरुते विद्वान्ब्राह्मणः श्रो
त्रियः शुचिः सर्वपापैः प्रमुच्येत वैकुंठं च स गच्छति श्रायमानैर्बोधिमां चक्रतीर्थं तथैव च शंखचक्र
विधानेन बहिः स्थितो भवेन्नरः इति मुद्राधारणविधिः एवं वैष्णवधर्माश्च प्रदर्श्य इदानीमवैष्णवान्निं
दति तत्राह नारदः श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवं वैष्णवः कर्मवाह्योपि पुनाति भुवनत्रयं
सकर्त्ता सर्वपापानां यस्याभक्तस्तवाच्युत पापं भवति धर्मोपि तवभक्तैः कृतो हरे धर्मो भवत्यधर्मोपि हि
तो भक्तैस्तवाच्युत निःशेषधर्मकर्त्तापि अभक्तो नारकी भवेत् तस्मात् अवैष्णवं स्पृष्ट्वा पीत्वा वा
ज्ञानतोयदि शुद्धिस्त्रीन्द्रायणेनाकामतस्तु विभिस्तैनकाटिभिः नन्वभुक्ते नकृतोयोऽधर्मपुण्यं भवतीति १९

यदुक्तं तत्केन प्रकारेणेति चेत्तत्राह कविर्जनकं प्रति कायेन वाचेति यत्करोषि यदश्नासीत्यादीनां पूर्वकर्मकृतत्वात्
हरिभजने कर्मवैगुण्ये सति निष्कामत्वात्प्रत्यवायो नास्तीत्याह नेहाभिक्रमनाशोस्ति प्रत्यवायो न विद्यते स्व
ल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ईश्वरोद्देशेनैव विघ्नवैगुण्याद्यसंभवात् किंच अस्य धर्मस्य स्वल्पम
पि उपक्रममात्रमपि कृतं महतो भयात् संसारात् त्रायते रक्षति न तु काम्यकर्मवत् किंचिद्वैगुण्यादिना नैष्फल
मस्य स्यादर्थः तदुक्तं श्रीमद्भागवते तां सेवतां सुरकृता बहवोंतरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते नान्यस्य
बर्हिषि बलीन् ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि उक्तमुपपेतायामुभयोर्वैषम्यमाह व्यव
सायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां इह ईश्वराराधनलक्षणे कर्मयो
गे व्यवसायिनां तु बर्हिर्मुखानां कामिनां कामानामानंत्यादनंतास्तत्राहि कर्मफलगुणफलादिप्रकारभेदा
द्बहुशाखाश्च बुद्धयो भवंति ईश्वराराधनार्थे हि नित्ये नैमित्तिके कर्मणि किंचिदंगवैगुण्येपि न तत्स्वरूपेण यथाशक्ति
यातथ्या कुर्यादिति हि विधीयते न च नैर्गुण्यमपि ईश्वरोद्देशेनैव वैगुण्याभावात् न तु तथा काम्यकर्मस्वतो
महद्वैषम्यमिति भावः ननु कामिनोपि कस्मात्कामान्विहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वंतीति त
त्राह यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः पुष्पितां पुष्पित
विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलामेव वदंति वाचं स्वर्गादिफलश्रुतिं तेषां तया वाचा
पहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयते इति तृतीयेनान्वयः उक्तं च भागवते वेदोक्तमेव कुर्वाणो
निःसंगोऽर्पितमीश्वरे नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः तर्हि वेदः किमित्याह परोक्षवादो वेदोयं

गी॰ म॰
ना॰
२॰ 20

वालानामनुशासनं कर्म्मोत्तमायकर्म्माणिविधत्तेयुगंदयथेति किमितितथावदंति यतोऽविपश्चितःमूढाः
तत्रहेतुः वेदेयेवादाअर्थवादाः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति अपामसोममृताअभूमेत्याद्याः
तेष्वेवरताःप्रीताः अतएवातःपरमन्यदीश्वरतत्त्वंप्राप्यंनास्तीतिवदनशीलाः अतएव कामात्मानःस्वर्ग
पराजन्मकर्म्मफलप्रदां क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति कामात्मानःकामाकुलचित्ताः अतःस्व
र्गपरःपरमपुरुषार्थोयेषांतेजन्मचतत्रकर्म्माणिचतत्फलानिचप्रददातीति तथाताम्भोगैश्वर्ययोर्गतिंप्रा
प्तिंप्रतिसाधनभूतायेक्रियाविशेषास्तैर्बहुलांयस्तांताम्प्रवदंतीत्यन्वयः तेषांचभोगैश्वर्यप्रसक्तानां
तयापहृतचेतसां व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते भोगैश्वर्ययोःप्रसक्तानांअभिनिविष्टचि
त्तानांतयापुष्पितयावाचापहृतंआकृष्टंचेतोयेषांतेषांसमाधिश्चित्तैकाग्र्यंपरमेश्वरेकस्मिन्नेवतत्त्वनिश्चि
त्तिरूपयात्मिकाबुद्धिर्नविधीयते कर्मकर्तृप्रयोगः नोत्पद्यतइत्यर्थः ननुयदिस्वर्गादिकंपरमंफलं
नभवतितर्हिकिमिति वेदैस्तत्साधनतयाकर्म्माणिविधीयंतेतत्राह त्रैगुण्यविषयावेदानिस्त्रैगुण्यो
भवार्जुन निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान् त्रैगुण्यात्मकाःसकामायेअधिकारिणस्तद्वि
षयाःकर्मफलसंबंधप्रतिपादकावेदाः त्वंतुनिस्त्रैगुण्योनिष्कामोभवतत्रोपायमाह निर्द्वंद्वः सुखदुःख
शीतोष्णादियुगलानिद्वंद्वानितद्रहितोभवत्यामित्सहस्वेत्यर्थः कथमित्यताह नित्यसत्वस्थःसत्वधैर्यमा
लंब्योत्यर्थः तथानिर्योगक्षेमः अप्राप्तस्वीकारोयोगः प्राप्तपालनंक्षेमः तद्रहितः आत्मवानप्रमत्तःनहिद्वं
द्वाकुलस्ययोगक्षेमव्यापन्नस्यचप्रमादिनः त्रैगुण्यातिक्रमःसंभवतीति ननुवेदोक्तनानाफलपरित्या २॰

गेन निःकामतयेश्वराराधनविषयव्यवसायात्मिकाः बुद्धिर्विधेयास्तां कथाह यावानर्थ उदपाने सर्वतः
संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः उदकं पीयते यस्मिन् इति उदकपानं वापीकूपादि
तस्मिन्स्नानोदकपकत्रकान्तस्वार्थस्यासंभवात् नत्वनत्रपरिश्रमणेन विभागशो यावान्स्नानपाना
दिरर्थः प्रयोजनं भवति तावान्सर्वोप्यर्थः सर्वतः संप्लुतोदके महाह्रदे एकत्रैव यथा भवति एवं या
वान्सर्वेषु वेदेषु तत्तत्कर्मफलरूपोर्थः तावान्सर्वोपि विजानतो व्यवसायात्मिकबुद्धियुक्तस्य ब्रा
ह्मणस्य ब्रह्मनिष्ठस्य भवत्येव यस्माद्वेदैकवेद्यो ममनभूयात् मद्भक्ते भागवते तथात्वेगर्भलनिष
वदेन नश्यतिनस्कैयमुक्तो पमतावाः प्राणेण पहाराव्यमधोहिया गीतश्चेत्सर्वोहं शास्त्रकृतेज्या
एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः तस्मादियमेव सद्बुद्धिरित्यर्थः अतः सर्वक
र्मफलानि परमेश्वराराधनादेन भवेतीति गीतास्कन्दे विश्वस्यैव स्थितिलयोद्भवहेतुरमतः सर्वा म
कः सकलकारणकारणस्य श्रीमत्सागरहरेरखिलजीवनाथ श्रीराम मम भूपरिपाहि भवप्रनष्टे
इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणेतिहाससारे षष्ठप्रकरणं ६ इत्यादिप्रकारेण सर्वकर्म
णामीश्वरेर्पितत्वादीश्वरस्य च सर्वात्मकत्वात् तथा च श्रुतिः धर्ममयो धर्ममयः इत्यादि देहसंवेद्येन यत्न
ने लौकिकमलौकिकं तत्सर्वं वासुदेवसमर्पणात् भक्तस्य सद्विकरं श्रेय एव भवेत् यत एवोक्तं
श्रीरामभक्तस्य सर्वो धर्मो भवतीति उक्तं च गीतासु सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्
प्रसादादवाप्नोति शाश्वतं पदमव्ययमिति अयमर्थः सर्वकर्माण्यपि प्रतिषिद्धानीति शंकरभाष्ये म

रा॰ म॰
ना॰
२१
21

हावेदांतशोभवशंकरभागवत्साचार्यैर्व्याख्यातत्वात् किंच सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा
वर्त्तमानोपि स योगी मयि वर्त्तते सर्वथा सर्वप्रकारेण वर्त्तमानोपि स मयि ब्रह्मणि विशेषेण तिष्ठतीत्यर्थः कि
मुवक्तव्यं स्वधर्मस्थ उनिसर्वेषां वाक्यानामभिप्रायः इदानीं भगवद्भक्तस्य श्रवणस्मरणकीर्तनादौ व
र्त्तमानस्य स्नानादिकर्मलोपे प्रत्यवायो नास्तीति भगवद्वचनादित्याह मत्कर्म कुर्वतां पुंसां कर्मलो
पो भवेद्यदि तत्कर्म ते प्रकुर्वंति तिस्रः कोट्यो महर्षयः इति नृसिंहकाहादश्यां निर्णये विष्णुधर्मोक्तरक्षा
त्वद्भक्तविषयकाश्रवणाभावदभ्यन्तरात्रिकृष्णं तथाचोक्तमादित्यपुराणे स्मरेति समस्ता मा
नियेसत्काकर्मचाखिले तेषां कर्माणि कुर्वंति ऋषयो भगवत्प्रियाः इदानीं कर्मकरणावधिं दर्शय
ति तदुक्तं श्रीमद्भागवते तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा याव
न्न जायते तावता कालेन कर्माधिकारः गृहस्थस्य यावन्नाविषयेषु निर्वेदो वैराग्यं नोत्पन्नं तेनात्रार्थः
वा श्रीरामकथाश्रवणादिषु तात्पर्येन या श्रद्धा वा सत्ता नोत्पन्ना इत्यर्थः मत्कर्म निषिद्धान्यपि कर्मा
णि भगवति अर्पितानि चेत्तर्हि सा वासुदेवस्य महापूजेति स्मृतौ हितार्थास्ते तथाह यानि लोके निषिद्धानि
कर्माण्यविहितानि च तानि शंभो महापूजानदर्थानि कृतानि चेत् किंच ईश्वरार्पितपापा पापान्यपि क
र्माणि स्वकृताः भवंति सुकृतान्यत्र ते सत्यमेव न संशयः वासुदेवे अर्पितं पापरूपं कर्म पुण्यरूपं भवति
तत्र युक्तिं दर्शयति स्त्रांईकाष्ठमहान्वह्निः शुष्कं कृतात्सर्वं तथा तथैवास्य धियापापापं ज्ञान विज्ञानं दभवे
त ईश्वरेर्पितत्वात् तत्कर्म ज्ञानं संभवतीत्यर्थः तदुक्तं भगवता तमथावेशितधियां कामः कामाय कल्प २१

ते भर्जिताक्वथिताधानाप्रायोबीजायनेष्यतइति मय्यावेशिताधीर्बुद्धिर्येषांतेषांकामःसंकल्पः
कामायनकल्पतेउत्तरोत्तरसंसारफलदानायनभवति यथाधानाधान्यभर्जितेवाक्वथितेपुनर्बीजायप्ररो
हणायसमर्थानेष्यतेनभवतीत्यर्थः तदेवोक्तमाचार्यैःशारीरकवेदांतभाष्ये पूर्वकांडोदितनिष्कामकर्मानुष्ठा
नांतःकरणशुद्धिरिति तदुक्तंवसिष्ठस्मृतौयत्किंचित्क्रियतेकर्मसदासम्यक्कृतंतदुक्तं विष्णवर्पणंतत्पुण्यं
त्येनभागवतःस्मृतः इत्यनेनप्रकारेणश्रीवासुदेवभक्तेनकृतंयद्यत्तविहितमविहितंवाकर्मतत्सर्वंप
रमात्मन्यर्पितत्वाद्धर्मोभवतीतिपूर्वकृतंसकामाद्युत्तरंदत्तमितितेषु यस्तोक्तंसकर्मसर्वपापानांयश्चाभ
क्तस्तेवाच्युतेति तत्संप्रमाह तदुक्तंपद्मकेन तपस्विनोदानपरायशस्विनोमनस्विनोमंत्रविदःसुमंगलाः
क्षेमंनविंदंतिविनायदर्पणंतस्मैसुभद्रश्रवसेनमोनमः अयमभिप्रायः अभक्तैर्विषयवासनावशात्स
सकामतयाकृतमपियागादिपुत्रार्थंपुत्रेष्ट्यादिविमलश्राद्धवार्षिकादिप्राप्तयेमंत्रानुष्ठानादिकंयत्किंचित्स
णयत्नकेनकर्मतत्सर्वंवासुदेवार्पणात्संसारायदुःखरूपायभवतीत्यत्रदृष्टांतः पुत्रार्थंकृतेष्ट्यनुष्ठानेतेन
नानुष्ठानेनोत्पादितः पुत्रःसोयोवाम्रतस्तत्सर्वकृतसकामकर्मणःफलेकिंचदुःखंतत्प्रथमसेवफल
तोप्रभक्तैःकृतोयोधर्मःसअधर्मोभवत्यस्मिन्नर्थेश्लोकंदिश्यते तदुक्तंनारदीयपुराणे हरिभक्तस्तुकर्मा
णानयाकर्माणिभक्तिलः भक्तिहीनानिकर्माणिनसिद्ध्यंतिद्विजोत्तमाः यथासमस्तलोकानांजीवनंस
लिलंस्मृतं यथासमस्तसिद्धीनांजीवनंभक्तिरिष्यते यथाश्मसिसमाश्रितसर्वेजीवंतिजंतवः तथाभ
क्तिंसमाश्रित्यसर्वकर्माणिसिद्ध्ये भक्तिमांल्लभतेधर्मान्सधर्मभक्तिमाप्नुयात् सभक्त्यासाध्यतेकामःस
भक्त्यामोक्षमाप्नुयात् तदानेनेतयोधिर्वायसेवाचक्रदद्दिशे भक्तिहीनैर्मंदैर्निष्ठानत्तध्वंद्वावाव्हरिः अभ

रा॰म॰
मा
२२
22

न्यायसत्यमपत्रं केवलं कायशोषणं अभक्त्या यत्कृतं चाग्नौ भस्मनि न्यस्तहव्यवत् यत्किंचित्क्रियते कर्म अश्रद्धया प्र
णमात्रकं तन्महज्जायते पुंसां श्रीहरेः प्रीतिदायकं अप्रमेयमहत्त्वं वा कर्म वेदे दितं कृतं तत्सर्वं निष्फलं प्रोक्तं
हरिभक्तिविवर्जितं हरिभक्तिः परा नृणां कामधेनूपमा स्मृता तस्यां सत्यां पिबंत्यज्ञाः संसारे गरलं बहो अभ
क्त्यापेतमनसां दानकर्मादिकं च यत् अवैहि निष्फलं सर्वं तेषां रुष्टतरो हरिः अतएव भक्तिजं नित्री ज्ञानमथ
क्तिर्मादकं रत्नृणां भक्तिहीनेन यत्किंचित्कृतं सर्वमसत्सममिति तथा च भागवते हेयो मयि परो यमी निष्फ
लाय प्रकल्पते तदा यामो निरर्थः स्याद्भयादेरिव सत्तम अयमर्थः किं बहुना धर्मस्य सत्त्वंस्य तु ति यतो हेयो
यो यो ऽर्थो लौकिको व्यायासः क्लेशमयि परमेश्वरे निष्फलाय निष्कामत्वेन अर्पितं मत्र ह्रि सचित्तशुद्धि
करो धर्म एव स्यात् अर्थे त्व दृष्टान्तः भयादेरिव यथा भयशोकादेहेतोः पलायनाक्रन्दनादिक्लेशस्तद्वदित्य
र्थः भगवत्यनर्पितं सुकृतमपि न फलतीत्येतदुक्तं गीतासु अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदि
त्युच्यते पार्थ न च तत्प्रेत्य नो इह अस्यार्थः अश्रद्धया हुतं हवनं दत्तं दानं तप्तं निर्वर्तितं तपः यच्चान्यदपि कृतं
कर्म तत्सर्वमसदित्युच्यते यतस्तत्प्रेत्य लोकान्तरे न फलति विगुणत्वात् इहापि लोके न च फलति अयश
स्करत्वात् तदुक्तं व्यासेन करोति कर्माणि तपः सुनिष्ठितो निवृत्तभोगस्तदपेक्षया ददत् पुनस्तु भूयेयम
हत्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते तदपेक्षया आराध्यापेक्षया दानादि कृते यत्किंचित् तन्न सुखाय न
कल्पते प्रत्युत दुःखायैव भवतीत्यर्थः किं च ये ऽन्ये ऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो ऽनादृतयुष्मदङ्घ्रयः अधः पतन्ति तिर्यग्योनिं प्राप्नुवन्ति किं कृत्वा ब्राह्मण
जन्म लब्ध्वा तं परं पदं प्राप्यापि यद्वा ब्रह्मलोकं प्राप्यापि अधः पतन्ति तथा च अभक्तत्वेपि ब्राह्मणाः पुनरावृत्ति २२

श्रवणादिति वचनात् तदुक्तं गीतासु आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौन्तेय पुनर्जन्म न
विद्यते ब्रह्मणो भवनं वासस्थानं ब्रह्मलोकः तत्पर्यन्ताः सर्वे लोकाः पुनरावर्तिनः पुनरावर्तनशीलाः ब्रह्मलोकस्यापि वि
नाशित्वात् तत्रस्थानामनुत्पन्नज्ञानानामवश्यंभावि पुनर्जन्म एवं क्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलो
कं प्राप्तानां तेषामेव तत्रोत्पन्नज्ञानानां ब्रह्मणा सह मोक्षो नान्येषां मामुपेत्य वर्तमानानां तु पुनर्जन्म नास्त्येवे
त्यर्थः किंच नत्वेकत्वेन वा पृथक्त्वेन च परमेश्वरं ये न भजन्ति तेषां जन्ममरणप्रवाहो दुर्वार इत्याह द्वाभ्यां त्रै
विद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि दे
वभोगान् तिस्रो विद्या अधीयते जानन्तीति त्रैविद्याः वेदत्रयोक्तकर्मपराः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा मे
वरूपं देवतान्तरमिव जानन्तोऽपि वस्तुत इन्द्रादिरूपेण मामिष्ट्वा सयज्ञशेषं सोमं पिबन्तीति सोमपाः सोमपी
तकल्मषाः सन्तः स्वर्गतिं स्वर्गं प्रति गतिं ये प्रार्थयन्ते ते पुण्यफलरूपं सुरेन्द्रस्य लोकं स्वर्गमासाद्य प्राप्य दिवि स्व
र्गे दिव्यान् उत्तमान् देवानां भोगान् अश्नन्ति भुञ्जते ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्
ति एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ते स्वर्गकामाः प्रार्थितं विपुलं स्वर्गलोकं प्रविशन्ति
पुनरप्येवमेव वेदत्रयाविहितं धर्ममनुसृताः कामकामाः भोगान्कामयमानाः यातायातं लभन्ते मद्भक्ता
स्तु मत्प्रसादेन कृतार्था भवन्तीत्याह अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां यो
गक्षेमं वहाम्यहं अनन्याः नास्ति मद्व्यतिरेकेणान्यत्काम्यं येषां तथाभूता ये जनाः मां चिन्तयन्तः सेवन्ते तेषां
नित्याभियुक्तानां सर्वदा मदेकनिष्ठानां योगं धनादिलाभं क्षेमं तत्पालनं मोक्षाख्यं च तैरप्रार्थितमप्यहमे

वदहामिश्राययामि ननु च ब्रह्मातिरेकेणावस्तुतो देवतांतरस्याभावादिंद्रादिभिर्नोपि न इज्यापवेति कथं ते नग
तागतं लभेरन् तत्राह येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं श्रद्ध
योपेताः भक्ताः संतो येपि जना अन्यदेवता इंद्रादिरूपा यजंते तेपि मामेव यजंतीति सत्यं किं त्वविधिपूर्वकं
मोक्षप्रापकविधिविना यजंति अतस्ते पुनरावर्तंते अत एव काममोहेन यत्क्रियते तत्सर्वं विगुणत्वादभक्ता
नामयशो भवतीति निश्चयस्तस्मात् श्रीरामप्रीत्यर्थं यत्कृतं तत्कर्म तदंगहीनमपि संपूर्णं भवतीत्येतदर्थं स्मृतिश्रुते
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं किंच मंत्रतस्तंत्रतश्छिद्रं
देशकालार्हवस्तुतः सर्वं करोति निश्छिद्रं रामसंकीर्तनं तव किंच इयं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः
धर्मो देशश्च कालश्च सर्वमेव यदात्मकं अयमर्थः अनया सर्वात्मकभावनया अंगहीनं कर्म संपूर्णं भवतीत्याह
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः गीतासु च ब्रह्मार्पणं ब्रह्म
हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना अयमर्थः अर्प्यतेऽनेनेत्यर्पणं जुह्वादि तदपि
ब्रह्मैवार्प्यमाणं हविरपि घृतादिकं ब्रह्मैव ब्रह्माग्निस्तस्मिन्ब्रह्मणा कर्त्रा हुतं होमः अग्निश्च कर्ता च क्रिया च ब्रह्मै
वेत्यर्थः तथा च श्रुतिः ब्रह्म तद्विश्वकर्माणि विभर्तीति सर्वं खल्विदं ब्रह्मेति यज्ञेन यज्ञमयजंत दे
वा इति एवं ब्रह्मण्येव कर्मात्मके समाधिश्चित्तैकाग्र्यं यस्य तेन ब्रह्मैव गंतव्यं प्राप्यं न फलांतरमित्यर्थः तथा
च श्रुतिः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीति ऋग्वेदे ब्रह्मेदं तत्त्वमिमे लोका इमे देवा इमानि भूतानी
दं सर्वं यदयमात्मेति यजुर्वेदे गीतासु अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुत २३

मित्यादि भागवतेच देशःकालःपृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः इत्यादिनावह्न्यो
क्तत्वात् अलमतिप्रसंगेन अनेनाभिप्रायेणभक्तस्यनिष्कामस्यानुष्ठितकर्मसंपूर्णंभवतीत्यर्थः श्रीरामकेशवकृष्ण
शौरेहरेच्युतानंतश्रीनाथवामनवराहपरात्परात्मन् गोपीपतेपतितपावनविश्वनाथसंसारकारणमहंकरुणैकद
राशु इतिश्रीरामनाममाहात्म्येतिस्रःतिहासपुराणेकेषुश्रुतमासमविरचितेमप्रथमप्रकरणं ७ एवंतावत्सप्तम
सप्तमप्रकरणायोर्वैस्वमहिमापूर्वकंवैष्णवधर्मानुष्ठानिष्कामभक्तस्यमुक्तिप्रकारंदर्शयित्वाऽस्त्रानीरामनामकी
र्तनश्रवणस्मरणमाहात्म्यंदर्शयन् भगवतेनमस्कारोति यत्कीर्तनेयच्छ्रवणेयदर्हणेयद्वंदनेयत्स्मरणेयद्वी
क्षणे लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः प्रह्लादःश्रवणंकीर्तनंविष्णोःस्मरणंपाद
सेवनं अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं इतिपुंसार्पितानविष्णौभक्तिश्चेन्नवलक्षणाः क्रियतेभगवत्यद्धा
तन्मन्येधीतमुत्तमं एतेनैवभिन्नैर्वानानाकेवलमासीदित्याह विष्णोःश्रवणेपरीक्षिदभवद्वैयासकिःकीर्त
ने प्रह्लादःस्मरणेतदंघ्रिभजनेलक्ष्मीःपृथुःपूजने अक्रूरस्त्वभिवंदनेकपिपतिर्दास्येचसख्येर्जुनः शेषास्त्वा
मनिवेदनेबलिरभूत्कैवल्यमेषांफलं कीर्तनाद्यैकैकंलोकानांपापापहृत्यकरंभवति किंचवक्ष्यमाणेस्वाणीम
र्थः किंच अधमाजातिहीनाअपिभगवद्भक्ताःशुध्यंतीत्याह किरातहूणांध्रपुल्कसाआभीरकंकायव
नाःखसादयः येन्येचपापायदुपाश्रयाश्रयाःशुध्यंति तस्मैप्रभविष्णवेनमः यदुपाश्रयाश्रयाःशुध्यंति
तस्मैप्रभविष्णवेनमः यदुपाश्रयाश्रयाः यस्यविष्णोर्भक्तास्तेषामाश्रयोयेषांतेयदुपाश्रयाः यद्भक्तसा
मीप्यवर्तमानाः शुध्यंति यतः अतस्तवासुदेवस्यकृपाप्रसादंप्रार्थयते श्रियःपतिर्यज्ञपतिःप्रजापतिः

रा॰म॰
ना॰
२४

२५

धरापतिर्लोकपतिः पतिर्गतिश्चांथकस्मिस्मिन्वनासे सेज्ञऋषीणामृषभः प्रसीदतां कृपयाप्रसन्नो भवति
त्यर्थः इत्यादिवाक्यैः श्रीरामभजनेनामकीर्तनादौ प्रवृत्तिमुक्ता इदानीं श्रीरामनामकीर्तनमहात्म्यं तो
तितदुक्तं ब्रह्मनारदसंवादेन ब्रह्मांडपुराणे तत्र तत्र उवाच एकदा विचरन्नारदो योगी परानुग्रहवांछया
पर्यटन्सकलांल्लोकान्ब्रह्मलोकमुपागमत् तत्र दृष्ट्वा मूर्तिमद्भिश्छंदोभिः परिवेष्टिते मार्कंडेयादिमु
निभिः स्तूयमानं स्वयंभुवं चचतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं प्रणम्य दंडवद्भक्त्या तुष्टाव मुनिपुं
गवः प्रणम्य दंडवद्भक्त्या तुष्टाव मुनिपुंगवः प्रसन्नस्तं मुनिं प्राह स्वयंभुर्वेदवित्तमः किं प्रष्टुकामस्त्व
मसितद्व्रूमि ते मुने इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् त्वत्तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभं
इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रहो मयि नारद उवाच प्राप्ते कलियु
गे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः परापवादनिरताः परद्रव्याभि
लाषिणः परस्त्रीसक्तमनसः परहिंसापरायणाः देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः मातापितृ
गुरुद्वेषाः स्त्रीदेवाः कामकिंकराः विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः धनार्जनार्थमभ्यस्तविद्याम
दविमोहिताः त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागकारिणः त
द्वच्छूद्राश्च ये केचिद्विहिते भक्तिः पराङ्मुखाः स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः श्वशुरद्रोहकारिण्यो
भविष्यंति कलौ युगे एतेषां नष्टबुद्धीनां परलोकः कथं भवेत् इति चिंताकुले चित्ते जायते मम सेतते तदु
पायं जगन्नाथ प्रब्रवक्तुमर्हसि ब्रह्मोवाच साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरं पुरा त्रिपुरहंतारं पा २४

वंतीभक्तवत्सले श्रीरामतत्वंविज्ञातुंसापप्रच्छविनयान्विता: पार्वत्युवाच नमस्तेस्तुमहादेवकैलासगिरिवा
सिने सर्वेषामुपकारार्थंमोक्षमार्गप्रदर्शकः श्रीमहादेवउवाच रामचंद्रस्यमाहात्म्यंयदुक्तंविस्त
रेण नत्सर्वैकथयिष्यामिशृणुएककल्याणदायिनी सर्वेश्वरःसर्वमयःसर्वभक्तहितेरतः सर्वेषा
मुपकारायसाकारोभवन्निराकृतिः सभक्तवत्सलोलोकेसंसारेवक्ष्यचेष्टत यदायदाहिभक्तानाम
मनुग्रहेतेतदा तत्तद्रूपविधातायतत्तद्रूपोयजायत: मत्स्यकूर्मवराहादिरूपेणपरमार्थंकृत
ततकालेषुसंभवन्सर्वेषामुपाकरोत् सापन्नानाशरण्यानांयकानांभक्तानांवत्सलः उपकर्तुंनि
राकारःप्रकारेणप्रजायत अजोप्युत्पन्नानेतःशांतोभवत्सनातनः कदाचिद्देवतीर्थेयंभक्ता
नामनुकंपया दीनानाथोदेवदेवशोलक्ष्मीनारायणोविभौ सशेषशायीसुचक्राभ्यांदेवैर्ब्रह्मादिभिःसह
त्रेतायुगेदाशरथिर्भूत्वानारायणोभुवि शेषोभवल्लक्ष्मणोलक्ष्मीर्जानकीशंखचक्रके जातोभरत
शत्रुघ्नौदेवाःसर्वेपिवानराः वभूवुरेवंसर्वेपिदेवर्षिभयसंगतेयु तत्रनारायणोदेवःश्रीरामइतिवि
श्रुतः सर्वलोकोपकारायभूमौसोयमुपाविशत् ध्यानमात्रेणयोदेवोमहापातकनाशकृत् की
र्तनश्रवणाभ्यांचहत्याकोटिनिवारणः कलौसंकीर्तनादेवसर्वपापक्षयोभवेत् इति श्रीरामरामरामेति
येवदंत्यपिपापिनः पापकोटिसहस्रेभ्यस्तानुद्धरतिनान्यथा ॐनमोभगवतेतुभ्यंरामायपरमा
त्मने रामोराजाधिराजायपंचाशद्वर्णरूपिणे नमोविद्याधिराजायश्रीवाग्पतेनमः नमोवेदाधि

राज्ञायज्योतिषांपतयेनमः क्षीराब्धिमध्यसंस्थायनमोनारायणायच सहस्रशिरसेतुभ्यंसहस्राक्षाय
तेनमः सहस्रशीर्षापुरुषइति विश्वतस्त्वस्तरितादिश्रुते नमःसहस्रहस्तायसहस्रचरणायते नमो
जीमूतवर्णायनमस्तेविश्वतोमुखः अनंतायनमस्तुभ्यंनमस्तेशेषशायिने नमोहिरण्यगर्भायपंचभू
तात्मनेनमः नमोमूलप्रकृतयेदेवानांहितकारिणे नमस्तेसर्वलोकेशसर्वदुःखनिषूदनशंखच
क्रगदायपद्मजटामुकुटधारिणे नमोगर्भायतत्त्वायज्योतिषांज्योतिषेनमः ॐनमोवासुदेवायनमोद
शरथात्मज रत्नाकुचायराजेन्द्रसर्वसंपत्प्रदायकः नमःकारुण्यरूपायविश्वामित्रप्रियायते नमो
दान्तायशान्तायकैकेयाःप्रियकारिणे यज्ञेशायनमस्तुभ्यंनमस्तेक्रतुपालकः यज्ञभोक्त्रेकेशवायन
मोरामायशार्ङ्गिणे नमस्तेरामचंद्रायमाधवायश्रियःपते गोविंदायनमस्तुभ्यंनमस्तेपरमात्मने न
मस्तेरघुनाथायनमोविष्णुस्वरूपिणे श्रीमन्नाथायनाथायनमस्तेमधुसूदन त्रिविक्रमनमस्तेस्तु
सीतायाःपतयेनमः वामनायनमस्तुभ्यंनमस्तेराघवायच नमोनमःश्रीधरायजानकीवल्लभायच
नमस्तेस्तुहृषीकेशकंदर्पायनमोनमः नमस्तेपद्मनाभायकौसल्याहर्षकारिणे नमोनमस्तेका
कुत्स्थनमोदामोदरायच विभीषणपरित्रात्रेनमःसंकर्षणायच वासुदेवनमस्तुभ्यंनमस्ते
शंकरप्रिय प्रद्युम्नायनमस्तुभ्यमनिरुद्धनमोस्तुते सदसद्भक्तरूपायनमस्तेपुरुषोत्तम
अधोक्षजनमस्तेस्तुसप्ततालहरायच खरदूषणहंत्रेचनृसिंहायनमोनमः अच्युताय

नमस्तुभ्यं नमस्तेस्तु वंधन जनार्दन नमस्तेस्तु नमोस्तु मखरक्षाय उपेंद्रायेंद्रवंद्याय मारीचमथनाय च नमोवा
लिप्रहर्त्रे नमः सुग्रीवराज्यदः जामदग्न्यमहादर्पहराय हरये नमः नमोक्षमलेष्टत्वाय नमस्ते भरताग्रज
नमस्ते पितृभक्ताय नमः सौमित्रपूर्वज अयोध्याधिपते तुभ्यं नमः शत्रुघ्नसेवित नमो वेदांतवेद्याय ब्रह्मा
दिमुनिसेवित नमो विश्वाय वृआदित्यानंतरूपिणे अद्वैतब्रह्मरूपाय ज्ञानगम्याय ते नमः नमो योगारहस्स
यस्थवार्णाज्योतिषे नमः अष्टोत्तरशतेनाम रामचंद्रस्य पावनं ये पठिष्यंति लोके प्राणिनः दृष्टवशापदा
तस्य कीर्तनमात्रेण जनायास्यंति सद्गतिं तावद्विजृंभिते पापं ब्रह्महत्यापुरःसरं यावन्नामाष्टकशतं पुरुषे
न हि कीर्तितं तावत्कालेमहोत्साहा निःशंकसंभ्रमं त्विते यावच्छ्रीरामचंद्रस्य शतेनाम न कीर्तितं तावद्यमभ
टाः क्रूराः संचरिष्यंति निर्भयाः यावच्छ्रीरामचंद्रस्य शतेनाम न कीर्तितं तावत्सर्वरूपं रामस्य दुर्ज्ञेयं प्राणि
नां खलु यावच्छ्रीरामचंद्रस्य शतेनाम न कीर्तितं अतिगुह्यमिदं श्रीराममाहात्म्यं अनेन अन्यतः श्रुणुयान्म
र्त्यो मोचिर्मुक्तपातकान् ब्रह्महत्यादिपापानि तिष्ठंति यस्य वोढ्विति रामलोकं भाषमात्रे पठितो नाम च येन तेन
रः ३ः प्रतियहदुर्भाग्य दुराला पादिसंभवं पापं सकृत्कीर्तनेन रामस्तोत्रविनाशयेत् स्कंदिस्मृतिपुराणे
तिहासागमशास्त्राणि वयस्यहैन्निनात्मा श्रीरामनामकीर्तनः कृत्स्नानपि नाप्नुयेरण्यवरिला पितवित्तवृत्ति वैकुं
ठनाथपरमस्वजातिहारीन् गोपालपालसहस्राणि शताशोहमनुभवतः शरणागतोस्मि इति श्रीरामना
ममहात्म्यं स्कंदपुराणे तिहासोक्तं अनुतापमविरचिते अष्टमप्रकरणं ॥ ८ ॥ शुद्धकं ब्रह्मनारदं प्रतिनिवेव
पद्मपुराणे तिश्रीमहेदव्यासोभीप्रति श्रीरामनामाष्टोत्तरशतमाहात्म्यं निरूपितवान् श्रीवेदव्यास उवाच

रा॰ म॰ शृणु गांगेय वक्ष्यामि रामस्याद्भुतकर्मणः नामाष्टकशतं पुण्यं महापातकनाशनं नातःपरतरं किंचित्त्रिषु लो
ना॰ केषु गीयते कैलासशिखरे रम्ये विश्रमाराध्य शंकरः उपविष्टस्ततो भोक्तुं पार्वतीं शंकरोऽब्रवीत् पार्वत्येहि म
२९ या सार्द्धं भोक्तुं भुवनवंदिते तमाह पार्वती देवी जप्यानामसहस्रकं ततो भोक्ष्यामहे देव भुज्यतां भवता प्रभो
26 ततस्तां पार्वतीं प्राह प्रसन्नः परमेश्वरः धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वती दुर्लभा वैष्णवी भक्ति
र्भाग्यैर्येयं विनेश्वरि रकारादीनि नामानि शृण्वतो मम पार्वति मनः प्रसन्नतामेति रामनामाभिशंकया
रमंते योगिनो यत्र सत्यानंदे चिदात्मनि इति रामपदेनासौ परंब्रह्माभिधीयते राम रामेति रामेति रामेति
रमे रामे मनोरमे सहस्रनाम तत्तुल्यं रामनाम वरानने यस्मादेवं तस्मात् रामेत्युक्ता महादेवि भुक्त्वा
सार्द्धं मया पुनः ततो रामेति नामोक्ता सह भोक्ता च पार्वती पप्रच्छ श्रीमहादेवं भक्तिश्रवणमानसा सह
स्रनाम तत्तुल्यं रामनाम त्वयोदितं तस्यापराणि नामानि संचिंतेद्द्रावणद्विषः कथ्यंतां मम देवेश यत्र
मे प्रीतिरुत्तमा श्रीमहादेव उवाच शृणु नामानि वक्ष्यामि रामभद्रस्य पार्वति लौकिका वैदिकाः शब्दा
ये केचित्संति पार्वति नामानि रामचंद्रस्य सहस्रं तेषु चाधिकं तथा च बृहदारण्यकश्रुतिः त्वमेव हि स
र्वाणि नामानि बिभर्तीति इति तेषु चानंतनाम्नोऽहि नाम्नामष्टोत्तरं शतं विष्णोरेकैकनामैव सर्ववेदा
धिकं मतं तादृङ्नामसहस्रेण रामनाम समं मतं जपतः सर्ववेदाश्च सर्वमंत्राश्च पार्वति तस्मात्कोटि
गुणं पुण्यं रामनाम्नैव लभ्यते अथ तत्र प्यादिकृतानामान्याह श्रीरामो रामभद्रश्च रामचंद्रश्च शाश्व
तः राजीवलोचनः श्रीमान् राजेंद्रो रघुपुंगवः जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः विश्वामित्रप्रियो २९

दांतः शरणत्राणतत्परः वालिप्रमथनो वाग्मी सत्यवाक्सत्यविक्रमः सत्यव्रतो व्रतधरः सदा हनुमदाश्रयः
कौशलेयः खरध्वंसी विराधवधपंडितः विभीषणपरित्राता दशग्रीवशिरोहरः सप्ततालप्रभेत्ता च हर
कोदंडखंडनः जामदग्न्यमहादर्पदलनस्ताडकांतकृत् वेदांतसारो वेदात्मा भवरोगचिकित्सकः दू
षणत्रिशिरोहंता त्रिमूर्तिस्त्रिगुणात्मवान् त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः त्रिलोकरक्षको
धन्वी दंडकारण्यपुण्यकृत् अहल्यापावनश्चैव पितृभक्तो वरप्रदः जितेंद्रियो जितक्रोधो जितामित्रो ज
गद्गुरुः ऋक्षवानरसंघाती चित्रकूटसमाश्रय जयंतत्राणवरदः सुमित्रापुत्रसेवितः सर्वदेवाधिदेवश्च
मृतवानरजीवन मायामारीचहंता च महाभोगो महाभुजः सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसत
मः महायोगी महोदारः सुग्रीवराज्यदायकः सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसत्तमः महायोगीम
होदारः सुग्रीवराज्यदायकः सर्वपुण्याधिकफलः स्मृतः सर्वाघनाशनः आदिपुरुषो महापुरुषः
परमः पुरुषस्तथा पुण्योदयो दयासारः पुराणपुरुषोत्तमः स्मितवक्त्रो मितभाषी पूर्वभाषी च राघ
वः अनंतगुणगंभीरो धीरोदात्तगुणोत्तमः मायामानुषचारित्रो महादेवादिभिपूजितः सेतुकृज्जि
तवारीशः सर्वतीर्थमयो विभुः श्यामांगः सुंदरः पीतवासा धनुर्धरः सर्वयज्ञाधिपो यज्वा जरामर
णवर्जितः शिवलिंगप्रतिष्ठाता सर्वावगुणवर्जितः परमात्मा परब्रह्म सच्चिदानंदविग्रहः परं
ज्योतिः परंधामः परंधामः परमात्मा परात्परः पारेशः पारगः पारः सर्वदेवात्मकः शिवः इति श्रीरामचं
द्रस्य नाम्नामष्टोत्तरशतं गुह्याद्गुह्यतमं देवि तव प्रीत्या प्रकीर्तितं अतिरहस्यादनसे मया पूर्वं मोकेमिस

रा॰ म॰
ना॰
२७
27

थैः यः पठेत्कृपया ह्यापि भक्तियुक्तेन चेतसा स सर्वैर्मुच्यते पापैर्जन्मकोटिसमुद्भवैः जलानि स्थलतां यांति श
त्रवो यांति मित्रतां राजानो दासतां यांति वह्नयो यांति शीततां अनुकूलं च भूतानि स्थैर्यं यांति समाश्रिता
अनुग्रहं ग्रहा यांति नाशमायांत्युपद्रवाः यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं यः पठेद्रामचंद्रस्य ना
म्नामष्टोत्तरं शतं ज्ञानेनापि कुर्वाणो नरः पापैः प्रमुच्यते कोटिकल्पसहस्राणि कल्पकोटिशतानि च
वैकुंठे वासमाप्नोति दश पूर्वैर्दशापरैः रामं दूर्वादलश्यामं पद्माक्षं पीतवाससं स्तुवंति नामभिर्दि
व्यैर्न ते संसारिणो नराः वदंति दिव्यानि नामानि रामाय रामभद्राय रामभद्राय वेधसे रघुनाथाय नाथा
थाय सीतायाः पतये नमः तथा च श्रुतिः यः पठन्तारकं ब्रह्म नित्यमधीते स पाप्मानं तरति सोऽमृतत्वं
च गच्छतीति इमं मंत्रं महादेव विजपन्नेव दिवानिशं सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् इती
दं रामचंद्रस्य नाम्नामष्टोत्तरं शतं कथितं तव गांगेय यत्नं वै स्मरतोन्नमः इति पद्मपुराणोक्तं पूर्वं
श्रीशंकरं प्रति पार्वत्या एवमुक्तं यदि श्रीरामस्मरणं बह्वृचः सहस्रनामध्येयिकान्यन्यानि नामानि
संति चेत्तर्हि संप्रति ब्रूहि तदर्थमष्टोत्तरशतनामान्युक्तानि दुर्दानीं तेषु वरा मध्ये तत्र नाम्नां महात्म्यं ब्रह्मा
एकादश्युपवासेन जनस्य कथं मोक्षो भवतीति संशयापन्न यमधर्मं प्रमाह तदुक्तं नारदीयपुराणे
किमाश्चर्यं त्वया दृष्टं कथं वा विघ्नसंभवात् सहस्रोपि त्वया प्राप्तः मनापो मरणाधिकः यस्योच्चारण
मात्रेण प्राप्ते परमे पदे न मम पापकस्य सौरे न गच्छंति हरेर्दिने किंच यन्नामसंस्कारमात्रेण पुनर्भवत्रोपा
षणं न भवतीति किमु वक्तव्यमित्याह एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः दशाश्व २७

मेधीप्रुनरेलिज्ञन्मकृत्स्प्रणामीनपुनाभवाय म्र्यंसाव: प्रणाममइतियतस्युन्तुकृत्सायनमइति पंचाद्स्त्त्रात्म
कपट्कीर्त्तनमात्रमिमर्थः कृतदेवेण किंतस्य किंकाल्मपारेवयाचर्तिं जिह्वाग्रेवर्त्तेनेयस्यहरि ० वा
णाणस्योक्तरुदेवै नैमिषेषु पुष्करेतथा सम्यक्तेनयेनोक्तंहरि ० गवांकोटिसहस्राणिकन्यादानपुत्रा
मिच दत्तानितेनयेनोक्तंहरि ० ऋग्वेदोहियजुर्वेदः सामवेदोप्यथर्वणः अधीतास्तेनयेनोक्तंहरि ०
जितंतेनजितंतेनजितंतेनसुनिश्चितं जिह्वाग्रेवर्त्ततेयस्यहरि ० नगंगानगयाकाशीनसेतुनचपुष्क
र जिह्वाग्रेवर्त्ततेयस्यहरि ० अश्वमेधादिभिर्यज्ञैर्नरमेधैः सदक्षिणैः याजितंयेनयेनोक्तंहरि प
वेमतंतेयस्यनामसंकीर्त्तनमतएव सर्वेषामेवदेवानामादिस्तुमधुसूदनः मधुसूदनभक्तानानिग्र
हेनोपपद्यते हरिनामसामर्थ्यंदर्शयति ब्राह्मणस्यपचीभुजन्विष्णोश्चारजस्वलां यद्यप्यन्त्य
यापन्नंमरणेहरिमुच्चरेत मरणेहरिमुच्चरेहित्वानेनेदमुक्तंभवति यदावस्तोच्चारेमुक्तिस्तदासा
वधानत्वेकिंपुनरिति अगम्यागमनयोजातेविहायत्वच्यसंचये प्रयातिविष्णुसायुज्यंविमुक्तोभव
बंधनात् यस्योच्चारेणवैमोदः कथामस्याउपोषणे यत्रसर्गीयतेभक्त्यावेद्यतेपुरुषोत्तमः यत्रसर्गी
यतइत्यनेनकिमुक्तं यस्मिन्नेकादश्युपवासदिनेश्रीकृष्णोगायतइत्यर्थः लीलयातस्यचरेद्देवंस्पृशांव
चापिजनार्दनं गंगाभोयुगपुण्येपतेसमतासनरः मियात् इतिनारदीयब्रह्मवचनात् इदानींशिववि
ष्णुनाम्नायुगपदुच्चारेणानुनेकर्मसंपूर्णंभवतीत्याह योरौद्रेपरिकीर्त्तेयेन्नेपिहरिकर्माणिसंपूर्णता
नस्यायांतिशिवस्वनामवदनोमुक्तिप्रदःस्यात इव अज्ञानादपिवुद्धिपूर्वंमनिष्पातन्नायतेकिंपुनर्मे

ना॰ म॰
ना
२८
28

क्लिः स्यादितिसत्यमेवेदवचनंवक्ष्यामि किंशास्त्रेण॥ विष्णोर्नाममन्त्रकेशवाच्युतहरेगोविंदद्दामोदरप्रद्युम्नेतिसम्
च्चरेतममनिशंतेनोवाधतेयंकिलः हृदेशानमहेश्वरेश्वरशिवेत्युच्चैर्लपंतेतथापीचेपातकपतितोविटपिनेस
क्रैवधातंजसो अयमर्थः यःपुमानोद्वंद्वस्तनामहरिंहरेनामकीर्त्तयति तस्यकर्माणिकर्मानुष्ठानका
लेसंवतंत्रेतोनश्यंतातिसंशयानिभवंति ततश्चनामसंकीर्त्तनात् उभावपिहरिहरौनामस्मरणातोपुंसामुक्तिद
दतः इदंनअन्नानादेवज्ञानाजननामगायतोमुक्तिर्भवति इति किंवक्तव्यंतेषांकलिश्रुत्वाधतेनहृहलक्षण
वृत्तपातकलक्षणाः पतिताःस्तकाउड्डीयगच्छंतितद्वृद्धेपातकानिनश्यंतीतिश्लोकद्वयेस्यार्थः इतिसूतव
चनात् पूर्वनारदीयपुराणे हरिशीर्षयतइत्युक्तं स्वतसंहितायामपितद्गायते किंपुनरित्युक्तंपद्मपुराणेपि
हरिनामकीर्त्तनेकर्त्तव्यमिति बहवोक्तमतोब्राह्मणादीनांमानंश्रुतिस्मृतिपुराणेषूक्तंदर्शयति तद्देवोक्तं
नारदपंचरात्रे एवमेवंमापतिंस्तगीताद्यैर्विभुमर्हयेत् तदेवोक्तंविष्णुस्तोतानिममाराधनंविष्णोर्ध्याने
होमेजपस्तथा तत्कथाश्रवणंचैवतन्नामस्तुप्रकीर्तने तत्पादकीर्थसेवाचतन्निवेदितभोजने प्रणाम
स्तपुरतोनर्तनेगीतवादनमिति वसिष्ठस्तंतेःविपदेस्यत्रिस्त्रतोवाधकमाह केशवाग्रेनृत्यगीतंनक
रोतिदिनेदिने वह्निनाकिंनदग्धोसौगातः किंतस्यसानलं कृष्णाग्रेनृत्यगीतादिद्विजःस्वाभाविकेचरेत् स्वा
भाविकेनभगवान्प्रीणातीत्याहशौनकः बृहन्नारदीयेच प्राप्तायामेकादश्यांयेषांकलेजागरणंविना तेविन
ष्टानसंदेहोयस्माज्जीवितमध्रुवं तस्मिन्जागरणेविप्रोगीतनृत्यंचकारयेत् वाचकेसतिविप्रेंद्राःपुराण
श्रवणाभ्यांविशिष्टा यःपुनःकुरुतेगीतंनृत्यंजागरणेहरेः सवसेच्चिरवैकुंठेपितृभिःसहमुक्तरासंमतिंप्रयच्छतेय २८

स्नहरिजागरणंप्रति षष्टिवर्षसहस्राणि श्वेतद्वीपे वसेन्नरः एकादश्युपात्तयो भुंक्ते निष्कृतिर्नास्य कुत्रचित्
महापातकयुक्तो वा युक्तो वा सर्वपातकैः एकादश्यां निराहारः स्थित्वा याति परं पदं गीतवाद्यं च नृत्यं च पु
राणपठनं तथा येन कृतानि विप्रेन्द्र दुर्लभो न जनार्दनः वसिष्ठ उवाच येन मठीकृतसमैर्दिभैः पूजयेन्मधुहषा
त्रमे सर्करायेन नंसंयुक्तमश्यान्नं निवेदयेत् दीपैर्नीराजनं कुर्याद्दशोत्तरसहस्रकः गीतं नृत्यं च वाद्यं च कु
र्यात्कुम्भकरं तथा विष्णोर्नैवेद्यकेनिसक्तेन प्रसंवं तद्ददयावच्चूतं होमप्रोक्तं समाप्याथ ब्राह्मणान्भोजयेत्ततः
स्वकृतस्मोकः विभो वासुदेवेश संसारपारप्रभो याद्द्वाधीश्वरानेन प्रार्थयेत् मुरारे मुरारे सुरारे भवारे नमः
कल्मषारे सदा पाहि माघं इति श्रीरामनाममहात्म्ये श्रीतिस्रति पुराणेतिहासोक्ते च श्रुताश्रमधिरचितेन
वसेप्रकरणं ४ एवं प्रकरणे महापातकयुक्तो वा चोपपातकैः एकादश्यां निराहारः स्थित्वा याति परं पदे
एकादश्यां तु यो भुंक्ते निष्कृतिर्नास्ति कुत्रचित् इत्युक्तमतस्तस्य एकादशीव्रतनिर्णय उच्यते परमापदमा
पन्नो हर्षे वा समुपस्थिते नैकादशीं त्यजेद्विद्वान्यस्य दीक्षास्ति वैष्णवी समात्मा सर्वजीवेषु भिन्नाचारादविस्मृता
विष्णुर्पितापिखिलाचारः स हि वैष्णव उच्यते अविद्धैकादशीसक्तो विष्णुधर्मविधायकः विष्णुमंत्रोपदिष्टस्तु स
हि वैष्णव उच्यते इति वैष्णवलक्षणमुक्तं दशम्येकादशीसंयुक्तो यदि स्याद्दरुणोदयः नैवोपोष्यं वैष्णवेन तत्र हि नैका
दशीव्रतं सम्पूर्णैकादशी यत्र द्वादशी विद्धिगामिनी द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणं एकादशी भवेत्स
र्णापरतो द्वादशी यदि एकादशी भवेत्पूर्णापरतो द्वादशी यदि एकादशीं परित्यज्य द्वादशीं समुपोषयेत्
अरुणोदयवेलायां दशमी यदि संगता संपूर्णैकादशीं तां तु मोहिन्यै दत्तवान्विभुः उदयात्प्राक्त्रिघटिका वा

यिनैकादशीयदा संदिग्धैकादशीनामवर्ज्येयं धर्मकोविदैः उदयात्प्राक्मुहूर्त्तेनव्यापिन्येकादशीयदा संयुते
कादशीनामवर्ज्येयं वैष्णवैस्सदा लववेधेन विप्रेन्द्र दशम्येकादशीयदि तदाह्यैकादशीं त्यक्त्वा द्वादशीं समु
पोषयेत् तथाचगारुडपुराणे अरुणोदयवेलायां दशमीयदिसंगता रविचक्रार्द्धमात्रापि द्वादश्यामुप
वासयेत् तत्रक्रतुशतं पुण्यं त्रयोदश्यां तु पारणे पुत्रराज्यसमृद्ध्यर्थं द्वादशीमुपवासयेत् तत्रप्रोक्तं
महापुण्यं त्रयोदश्यां तु पारणे आदित्योदयवेलायामारभ्यषष्टिनाडिकाः संकीर्णैकादशीनामतस्यां
विष्णुसदीहितैः पुराणान्तरेच दशमीशेषसंयुक्तो यदिस्यादरुणोदयः वैष्णवेन न कर्त्तव्यं तद्दिनैकाद
शीव्रतं द्वादशीदशमीविद्धा गान्धार्या समुपोषिता तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् अर्द्धरात्रे
पि केषांचिद्दशम्यावेध इष्यते अरुणोदयवेलायां नावकाशो विचारणे केन च तस्मैकादशी न कर्त
व्येति वदन्ति तत्रोत्तरं गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि
इति गृहिणामुभयैकादश्युपवासश्रवणात् किंच यदुक्तं विष्णुनावासं पुत्रान्सपत्नमात्मनः एकाद
शीमुपवसेत्पक्षयोरुभयोरपि इति विष्णुरहस्ये तथाच तत्त्वसागरे सपुत्रश्च सभार्यश्च स्वजनैर्भक्ति
संयुतः शुक्लां कृष्णां सदोपोष्य गृही स्वगृहसंस्थितः यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा न
स्य तमननेय स्तत्सर्वैवैष्णवउच्यते तथाच विष्णुधर्मोत्तरे एकादश्यां तु कृष्णायामुपोष्य विधिवन्न
रः पुत्रमायुः समृद्धिं च सायुज्यं च समश्नुते सब्रह्महा सुरापश्च कृतघ्नो गुरुतल्पगः विवेचयति
योमोहादेकादश्योः सितासिते विष्णुरहस्ये नश्यावेन पिबेन्नायेन वोदेत्कूर्मसूकरो एकादश्यां न २९

भेतीनपततोरुभयोरपि इतीति वेयथ्यवणात्इतिरहस्याविषयकंज्ञातव्यं एतदर्थेम्याख्यानमस्ति स्कं
दपुराणेहारकेमाहात्म्ये मार्कंडेयउवाच शृणुराजन्प्रवक्ष्यामिकथांपापप्रनाशनी श्रुत्वायांमुच्यते
नूनंदुःखसंसारबंधनैः अवंतीविषयेपूर्वंब्राह्मणोवेदपारगः चंद्रशर्मेतिविख्यातःशिवभक्तःसदा
नृप मनसाकर्मणावाचानान्यंध्यायेच्छिवंविना शैवाद्व्रतद्व्रतेनान्यन्नरकोतिनराधिप नोपवासेह
रिदिनेकुरुतेनव्रतंहरे विनाचतुर्दशीराजवृत्रान्यदेनसमुद्भवं यत्रयत्रशिवक्षेत्रंयत्रतीर्थंनशंकरे त
त्रगच्छतिराजेंद्रवैष्णवंगच्छतेनहि प्रतिवर्षंकुरुतेतत्रसोमनाथस्यदर्शनं नजहातिविशेषेणसोमपार्श्वेन
रेश्वर एवंचकुर्वतस्तस्यनवबर्षाणिसमृतिः गतानितस्यराजेंद्रशिवभक्तिप्रकुर्वतः कदाचित्सोमशर्मा
नगतोसौसोमनाथके नानादेशान्महीपालतसंख्यानागमानवः गताःकृसपुरीसर्वेदृष्टासोमेश्वरं वि
भुं आहूतस्तैश्चंद्रशर्मानगतोहारकांपुरी वैष्णवैर्बहुदभ्रुश्चस्त्कातुर्लभाकृसमसन्निधा सावोचितापिसज
नैर्नगतोहारकांपुरी शिवक्षेत्रात्परंतीर्थंनास्तिमन्येजगत्त्रये नात्योदेवोमयाज्ञातोरीश्वराद्देवनायकात्
विनाचैवचंद्रशर्मागतान्येहारकांपुरी अन्यस्मिन्दिवसेराजन्नाच्छतःस्वगृहंप्रति चक्षुषोर्दर्शनेस्वंभेव
द्रशर्मपितामहाः प्रेतरूपामहाकायाःसत्त्वामातीवभीषणा दृष्ट्वासप्रेममहारौद्राभीतोसाध्यप्रकंपितः चं
द्रशर्माउवाच केयूयंविकृताकाराःनेत्रंनाचभयावहाः पृथ्वीसमेवजीवानहृष्टानश्रुतामया प्रेता
ऊचुः माभयंकुरुविप्रेंद्रतवपूर्वपितामहा आयातास्त्वत्समीपेतमहद्दुःखेनपीडिताः चंद्रशर्माउवा
च श्रुत्वंदतेनयपत्नश्चभवद्भिर्मेपितामहैः प्रेतत्वेकारणंकिंस्याद्भवतांविस्मयोमम प्रेताऊचुः श्रणुवत्स

राम. मा. ३. 30

प्रवक्ष्यामि प्रेतयोनेस्तु कारणं वासरे वासुदेवस्य सदा विद्धे कृते पुरा प्रेतत्वं तेन संप्राप्तमस्माभिः पुत्रसत्तम वि
शेषेण कृते राज्ञौ सविद्धे जागरे हरेः पतनं नरके घोरे भविष्यति न संशयः त्वया सह न संदेहो यावदाभूत
संप्लवे पुनस्त्वं च विशेषेण शिवभक्तिबलाश्रितः न कृता केशवे भक्तिर्न कृतं वासरं हरेः चंद्रशर्मा उवाच
संतोषितो मया देवो भक्त्या त्रिपुरनाशनः प्रदास्यति मतिं नूनं प्रेतत्वं नाशयिष्यति प्रेता ऊचुः हरिभक्ति
विहीनानां द्वादशीव्रतवर्जितः नाशं नायाति प्रेतत्वं पूजितैः शंकरादिभिः प्रायश्चित्तं विना विप्र द्वादशी
व्रतजे कृते पापेन गच्छते नूनं प्रेतत्वं नैव गच्छति प्रायश्चित्ती सदा विप्रः पूज्यमाने च शंकरे विना केशवपू
जितैः शंकरादिभिः प्रायश्चित्तं विना विप्र द्वादशीव्रतजे कृते पापेन गच्छते नूनं प्रेतत्वं नैव गच्छति प्रा
यश्चित्ती सदा विप्रः पूज्यमाने च शंकरे विना केशवपूजां वै पापं भवति गौरवं प्रथमे केशवः पूज्यः प
श्चाद्देवो महेश्वरः पूजनीयो महाभक्त्या ये चान्ये संति देवताः मूलाच्छाखाः प्रशाखाश्च भवंति वशगास्ततः
वासुदेवात्समुद्भूतं जगदेतच्चराचरं तस्मात्सर्वं परित्यज्य शाखां नैवार्चयेद्बुधः विष्णुर्येन जगन्नाथ
त्रैलोक्याधिपतिः प्रभुः तद्दिने येन ऊर्वंति सम्यग्देवसशोधिते सशल्यं तेन संदेहः प्रेतत्वं याति पुत्रकः
न पूज्या भक्ष्यते येषां भास्करी च पितामही प्रेतत्वं ये च ऊर्वंति सशल्यं वासरे हरेः अग्राह्यं हि भवति निर्माल्यं
पत्रं पुष्पं फलं जलं वासुदेवशिलासंगात्सर्वं याति पवित्रतां वैष्णवस्य तृतीयां च पूर्वविद्धां करोति यः
द्वयं देवा न गृह्णंति कव्यं नैव पितामहाः यत्र देवा न गृह्णंति कव्यं यत्र पितामहाः तस्मान्न कार्या सततृतीया च
पूर्वविद्धाश्रयेरपि ऊनत्वं यदि मोहाद्वा प्रेतत्वं तस्य वै ध्रुवं दर्शे च पूर्णमासे च पित्रोः संवत्सरे दिने पूर्ववि २.

द्दमकुर्वाणो नरकं प्रतिपद्यते तयाहेतत्पुनःप्रोक्तानकालव्यापिनीतिथिः श्राद्धंतत्र कर्तव्यंह्यासमूहितका
रणंपतैःप्रकारैःप्रेतत्वेभवतिप्राणिनांभुवि इत्युक्तासोमशर्म्मेदेवेद्वारकांयोनिगच्छति तपनेनरकेयोरपि
त्रासहमविष्यति विशेषेणनयावत्सनुकृतेद्वादशीव्रते व्रतंकृतंयदस्माभिस्तत्कृतेनैवयत्संयुते निगतयम
लोकाच्चुतदस्माकंनदृश्यते कस्मात्कृतमशल्यंतमभवद्भिर्द्वादशीव्रते चेदशर्मा उवाच यदिनातमयाज्ञानात्र
कृतेद्वादशीव्रते कस्मात्कृतेसशल्यंतमभवद्भिर्द्वादशीव्रते प्रेताऊचुः ऊविप्रेस्तुऊदेवेन्द्रैःश्रुकमायाविमोहि
तैः कारयितेहेतवैश्यप्रेतयोनिमिमांगताः इत्थंतत्पूर्वकृतंतत्प्रत्यस्माकंविफलेकृतं संप्राप्ताप्रेतयोनितुस
शस्याद्वादशीव्रतात् सविद्धेयेप्रकुर्वंतिवासरेकेशवप्रियं तेषांपितामहाःस्वर्गान्प्रेतत्वंयांतिपुत्रक चंद्र
शर्मा उवाच प्रेतत्वंनाशमायातिकथमेतत्पितामहा कर्मणाकेनतद्ब्रूतयच्चाहंकरोमितत् प्रेताऊचुः गो
मतीनीरदानेनकृष्णवक्त्रावलोकनात् प्रेतत्वंनाशमायातिपितॄणांचकलौयुगे प्रेतत्ववर्जितालोकागो
मतीनीरदानतः विनापिंडप्रदानाच्चमुक्तिर्भवतिशाश्वती इत्येतत्सम्यगेवपुत्रदशमीवेधसंभवे पापप्र
नाशमभ्येतिपुनर्नकुरुतेयदि गोमतीनीरसंपर्कात्कृष्णवक्त्रावलोकनात् विलयंयातिपापानिजन्म
कोटिकृतान्यपि दृष्ट्वासन्माक्षिनांपुण्यं दृष्ट्वाचवनवासिनां सपालवासरेविष्णोःकुर्वंतियदिपुत्रक तस्मा
कुसमत्वंविपद्मपूर्णचंद्रसमप्रभे कृष्णस्यद्वारकांगत्वायस्माकंगतिर्भवेत् तथाकुरुस्वतत्त्वंश्रेष्ठप्रेतयोनेर्यं
याविपि विफलेतवसंजातेसत्कृतयत्पुपार्जितं नकृतेवासरेविष्णोर्नामसंकीर्तनंहरेः यत्त्वयासर्वतीर्थं
युगानांपुण्यमुपार्जितं तद्यर्थंसकलंजातंविनाकेशववासरात् विनाकेशवहृज्जायाः संकरोयत्वयार्चितः

रा.म.
ना.
३१
31

तस्मुएवंविफलेजातेप्रेतयोनिंगमिष्यसि संपूर्णंतवपुण्यंतद्वारकाकृष्णदर्शनात् भविष्यतिनसंदेहोगोमत्यु
दधिसंगमे दृष्टासोमेश्वरंदेवंकृष्णंयदिनपश्यति यात्राफलंनचाप्नोतिवदन्त्येवंसदाशिवः दृष्टोहेतेनसंदे
होयैःकृतंकृष्णदर्शने एकादशीनसंदेहोमकृष्णस्यमंतरं दृष्ट्वामाहात्म्यंकोगत्वाकर्त्तव्यंकृष्णदर्शने दृष्ट्वा
कृष्णंतमोपश्येत्सैवयात्रामहाफला कृष्णदर्शनपूतात्मायोमापश्यतिमानवः नतस्यपुनरावृत्तिर्मिमलो
काद्वैवेस्त्रवात् ब्रह्मादेवदेवेशाःस्वयंसोमेश्वरःपुरा विप्राणांश्रुतिमस्माभिर्वदतांपृष्ठेदेवत तस्माद्यत्राप
माणार्थंऊरुहीस्मस्यदर्शने प्रेतयोनिर्विमुक्तायास्यामःपरमांगतिं यतीनांभोजनंयत्तुयच्छतिकृष्णसन्नि
धौ सिक्थेसिक्थेभवेत्प्रीतिःपितृणांयुगसंख्यया कौपीनाच्छादनंयस्तुपात्रंकांचकमंडलुं दत्वासंन्यासिनां
यातिसमेकल्पानितत्पदे तुलसीकाष्ठसंभूतांयोमालांवहतेनरः तुलसीकाष्ठसंभूतेऊरुतेवाङ्गभूषणं
भवतेयस्यमर्त्तस्यदेहेतस्यसदाहरिः तुलसीकाष्ठमालांतुप्रेतराजस्यदूतकाः दृष्ट्वानश्यंतिहरेणावातो
द्धूतेयथारजः मालायाश्चधारणेदोषमाहुः धारयंतिनयेमालांहेतुकाःपापमोहिताः नरकान्नानिवर्तंते
दग्धाःकोपाग्निनाहरेः माघाष्टमहाद्वादश्यः उन्मीलिनीवंजुलीचत्रिस्पृशापक्षवर्द्धिनी जयाचविजया
चैवजयंतीपापनाशिनी द्वादश्योष्टौमहापुण्याःसर्वपापहराःस्मृत तिथियोगेनजायंतेचतस्त्रश्चापरा
स्तथा नतत्रयोगात्सबलंपापंप्रशमयंतिताः एकादशीचसंपूर्णावर्द्धतेपुनरेवसा उन्मीलिनीस्मृतश्रेष्ठ
कथितापापनाशिनी द्वादश्यामुपवासस्तुद्वादश्यामेवपारणं वंजुलीनामसाप्रोक्ताहत्यायुतविनाशि
नी अरुणोदयस्त्वाद्यास्यात्तुद्वादशीसकलेदिने अंतेत्रयोदशीप्रातःत्रिस्पृशासाहरेःप्रिया ऊहत्यकेयदा ३१

वृद्धिं प्रयाते पक्षवर्द्धिनी विहायैकादशीसम्यगुपोषयेत् पुष्यश्रवणपुष्याद्यरोहिणीसंयुतास्तुताः उपोषि
ताः समफलाद्वादश्यष्टौ शैष्ठस्य कार्यक् ग्रसन्नमपि सा पूर्वा विशोधयति पुत्रकः वंजुलीत्रुद्दिनीयासाहस्रा
युत विनाशिनी महापापानि च तानि शोधयत्त्रिस्पृशाकुला ऊरतेशोषकल्मषविच्छेदं पक्षवर्द्धिनी ज
याजयति विजया प्रेतमोक्षेन था परा जयंती नरकच्छेदमपि दुष्कृतकारिणा अष्टमी तु सतश्चैष महा
पातकनाशिनी तावत्पापानि देहेषु दुःसहायमयातनाः प्राणिनां कुरुते यावत्मेनतुन्मीलिनीव्रतं द्वा
दश्योष्टौ समाख्याताः याः पुराणविचक्षणैः तासामेकापि विहिता हंत्यपुण्यं पुराकृतं आयाति महद्
ताः पुण्यप्रभावेण हरेर्दिने शंकुपदे सततं श्रेष्ठविशेषज्ञस्तसंयुते कदाचित्तु अपि त्यक्तं यदि पुण्यवहि
कृतैः नदेतद्स्तं तत्प्राप्य करात् द्विगलितं क्षणात् अस्य विवेकः पुष्यनक्षत्रयोगे जया श्रवणयोगे विज
या पुनर्वसुयोगे जयंती रोहिणीयोगे पापनाशिनी मतांतरे च एकादश्यां सितपक्षे नक्षत्रे च पुनर्व
सुः नाम्ना सा हि जया ख्याता तिथीनामुत्तमा तिथिः स्कांदे श्लोकद्वयं अपि न हृदयमध्ये रामचंद्रस्तु ये
षां कृतभजननजनानां सर्वदानंदरीत्या कृतमपि स्वकृतं नैर्दुःखरूपेण सर्वं फलति च समस्तक्लेशहंतेषु नो
भावनीयः एकादश्युपवासेन शुद्धेन प्रीयते हरिः यन्नामोच्चारणान्मुक्तिर्न किंचित्तदुपवासतः इति
श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणेतिहासोक्ते अवधूताश्रमविरचिते दशमं प्रकरणं १० मार्कंडेय
उवाच पितॄणां प्रेतरूपाणां शुश्रूषावाक्यं महीपते चंद्रशर्मा द्विजश्रेष्ठो द्वारकां समुपागतः रुक्मिणी

रा॰म॰ सहितः कृत्स्नो यत्र तिष्ठति सर्वदा त्वत्वाह कृत्स्नपुरीं चैव सागरं गोमतीयुतं मन्येऽहं नार्थमात्मानं जीवितं यो
ना॰ वनं धनं यस्मोऽहं हतत्क्रतोऽहं सभाग्योऽहं धरातले दृष्टं कृत्स्नमुखं येमंदारकोऽह किंशुकलो यकमुका
३२ द्विजश्रेष्ठो गोमतीतटमाश्रितः कृत्वा स्नानं यथोक्तं त्वं सत्यंपितृदेवताः दत्वा पिंडोदकं सम्यक् कृत्स्नस्य
32 परमात्मन त्वमायमित्वा देवेशं चक्रे जागरणं ततः श्वात्रे स्नवदीनस्य शृणु कृत्स्नवचो मम संसारार्णवमग्ना
नां त्वमेकः शरणं नृणां त्वत्पादाब्जभक्तानां नद्रुःखं पापिनामपि किं पुनः पापहीनानां वो द्वादशी सेवितां नृ
णां दशमीवेधजं पापं त्वद्दिने मम सर्वजैः यत्कृतेनाशमायातं त्वत्प्रसादाज्जनार्दन सपाल्सन हिंत कृत्स्नय
कृते जागरे प्रभो तत्पापं विलयं यातं तुलवणं तथा यथाम्भसि स विद्धं वासरे यस्मात्कृते मम पितामहैः प्रेतत्व
तेन संप्राप्तं महादुःखप्रदायकं यथा प्रेतत्वनिर्मुक्ता मम पूर्वपितामहाः मुक्तिं प्रयान्ति देवेश तथा कुरु जगन्ना
थ त्वद्भक्तिं कृत्वा नैव त्वत्कृते त्वद्वासरं नदृष्टा द्वारकां कृत्स्नदृष्ट्वा सोमेश्वरं विभुं विफलं सकृते जाते यन्मम
या समुपार्जितं मत्सर्वजैस्तु कथितं तेन ज्ञानमयुक्तं मत नम्रणमात्रेण यायात्त्वत्प्रसादात्त्वं केशव दृष्टं त्वत्स
विरामङ्गलमे भुवनत्रये नैवास्ति देवकीपुत्रपुराणेषु श्रुतं मया सापराधात्स्वयेके विष्णुभूपालदयः
स्मृताः त्वत्करेण हताः कोपान्मुक्तिं प्राप्ता महीधर अद्यप्रभृति कर्तव्यं यन्मया कृत्स्नतं कृष्ण एकादश्या
नभो कृष्णमेकतेजमानं नरं सदा यत्नद्वैतापि विहाय त्वो पोष्यं त्वद्वासरे त्वत्प्रियार्थं मया कार्यो द्वादश्या
व्रतसंयुताः भक्तिर्भागवती कार्या प्राणैरपि धनैरपि तिलसंनाम सहस्रेण पठनीयं तव प्रियं तुलसीकाष्ठ ३२

संभूतामालापार्यसदामया नमगीतेतकर्मेऽस्मिन्संप्राप्तेतद्वासरे तत्कथाश्रवणंचैवनित्यंपुस्तकवाचनं
नवदत्तायदिष्टंतु भक्षणीयंसदामया नयातथाप्रकर्तव्यंयेनतुष्टिर्भवेन्मम समस्तेतन्मयाकृष्णतवाग्रे
परिकीर्तिते श्रीकृष्णउवाच साधुसाधुमहाभागवेदशर्मन्द्विजोत्तमः तुष्टोहंतवभक्त्याचवांछितंतेभवि
ख्यति तवयोक्तैर्नियमैरेवंत्वंसंतुष्टोहंद्विजोत्तम आगामिष्यंतिमल्लोकेत्वयासहपितामहाः पितामहाकुतः
चत्प्रसादेनसततंमुक्तिंप्राप्स्यंत्यसंशयः प्रेतयोनिविनिर्मुक्तायास्यामःपरमांगतिं गोमतीनीरदानेनपि
उद्दानेनपुत्र प्रेतयोनिविनिर्मुक्ताः कृष्णवक्त्रावलोकनात् द्वादशीव्रतजेपापैर्द्वारकायाःप्रभावतः नष्ट
पुत्रेनसंदेहःसंप्राप्तंपरमंपदं द्वादशीव्रतसंभूतंयत्त्वयापापमार्जितं कृष्णस्यदर्शनात्क्षीणंतत्सं
द्वादशीव्रते रक्षणीयप्रयत्नेनवेयद्दशमसंभवं नचेमत्रनसंदेहःप्रेतयोनिमवाप्स्यसि त्रैलोक्यसंभवं
पापेतेषांभवतिमतेले सर्वस्येयेप्रकुर्वंतिवासरेश्रीहरेर्द्वेषात् प्रायश्चित्तंनतस्यास्तिसशल्यंवासरेह
रैः येकुर्वंतिनतेयांतिमन्वंतरशतैर्दिवं प्रेतत्वेतुःसहेपुत्रतुःसहायममातनाः तस्मात्पुत्रनकर्तव्यंस
शल्यंद्वादशीव्रते कारयंतिचयेत्वज्ञाकृष्णरूपज्ञानहेतुकाः प्रेतयोनिंप्रयास्यंतिपितृभिःसहनान्यथा
द्वादशीदशमीविद्धायत्नेनैतान्तनाशिनी ध्वंसनीसर्वपुण्यानांकृष्णभक्तिप्रनाशिनी स्मृतितत्त्वगमि
ख्यामः प्रसादाद्रुक्मिणीपतेः प्राप्तंविष्णुपदंपुत्रत्वत्पुनर्भवसंज्ञितं इत्युक्त्वातस्यपितरःकृष्णस्यत्वादि
वेदग्रः वेदशर्माणंप्रतदृष्टात्माप्रणम्यचमुहुर्मुहुः स्वकैःसंतोषयामासमहस्त्राभादिकैःशुभैः स्वस्या
नैप्राप्यविप्रर्षिःकृष्णस्याराधनंप्रति प्रयत्नेकृतवान्नित्यंद्वादशीव्रततत्परः ततोवर्षशतांतेशोभनाह्य

दश
ना·
३३
33

णवतीपुनः माणात्तत्त्वोपदेशेनतत्कामोहंजगामह इत्येकादशीनिर्णयः अथप्रसंगात्श्राद्धमेका
दशीप्रयुक्तश्राद्धनिर्णयमाह पद्मपुराणे एकादश्यांतुसंप्राप्ते मातापित्रोःक्षयेहनि द्वादश्यांतत्प्र
कुर्वीतनोपवासदिनेक्वचित् सनत्कुमारोयथाश्राद्धेसत्कालेविधीयते एवमेकादशीश्राद्धंद्वादश्या
मेवकारयेत् भुंक्तेभुक्तेतियोमूढःश्राद्धंभुंक्तेहरिवासरे तावुभौपतितौस्यातांतस्माच्छ्राद्धंपरेहनि
किंच एकादश्यांयदाराजन्श्राद्धंनैमित्तिकंभवेत् तद्दिनंतुपरित्यज्यद्वादश्यांतत्समाचरेत् तत्कालः
येकुर्वंतिमहीपालश्राद्धंत्वेकादशीदिने त्रयस्तेनरकंयांतिदाताभोक्ताप्रेरकः स्कंदपुराणे एका
दश्यांयदातिथ्यांश्राद्धंनैमित्तिकंभवेत् उपवासंतदाकुर्याद्द्वादश्यांश्राद्धमाचरेत् एकादश्यांत्रयोदश्यां
यच्छ्राद्धंप्रतिवत्सरे द्वादश्यामेवतत्कार्यंविष्णुधर्मपरायणैः कल्पमात्रादिदावश्याकर्यश्राद्धादिक
र्ममिमांशंकांवायामाह कत्यायौद्वादशीदृष्टानिशीथ्याःशुद्धमेवहि श्राधथ्याद्याःक्रियाःसर्वाःकर्तव्याः
शंभुशासनात् इतिवैष्णवश्राद्धनिर्णयः श्राद्धविषयेतत्त्वंधर्ममाह विष्णोर्निवेदितान्नेनयष्टव्यंदे
वतांतरं पितृभ्यश्चैवतद्देयंतदानंत्यायकल्पते विपक्षेदोषमाह पितृशेषंतुयोदद्याद्धरयेपरमात्मने
रेतोधाःपितरस्तस्यभवंतिक्लेशभागिन इतिव्यासवचनात् तस्माद्दोषोविष्णोःप्रजानैवाद्यादिकंकृ
त्वापश्चाद्देवैःश्राद्धादिकंतन्नमिति पंचरात्रागमे एकादश्यांयदाब्रह्मन्ब्राह्मणोम्रियतेयदि मेत्रतः
सकलंकार्यंमंत्रेणाप्योर्ध्वदेहिकं प्रेताङ्गतीमहोतव्यानपिंडनतिलांजलि उपातहव्यदिवसेविधिरेषः
सनातनः इतिवैष्णवधर्माणामन्यधर्मानततएतस्मात्नसंभवे अथैकादश्युपवासनिर्णयेविष्णोरभिषेक ३३

कविधिमाह तदुक्तं विष्णुरहस्ये पंचामृतेन संस्नाप्य एकादश्यां जनार्दनं द्वादश्यां पयसा स्नात्वा हरिसायुज्य
मश्नुते द्वादश्यां पयसा स्नाप्य इति रात्रिविषयकं वाक्यं दिवानिषेधात् तत्राह स्नाने यो हरये दद्याद्द्वादश्यां
वैष्णवो हिव यत्पूजाफलेन स्नवाश्कल्यायोपनाकृति तेषु वामनपर्णयोः सायंकालेपि विष्णोरभिषेका
दिनकर्त्तव्यमन्तरं दिनेकर्त्तव्यमिति वचनादित्यर्थः अथैकादश्यां गायनं नृत्यगीतजागरणप्रकारः
पूर्वं नारदीयपुराणादौ संक्षेपेणोक्तः इदानीं विस्तरेणोच्यते द्वारकामाहात्म्ये स्कंद उवाच भगवन्स
र्वदेवेश दुःखसंसारभेषज कथयस्व प्रसादेन सर्वलोकोपायविमुक्तये श्रीमहादेव उवाच चतुर्विधं च
यत्पापं कोटिजन्मार्जितं कलौ जागरे वैष्णवे शास्त्रं वाचयित्वा अपोहति वैष्णवस्तत्र शास्त्रस्य यो वक्ता
जागरे हरेः मज्जकं तं विजानीयान्नास्कीत्वन्यथा भवेत् हरेर्जागरणे यस्य यो निद्रां न नयेत्सदा मज्जनाद्य
विशेषेण नृत्यते गायते च यः प्रयच्छामि परं ज्ञानं मोक्षं विष्णुः प्रयच्छति तस्माज्जागरणं कार्यं मज्जके
नविज्ञानतः अन्यथा लिंगिनो ज्ञेया यच्छिवंति जनार्दनं जागरे येत्र कुर्वंति गायंति हरिवासरे अथि
ह्यामाति राज्याभ्यां निमिषार्द्धेन तत्फलं जागरे पश्यतो विष्णोर्मंत्रे स्वराज्ये मज्जमेज्जः ये येषां हृष्यंति रोमा
णाराजन्नाजागरणे हरेः कुलानि विनावैति वसंति हरिसन्निधौ यमस्य पथि निर्मुक्ता नराः पापशाते
वृत्ता द्वादश्यां ये प्रकुर्वंति जागरे पुरतो हरेः पितृभिः सह गच्छंति वैकुंठे च न संशयः गीतशास्त्रविनो
देन द्वादशीजागरान्विता ये कृतास्कंदते यांति कलौ हसेन संशयः प्राणात्ययेन मुच्यंति द्वादश्यां जा
गराद्धरे पुत्रिणास्ते नरा लोके भवंति धनिनः सदा येषां वैष्णवाः पुत्राः कुर्वंति हरिजागरं हेमलेः

रा.क.
ना.
२४
34

कृते दाने गयाश्राद्धे कृते न तैः स्नाने नित्यं प्रयागे तु यैः कृते हरिजागरे प्राप्तेस्त्यं मासितां पुण्यं मन्याश्रमनि
वासिनां दृष्टा पूर्वेन सकलैर्यैः कृते जागरे हरेः हृषिता विष्णुभक्ता ये नित्यं मम षडाननः ऊर्वे निवा
सरे विप्रो यस्माज्जागरणान्विते अकरणे दोषमाह कृत्वैकादशिमहात्म्यं जागरे न करोति यः प्रकली
करणेन तेन मनात्मा स्म विचेष्टिते संप्राप्य वासरे विप्रो यस्माज्जागरणे कृते अर्थगते च तत्पुण्यं तेषां जन्म
शतोन्नवं किंच निवारयति यो गीतं नृत्यं जागरणे हरेः षष्टिर्युगसहस्राणि पच्यते रौरवादिषु ह
न्यमानस्य उपहासं करोति यः जागरे याति निरये यावदिन्द्राश्चतुर्दश एवं रात्रौ प्रकर्तव्यं कौशिकी प्रा
तरग्रे यत् प्रभाते कौशिकी यस्तु प्रयागे जागरे हरेः समस्तं हरते सर्वान्ब्राह्मणो ब्राह्मणादिकान् पु
त्रो वा भ्रातृपुत्रो वा दौहित्रो दुहिता पि वा करिष्यति कुले स्माकं कलौ जागरणं हरेः पीड्यमानाः प्रज
ल्पन्ति पितरो यमकिंकरैः मुक्तिर्भविष्यतस्माकं नरकाज्जागरात् हरेः नान्यथा भवे स्माकं मुक्तिर्यज्ञश
तैरपि विना जागरणेनैव पुण्यलोकमवाप्नते तस्माज्जागरणं कार्यं पितृणां हितमिच्छता भक्तिर्भा
गवतानां च गोविंदस्यापि कीर्तनं न देहग्रहणं तस्मात्पुनर्लोकं भविष्यति करोति जागरं यस्तु संगमे
विजयादिने पुनर्देहग्रहणं दृष्टं तेनात्मना स्वयं त्रिस्पृशा वासरे येन कृते जागरणे हरेः केशवस्य शरी
रे संलीनो भवति ध्रुवः उन्मीलिनी कृता येन रात्रौ जागरणान्विता प्रभवेति न पापानि स्थूलसूक्ष्माणि
तस्य तु तस्य पुण्यं प्रवक्ष्यामि महाभागवतस्य हि तिलप्रस्थसहस्रं तु सहिरण्यं द्विजातये दत्वा यत्फल
माप्नोति श्रवणे रविसंक्रमे हेमभारशतानि त्रीणि सवत्सकपिलायुतं तत्पुण्यं भवते स्कंद नात्र कार्या वि २४

वारणं यः पुनर्मांसरे विसोदिहोत्रकविकृतैः सर्वैः संस्कृतैः प्राकृतैस्तथा द्वारोपयेन् हर्षोत्तमं स विष्णुत्वमवाप्नो
ति यावदाभूतसंप्लवम् इति एकादशीजागरणविचारः अथ यतिकर्तव्यैकादशीव्रते उक्तं च तिथिनि
र्णयामृते अत्रैकादशीव्रते अधिकारिणः यदाह कात्यायनः अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न तु वत्सरः
एकादश्यामुपवसेत् पक्षयोरुभयोरपीति एवं पक्षद्वये एकादशीव्रतस्य सर्वत्र प्राप्तौ अवस्थया विशेषः का
लादर्शेऽभिहितः विधवाया वनस्थस्य यतेश्चैकादशीद्वये उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः भुञ्जी
त एव कृष्णायां सिद्धस्तस्य ततो व्रतम् इति अतश्च पक्षद्वये एकादशीव्रते वनस्थयति विधवाः उक्तं विधवा वनस्थ
यतिसमानधर्मत्वेन गारुडपुराणे प्रोक्तं एकः प्रभातसमये द्विरेकादशीं न वेदिति तत्रोपवासो विहितो वनस्थस्य
यतेस्तथा विधवायास्तत्रैव परतो द्वादशीं न वेदिति सकामस्य पुत्रवान्गृहस्थः शुक्लामेवोपवसेत् कृष्णा
यामशनानिवृत्तिमात्रं कुर्यात् तदुक्तं कूर्मपुराणे एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि वनस्थयतिधर्मो
यं शुक्लामुपवसेद्गृही स्कन्दपुराणे एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि वनस्थयतिधर्मोऽयं शुक्लामेवोप
वसेद्गृही कृष्णैकादश्यां पुत्रवद्गृहस्थ उपवासनिषेधादशननिवृत्तिमात्रमेव कुर्यान्नोपवासमिति गम
ते तत्र विशेषं दर्शयति उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेदिति विद्या विषये दर्शितं अविद्यानामला
भे तु पयो दधि फलानि च सकृदेवाल्पमश्नीयादुपवासान्तरो भवेदिति वायुपुराणे विशेषः नक्तं हविष्या
न्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यं यत्पञ्चगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति कूर्मपुराणम
वाप्नोति द्वादश्यामुभयोरपीति कूर्मपुराणेऽपि यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः एकादश्यामुप
वसेत्पक्षयोरुभयोरपीति गोभिलोऽपि एकादश्यां सिते पक्षे यश्च कुर्यादुपोषणं स विष्णुलोके व्रजति कृष्णाप

रा.म.
ना.
३५
35

देविशेषतस्तस्मादिवाक्यैः फलविशेषाविधानात्तत्तन्मतापेक्षयोभयैकादश्योरुपनरेकादश्यावाक्यास्मो
पवासंकुर्यादित्यलमतिविस्तरेण मशेखेनपिवेन्नायमित्यादीनिवाक्यानिपूर्वमेवलिखितानिसंतीति
ज्ञेय द्वादशीसाम्यविद्धाधिकाद्वादशीहानिमुक्तास्मृद्धाधिकाचपूर्वागृहस्थैरुपोष्यायतिभिस्तूत्तरेतिवक्ष
वस्या तदुक्तंमार्कंडेयपुराणे संपूर्णैकादशीयत्रप्रभातेपुनरेवसा पूर्वामुपोषयेत्कामीनिष्कामस्तूत्त
रांसदेति अत्रकाम्याकामिपदाभ्यांगृहीयतीउच्यतेउभेतेप्रायेणगृहीणांसकामत्वात्यतीनांचनिष्काम
त्वात् तथा एकादशीप्रवृद्धाचेच्छुक्लेकृष्णेविशेषतः तत्रोत्तरांयतिःकुर्यात्पूर्वामुपवसेद्गृही स्कंदपुराणे
पि संपूर्णैकादशीयत्रप्रभातेपुनरेवसा त्रयोदश्यामुषःकालेउपोष्यातत्रकाभवेत् उपोष्यद्वेतिथीतत्र
विधवाचैववनस्थश्च यतिर्गृहीयतिभेदेनमवस्थानेयाअत्रापिस्मृद्धाविद्धाद्वादश्यधिकात्सर्वैरपुत्रैरेवोपो
ष्या तदुक्तंनारदेन संपूर्णैकादशीयत्रप्रभातेपुनरेवसा तत्रोपोष्याद्वितीयात्पुत्रपौत्रप्रवर्द्धनीति गरु
डपुराणेपि संपूर्णैकादशीयत्रप्रभातेपुनरेवसा वैष्णवापित्रयोदश्यांघटिकैकायदाभवेत् गृहस्थोपि
परांकुर्यात्पूर्वांनोपवसेद्दिति अथविद्धाभेदोच्यते तत्रद्वादशीसाम्यमुक्ताविद्धसमाद्वादशीहानिमुक्ता
दसमाचपूर्वागृहस्थैरुपोष्यापरायतिभिरितिव्यवस्था तदुक्तंपुराणसमुच्चये दशमीमिश्रितापूर्वाद्वा
दश्याचविलुप्यते एकादश्यांतदाब्रह्मन्नुपवासःकथंभवेदिति प्रश्नेउत्तरमाह सुद्दैवद्वादशीराजन्नुपो
तकास्तिभिः सकामीगृहिभिःपूर्वाविद्धायीतिविनिश्चयइति विद्धसमायांद्वादश्यामधिकत्वात्तद्वा
दश्यामेकादशीसद्भावात्सर्वैषांपरत्रैवोपवासः तथाचस्मृत्यंतरेपि यलाहेनापिविद्धासदशम्येकादशी
यदा तदाह्येकादशींत्यक्त्वा द्वादशींसमुपोषयेदिति विद्धाधिकाद्वादशीसमाविद्धाधिकाचसर्वैरपिपरैवो ३५

आविद्धाधिकाद्वादशीहीनासंगृहस्थैः पूर्वोपोष्यायतिभिस्तूत्तरेतिमतस्याउपवासस्यानित्यत्वेनावश्यकत्वा
त्सर्वत्रोपवासः प्रतीयते परविद्धाविधायकवाक्यसामर्थ्याद्यतीनांपरत्रैवोपवासोचसीयते स्म तेनतेरपि हि
स्यैकादशीयत्रतत्रसन्निहितोहरिः पुराणोक्तत्वात्तस्यांत्रयोदश्यांतुपारणमिति तथाचकलाधिका
दशीयत्रद्वादश्यप्यनुगताभवेत् दिनेतत्रापिपारणायतीनांतुसमाप्तितिथिरिष्टेतिवानप्रस्थयतिविधवे
काद्वादशीनिर्णयः स्वकृतश्लोकः एकादशीव्रतेकार्यं तिथिभिर्व्यंभावने सर्वंचत्वल्लिदेव्रह्मेन्नुपवासस्तदात्म
कः इति श्रीरामनाममाहात्म्यश्रुतिस्मृतिपुराणेतिहासानेकच्युताश्रमविरचितेएकादशीप्रकाश ॥ प्रेक्षा
ति भगवान्नामगायनतमनुस्मरति भगवद्भक्तगायनेनमद्भतिष्ठामीतिभगवद्वचनेप्रमाणमित्याह नाहंवसा
मि वैकुण्ठेयोगिनांहृदयेरवौ मद्भक्तायत्रगायंतितत्रतिष्ठामिनारदेतिभगवद्वचनात् केच नकर्मजडाश्रम
क्तास्तुवासुदेवनामगायनेनकर्तव्यमितिवदंतितत्राह विष्णुस्मृतौ नृत्यगीतादिकुर्वंतिवासुदेवस्यनष्टये न
जीवनाययुंजीतविप्रः पापभियाक्वचित् तथाचश्रुतिः तस्माद्गायनेनदेयमिति तस्माद्गायतस्मतस्यच न
प्रतिगृह्णंयत्नतिगृह्णीयात् ग्राममलंप्रतियात् इति एतदेवश्रुतेःस्मृतेश्चनातर्थयत् गानेनकर्तव्यमतउदरपो
षणार्थंपरंतुभगवद्भक्त्यार्थंकुर्यादिति तथाचोक्तं याज्ञवल्क्यस्मृतौ प्रायश्चित्ताध्यायेसन्न्यासप्रकरणे गी
तज्ञोयदियोगेननाप्नोतिपरमंपदं रुद्रस्यानुचरोभूत्वासहतेनैवमोदते वीणावादनतत्त्वज्ञः श्रुतिजातिविशा
रदः तालज्ञश्चाप्रयासेनमोक्षमार्गंनिगच्छति अप्रयासेनअन्यक्लेशराहित्येननिगच्छतिसर्वथाप्राप्नोतीत्यर्थः
तथाच कर्मण्युपयिकत्वेनब्रह्मणोज्ञइतिस्मृतेः कारिकायामनाःप्रोगीतेरमेदिति एतदेवपद्मपुराणेपी

राणैः प्राकृतैरपि नामभिर्भगवंतं विप्रेंद्र समाराधयेदिति सहस्रश्लोके ज्ञातव्यमिति उक्तं च नारदीये सर्गेणापि नेमे
कार्यं यत्र न स्मरणं हरेः नरके यातनां याति न्यायत्र गोविंदकीर्तनमिति इदानीं नामसंकीर्तनप्रसंगेन गीतश्रवणं
प्रदर्शयति तत्र निषेधवाक्यानि श्वचर्मगीयथाहीरमपेयं ब्राह्मणादिभिः तद्वच्छूद्रमुखाद्वाक्यं न श्रो
तव्यं कदाचन किंच पंडितस्यापि शूद्रस्य शास्त्रज्ञानरतस्य च वचनं तस्य न ग्राह्यं शूद्रोक्तिं शृणु विप्रेति स्कंदे
भागवते ग्राम्यगीतं न श्रोतव्यं यतिर्वनचरः क्वचित् शिवेन हरिणा बद्धा व्याधस्य गीतमोहितात् व्यास
वादित्रगीतानि जघन्यग्राम्याणि योषितां प्रासंगिकीं न कोऽवृषलस्य गीतं ततः प्रायश्चित्तमाह वै
श्वपचोच्चांडालगीतं तु श्रुत्वा चांद्रायणं चरेत् इत्यादिवाक्यैः गीतं न श्रोतव्यमित्युक्तं तत्र विषयवासनया मनुष्या
णां स्त्र्यादिकं न श्रोतव्यं किंच बालकैः खरग्रहणादि न कार्यमित्युक्तं वाथ कस्मात् परं तु रामकृष्णगोविंदे
त्यादि भगवन्नामश्रवणं पापक्षयार्थमवश्यमेव श्रेयेन पुण्यं भवति तत्राह नेषां तु हरिनामैव श्रूद्रत्वाच्चांद्रा
यणं लभेदिति वचनात् अन्यथा श्वानकादीनां स्त्रवाक्यश्रवणमनुप्रपन्नमिति किंच स्नानमानुसाध
नं श्रवणं ब्राह्मणैः सर्वेभ्यः शूद्रादयः कर्तव्यमित्याह तदुक्तं महाभारते शांतिपर्वणि पुत्रेणाद्य प्राप्य ज्ञानं ब्राह्म
णात्क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णं श्रद्धातव्यं श्रद्दधानेन नित्यं न श्रद्धां जन्ममृत्यू विशेतां न
तु ब्राह्मणेन ब्राह्मणेन ब्राह्मणादेव ज्ञानं ज्ञातव्यं चाभ्यसेत् क्षत्रियादेरित्यत्राह सर्ववर्णा ब्राह्मणा ब्रह्मजा
श्च सर्वे नित्यं व्याहरंते च ब्रह्म तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि सर्वं विश्वं ब्रह्म चैतत्समस्तं तदेवाह ब्रह्मास्य ३६
तो ब्राह्मणाः संप्रसूता बाहुभ्यां वै क्षत्रियाः संप्रसूताः नाभ्यां वैश्याः पादतः संप्रसूताः सर्ववर्णा नान्यथा वेदि

तथा तथान्तश्रुतिः ब्राह्मणोस्य मुखमासीदित्यादि विपरीतबाधकमाह अजानंतः कर्मयोनिं भजंतेनु नानाय
ज्ञेषु तेन तथा यातिभावे तथा वर्णाज्ञानहीनो यतंते निर्योगाद्ज्ञानात्प्रकृतियोनिजाले वर्णाः ज्ञानहीनाः प
तंतीत्यनेन वर्णाश्चतुर्णामपि ज्ञानेऽधिकारोस्तीति दर्शितं उपसंहरति तस्माज्ज्ञाने सर्वतो मार्गित
व्यः सर्वत्रस्थं चैतद्रुक्रमयाते स्थादिभारते सहस्रसोज्ञानमस्तीतिज्ञातव्यं गीतासु अन्येत्वेवमजानंतः श्रु
त्वान्येभ्य उपासते तेपिचातितरंत्येव मृत्युं श्रुतिपरायणाः अन्यशाब्देन स्त्रीशूद्रादयो गृह्यंते दृष्टं वमैते
यो देवहूतिचूडालादिका लीलासु दिमैत्रे श्रुतिराह स्त्रियः सतीस्तेउ मे पुंस आहुः पश्यदक्षवान्नवि
चेतदंधः कविर्यः पुत्रः सयिमाचिकेतयस्ताविजानातिस्स पितुः पितासत् विदुरादिमैत्रेयस्य शूद्रादी
नामधिकारोस्तीत्याह तद्वक्रमगाप्तिसंहितायां सर्वेषामधिकारो वैज्ञानमोदकिकोत्रमेः शुचिव्र
ततमाः शूद्रा धार्मिका द्विजसेवकः स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः लोकाश्चांडालपर्यं
ताः सर्वेप्यत्राधिकारिणः यत्र चांडालोधिकारी तत्र अन्ये इति किं वक्तव्यं पंचरात्रागमेच स्वप्नलेखे
स्त्रियाद्वैतमालागोत्रेनपुंसके वैदिकेषु च सर्वेषु सिद्धादीन्नवशोधयेत् किंच स्त्रीतिस्याभासारदृ
ष्ट्यानासंहारंवनितोयतेत ब्रह्मचारिण उक्तिः स्त्रियः शूद्रस्य चेष्टदम्रतिवचनवलात् शूद्राः स्त्रिय
श्च मंत्राधिकारिणो हरस्यंते नन्नतपस्तायस्त्रीश्च्या त्रा प्रव्रज्यामं च साधुनं देवताएतनं चैव स्त्री
शूद्रपतनतानिषट् इत्यत्र स्त्रीशूद्रयोर्मत्र तपादेर्निषेधो हरस्यते इति चेन्नेत्याह भगवानमी
नाम्नास्ते माहिंपार्थव्यपाश्रित्ययेपिस्युः पापयोनयः स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिमि

राम.
ना.
३७
37

तिसिद्धिं तद्वाक्यदर्शनात् यदुक्तं न फलपरं इति यत्तु स्त्रीणां भर्तृभक्तिप्रशंसार्थं शूद्राणां द्विजसेवा प्रशं
सार्थं च यदुक्तं नृष्णो भगवद्वचनपदः तद्दृष्टान्तः यथा एकभिक्षा न कर्तव्या बृहस्पतिसमो द्विज इत्यत्र वा
क्यैमात्यूकरप्रशंसोक्ता न तद्वद्वाधीन्यर्थः अन्यथा पंचभिक्षाविधायकवाक्यवैयर्थ्यं स्यात् भगवद्वाक्यस्य
पि वैयर्थ्यापत्तेः स्वयं त्यादि सर्वं मनवद्यं भागवते च प्रकृतिमनुसरति न यत्र वैकुंठकथासुधापगा न सा
धवो भागवतास्तदाश्रयाः न यत्र यज्ञेशमखा महोत्सवाः सुरेंद्रलोकोपि न वै स सेव्यतां यत्र यस्मिन्सा
नेऽस्य श्रवणकीर्तनादि नास्ति यत्र विष्णुभक्ताश्च न संति यत्र विष्णुप्रीत्यर्थं सर्वकर्म नास्ति स सुरेंद्रलोकोपि
इंद्रपदमपि नरकस्थानवत् त्याज्यमित्यर्थः पूर्वश्लोकेन तदाश्रया भागवता इत्युक्तं तेषां स्वभावमाह सतामयं
सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि प्रतिक्षणं नव्यवदच्युतस्य यत्स्त्रियो विटानामिव साधुवा
र्ता: अयमर्थः सतां सारग्राहिणामयं निःसर्गः स्वभावः यत् अच्युतस्य वार्ता यो कथा यां श्रुतायामपि प्र
तिक्षणं नित्यं नूतनं नूतनं कथं भूतानां सतां यदर्थवाणीवचनेश्रुतिः श्रवणेंद्रियं चेतः अंतःकरणं एतानि
यदर्थं यस्य श्रवणानि येषां यथा स्त्रियो विटानां परस्त्रीजाराणां परस्परं कथा यथा प्रतिक्षणं नित्यनूतनं तेष्वा
तिप्रियत्वात् तद्वत् हरेरेतेषां भगवतां नामित्यर्थः अत एव ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मु
खरितां भवदीयवार्तां स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजितजितोप्यसि तैस्त्रिलोक्यां
स्वगेहे स्थिताः संतः ज्ञाने क्लेशो न कार्य भवत्कथाः हरिदासोक्ताः श्रृण्वंति तान् नमंतः एवं भक्ता ये भक्ता तैरजि
तोपि त्वं जितोसीत्यर्थः भक्तिमत्ता केवलज्ञाने प्रयासं कुर्वंति तेषां क्लेश एवावशिष्यते नान्यद्यथाह श्रेयः ३७

क्तिंभक्तिमुद्दिश्यनेविमोक्तिंभजंति येकेवल्यंवापलब्धये उक्तंगीतासु क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां
अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यतेइति यदुक्तंनारदीयपुराणेपद्मपुराणेच श्रीमद्भागवतेचतदेवात्र
द्वारकामहात्म्येदर्शयति यमोवाच कृष्णकृष्णेतिकृष्णेतिस्वपन्जाग्रन्व्रजंस्तथा यो जल्पतिकलौनित्यंकृष्ण
रूपीभवेन्नरः कृष्णकृष्णेतिकृष्णेतिप्रत्यहंवन्दतेकलौ नित्यंयज्ञायुतंपुण्यंतीर्थकोटिफलंलभेत् यस्तुपुत्रः
सुविद्वत्तःपूर्वंवयसिधार्मिकः विष्णुकीर्तिप्रवृत्तेनतेनवंशंकवयोविदुः स्नात्वागायंतिनामसांकृष्णस्यकलिम
मलापहं नतेषांविषयेस्पृहानचमद्विषयादिते येनैवेद्विजवर्णाश्चक्षत्रियाश्चविशस्तथा त्रिवर्णशूद्राश्च
शुद्धाःशूद्राश्चान्येशरीरिणः गीतास्तंहेतिकृष्णाग्रेतेनमुक्तानात्रसंशयः म्लेच्छतुल्याःकुलीनास्तेयेनभक्ता
जनार्दने संकीर्णयोनयःपूतायेभक्तामधुसूदने उद्देशोपिभवेत्पुण्योयत्रभागवताःकलौ नास्तिनास्तिम
हाभागकलेर्युगसमंयुगे स्मरणात्कीर्तनाद्यत्रप्राप्यतेपरमव्ययं स्त्रीराजबालहाश्चैवयश्चविश्वासघातकः
कर्ताप्यहारीपापिष्ठोमार्गघ्नोग्रामदाहकः मातृगामीसुरापश्चभ्रष्टस्तथैवसर्वनिंदकः मातृहापितृहाचैव
भ्रूणहागुरुतल्पगः एतेचान्येचपापिष्ठामहापापयुताश्चये सर्वपापैःप्रमुच्यंतेकृष्णदेवस्यकीर्तनात्
इदंतुसर्वकालविषयकंतदप्यनुतापेसतीतिभावः अन्यच्च किंदेवैःश्रद्धयाहीनैर्ध्यानैरपिष्टलक्ष्यः य
मेशास्त्रादिभिश्चैवयागशास्त्रैश्चकिंभवेत् संनिहासैःपुराणैश्चव्रतदानजपादिभिः सप्तद्वीपाब्धिभूदाने
र्दानैरन्यैश्चकोटिशः हेमभारसहस्रैश्चतुलैरैरविग्रहैः गजाश्वरथदानैःकिंदेवालयप्रतिष्ठया सवनैः
वेत्रतीर्थानांतपोभिर्विविधैश्चकिं द्वारकेश्वरकृष्णस्यस्मरणंयस्यजायते इतियमोक्ते एतदर्थंकलियुगवि

राम. का. ३८ यद्येवासुदेवनामकीर्त्तनेकर्त्तव्यमितिभागवते शुकउवाच कलेर्दोषनिधेराजन्नस्तिह्येकोमहान्गुणः कीर्त्त
नादेवकृष्णस्यमुक्तबंधःपरंव्रजेत् अतएव कलिंसभाजयंत्यार्यागुणज्ञाःसारभागिनः यत्रसंकीर्त्तनेनैवसर्व
स्वार्थोहिलभ्यते हरेर्नामैवनामैवममतारकं कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथा घोरेकलियुगेप्राप्ते
38 सर्वधर्मविवर्जिते वासुदेवपरामर्त्यास्तेकृतार्थानसंशयः तेसभाग्यामनुष्येषुकृतार्थान्नृपनिश्चितं स्मरंतिः
स्मारयंतिमिथोहरेर्नामकलौयुगे तदुक्तंबृहन्नारदीयपुराणे हरिर्नामपरायेचघोरेकलियुगेद्विजाः तएवकृ
तकृत्यास्तुनकलिर्बाधतेहितान् शिवपूजापरायेचशिवनामपरायणाः तएवकृतकृत्यास्तुनकलिर्बाधते
हितान् समस्तजगदाधारंमायाश्चरूपिणं घोरेकलियुगेप्राप्तेविष्णुंध्यायन्नसीदति घोरेकलियुगेप्राप्तेस
र्वधर्मबहिष्कृते हरिकीर्त्तनमेवात्रसंपूर्णफलदायकं तथाचाथर्वणीश्रुतिः जपंतिनैवशरीरेणादेवनाद
र्शनेकरोतिकलौनान्येषांभवति हरिकेशवगोविंदवासुदेवजगन्मय इतीरयंतियेनित्यंनकलिर्बाधतेहि
तान् घोरेकलियुगेप्राप्तेहरिभक्तिःसुदुर्लभा तेत्रैवभ्रमतालभ्याःपुत्रदारधनादयः तदुक्तंश्रीमद्भा
गवतेपि कृतादिषुप्रजाराजन्कलाविच्छंतिसंभवं कलौकिलभविष्यंतिनारायणपरायणाः कृतादि
षुयाःप्रजाःब्राह्मणाद्याःकलौसंभवंजन्मइच्छंति तत्कुतइत्याह ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन्
यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवंअन्यत्रापि कलौयुगेकल्मषमानसानांमन्यत्रधर्मेखलुनाधि
कारः रामेतिवर्णद्वयमादरेणजपन्सदामुक्तिमुपैतिजंतुः जंतुर्नरमात्रमित्यर्थः इत्यादिवाक्यैरयमेवार्थो
निरूप्यते कृतादियुगत्रयेषुयेधर्मास्तेकलौकर्त्तुमशक्यास्तेषांधर्माणांफलंकलियुगेरामस्मरणाद्विंदति ३८

नामसंकर्त्तनादेवास्य धर्मान्तनयैश्चैव पुरुषेणालभ्यतेऽतः घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते कीर्त्तनादेव कृष्ण
स्य मुक्तबंधः परं व्रजेत् किंच अन्यत्र धर्मे बलनाधिकार इति वचनादतो नामसंकीर्त्तनेनैव चित्तशुद्धिद्वा
रा भक्तानां मोक्षसिद्धिरित्यर्थः कृष्णेति मंगलं नाम यस्य वाचा प्रवर्त्तते भस्मीभवंति राजेंद्र महापातकको
टयः सर्वहत्तश्लोकः श्रीशौरज्ञाने परमात्मत्वं गम्यते गोविंद गोपविष्ण्वात्मन् श्रीपते पाहि नः पितः इति श्री
रामनाममहात्म्यस्फूर्तिस्मृतिपुराणेतिहासोक्तेश्च सुनाम्नमविरचिते द्वादशं प्रकरणं १२ सर्वप्रकरणोत्कृष्टकृष्णना
रदीय पुराणोपपुराणोद्भविका माहात्म्यं च कलियुगविषये श्रीकृष्णनाममहात्म्यमतः इदानीं श्रीमद्भाग
वते द्वादशस्कंधे श्रीशुकं प्रति परीक्षिदुवाच केनोपायेन भगवन् कलेर्दोषान् कलौ जनाः विधमिष्यन्त्युपचि
तांस्तन्मे ब्रूहि यथा मुने नियमिष्यंति नाशयिष्यंति यथायथावत् कलियुगे कः परमो धर्मस्तन्निबुभुत्सया
पृच्छति युगानि युगधर्मांश्च मानं प्रलयकल्पयोः कालस्येश्वररूपस्य योः संसारस्थितिकालयोः नचापेव
हिंमुखः प्रश्न इति कालस्येति तत्र युगधर्मांस्तावदाह श्रीशुक उवाच कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृ
तः सत्यं दया तपो दानमिति पादा विभोर्नृप तत्रैतैस्तत्कालीनैर्जनैः दानं अरागद्वेषतया भयदानेन
तदेव प्रमेधीच शब्देनोक्तं विभोः संपूर्णस्य धर्मस्य तदानीतनजनानाह संतुष्टाः करुणा मैत्राः शान्ता दा
न्तास्तितिक्षवः आत्मारामाः समदृशः प्रायशः श्रमिणो जनाः मैत्रीभूतसेवी आत्मारामाः आत्माभ्यासवे
नः त्रेतायां धर्मपादानां तुर्यांशो ह्रीयते शनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैः तदा क्रियातपोनि
ष्ठानातिहिंस्रा नलंपटाः त्रैवर्गिकास्त्रयीवृद्धा वर्णाश्रमोत्तरा नृप ब्रह्मोत्तरा ब्राह्मणाधिकाः अन्तेतन

रा॰ भा॰
३९
39

सत्यंच संतोषेणतपः विग्रहेणदानमिति यथासंख्यंयोज्यं हिंसातुष्ट्यनृतद्वेषैरित्यत्र क्रमोन विवक्षितः त
पः सत्यदयादानेष्वर्द्धं ह्रसति द्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः धर्मस्यार्द्धं ह्रसतीति तीयतश्च
मंसत्यलक्षणोश्चिह्नैःपादैरित्यर्थः कलौतुधर्महेतूनां तुर्यांशोधर्महेतुभिः एधमानैः क्षीयमाणोह्यन्तेसोपिवि
नंक्ष्यति कलौधर्मपादःतुर्यांशस्तुर्यांशास्त्वशिष्यते शूद्रदासोत्तराः शूद्रकैवर्तप्रधानाः प्रजाइत्यर्थः
तस्मिन्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः दुर्भगाभूरितर्षाश्च शूद्रदासोत्तराःप्रजाः सत्वंरजस्तम
इतिज्ञेयन्तेपुरुषेगुणाः कालसंचोदितास्तेवैपरिवर्तन्तआत्मनि प्रभवन्तियदासत्वेमनोबुद्धीन्द्रिया
णिच तदाकृतयुगंविद्याज्ज्ञानेतपसियद्रुचिः यदाकर्मसुकाम्येषुभक्तिर्यशसिदेहिनां तदात्रेतारजो
वृत्तिरितिजानीहिहिदेनो यदालोभस्त्वसंतोषोमानोदंभोथमत्सरः कर्मणांचापिकाम्यानांद्वापरंत
द्रजस्तमः यदामायानृतंतन्द्रानिद्राहिंसाविषादनं शोकोमोहोभयंदैन्यंसकलिस्तामसःस्मृतः यस्मात्क्षु
द्रदृशोमर्त्याःक्षुद्रभाग्यामहाशनाः कामिनोवित्तहीनाश्चस्वैरिण्यश्चस्त्रियोसतीः दस्यूत्कृष्टाजनपदा
वेदाःपाषंडदूषिताः राजानश्चप्रजाभक्ष्याःशिश्नोदरपराद्विजाः अव्रतावटवोशौचाभिक्षवश्चकुटुंबि
नः तपस्विनोग्रामवासान्यासिनोत्यर्थलोलुपाः ह्रस्वकायामहाहाराभूर्यपत्यागतह्रियः शश्वत्कटु
कभाषिण्यश्चौर्यमायोरुसाहसाः पणयिष्यंतिवैक्षुद्राःकिराटाःकूटकारिणः अनापद्यपिमंस्यंते
वार्त्तांसाधुजुगुप्सितां पतिंत्यक्ष्यंतिनिर्द्रव्यंभृत्याअप्यखिलोत्तमं भृत्यंविपन्नंपतयःकौलंगाश्चाप
यस्विनीः पितृभ्रातृसुहृज्ज्ञातीन्हित्वासौरतसौहृदाः ननांदृश्यालसंवादादीनास्त्रैणाःकलौनराः शूद्राः ३९

प्रतिग्रहं हि ष्यंति तपोवेषा पन्नीविनः धर्मं वक्ष्यंत्यधर्मज्ञा आरुह्योत्तमासने निःस्पृहं हि ग्रमनसो दुर्भिक्षकरकर्षि
ताः निरन्ने भूतले राजन्नतो वृष्टिभयातुराः वासोन्नपानशयनव्यवायस्नानभूषणैः हीनाः पिशाचसदृशा
भविष्यंति कलौ प्रजाः कलौ काकिणिकेप्यर्थे विगृह्य त्यक्तसौहृदाः त्यक्ष्यंति हि प्रियान्प्राणान्हनिष्यंति स्व
कानपि नरक्ष्यंति वृद्धावस्था विरौ पितरावपि पुत्रा भार्यां च कुलजां क्षुद्राः शिश्नोदरंभराः कलौ न राजञ्जगतां
परं गुरुं त्रिलोकनाथैर्नतपादपंकजं प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाखंडविभिन्नचेतसः अयमर्थः
कलौ जगद्गुरुं हरिं न यक्ष्यंति न पूजयिष्यंति कथंभूतं त्रिलोकनाथैर्नतपादपंकजं यस्तं कथंभूता गुरवः पा
खंडैर्विभिन्नमनस्काः कृतचेतसो येन तेन कलिदोषान्प्रपंच्य प्रस्तुतं तत्फलं सारोपायमाह यन्नामधेयं म्रियमा
ण आतुरः पतन्स्खलन्वा विवशो गृणन्पुमान् विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः पु
ंसो कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः चित्तस्थः चित्ते स्फुरन् अ
यमेवोपायो नान्य इति सदृष्टांतमाह श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा नृणां नाशयति भग
वान्हृत्स्थो जन्मायुताशुभं यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं एवमात्मस्थितो विष्णुर्योगिनाम
शुभाशयं यानं तेनास्मादिसंस्पर्शोद्भवजाते हेम्नो दुर्वर्णं मालिन्यं तत्र हेम्नि स्थितो वह्निरिवेव हरति न तु नीयादिप
वंयोगिनामपि विष्णुरेव पुंसां कलिकृतान्दोषान्हरति योगादिकमित्यर्थः पृथग्देवविद्गुणोति विद्यातपः प्रा
णनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते विद्या
तपः प्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते

राम. ना. ४ 40

विद्याः नानादेवतोपासनाः यस्मादेवं तस्मात्सर्वात्मना राजन्हरिःस्थेयः कृष्णकेशवं म्रियमाणो ह्यवहितस्ततो याति
परांगतिं म्रियमाणैरभिध्येयो भगवान्परमेश्वरः आत्मभावेन यत्संगसर्वात्मा सर्वसंभवः आत्मभावं स्वरू
पं नयति प्रापयतीति कलिं लोतिद्वाभ्यां कलेर्दोषनिधेराजन्नस्तिह्येको महान्गुणः कीर्तनादेव कृष्णस्य
मुक्तबंधः परं व्रजेत् कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात्
युगत्रये ध्यानादिफलं कलौ कृष्णकीर्तनादेव भवतीत्यर्थः एवं सति यत्तत्तमश्लोकगुणानुवादं स
मीयते भीरुणाममंगलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णे परां भक्तिमभीप्समानः इति द्वादशस्कंधव
चनेभ्यः गीतामहात्म्ये गीतायाः श्लोकमात्रेण गोविंदस्य च कीर्तनात् यतिदर्शनमात्रेण सर्वतीर्थफ
लं लभेत् स्कान्दे तत्स्तोत्रे किं किं स्मरामि रघुनाथ कृतं तवायाय हि त्वयत्नमकृतं न महत्तपरार्थजाले यदि स्म
तोसि जगदीश न देवशी घ्रं प्राप्नोसि मे करुणया वद ईदृयाहरे त्वं इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणे
तिहासोक्ते नवयोदशप्रकरणं १३ एवं तावत्कलौ पापहारकत्ववर्णनाम संकीर्तनमहात्म्यमनंतरं इदानीं विष्णु
नाम हि माहूर्तं केवलं तेनाममहात्म्यं पद्मपुराणे माघमाहात्म्ये यमदूतानां प्रति यमोब्रूते श्रूयतामद्भुतं चैत
द्रहस्यं वच्म्यहं तम सततेयमराजस्य सर्वलोकाम्तप्रदं नयतेयमलोकेचनहतान् चोरदर्शनात् पश्य
ति वैन्तवान्स्तेसत्वं समयोदिने प्राहाम्सामप्रमुताभ्रातामादरं हि पुनः पुनः भवद्भिर्वैस्ववांस्तथा ज्ञानेनेतेस्त
मेमगोचराः ये स्मरन्ति सकृत्हूताः प्रसंगेनापिकेशवं तेपि ध्वस्ताखिलाघौघा यान्ति विष्णोः परं पदं दुष्टाचा
रोद्रः कलोपि सदा पापरतो पि वा भवद्भिः सर्वथा त्याज्यो विष्णुं चेद्भजते नरः भजनमाह रामकृष्णेतिरा ४

मेति यस्तु कीर्त्तयेत् ब्रह्महत्यादिपापेभ्यः स मुमान्मुच्यते तत्क्षणात् कृतेनस्य क्रियमाणेऽस्य भविष्यन्निष्यपातकैः न
हिंस्यो हि स्यपोमयैः सह ग्रन्थाविष्णुरवाति एवं भक्तः वैष्णवो यद्गृहे भुङ्क्ते ये वै वैष्णवसंगतिः तेपि वः परिहार्यो
के तस्य गृहे न किल्बिषाः इति वैशंपायनप्राप्तस्मान्मोदं उयरःक्षदा श्रुतान वैष्णवो याति राजधानीयमस्य
न विष्णुभक्तिं विना नृणां पापिष्ठानां विशांवर उपायो नास्ति नास्त्यन्यः संतते नरकार्णवे स्वपाकाललते ने
हेति लोके विप्रमवैष्णवं वैष्णवो यातिहीनोपि पुनाति स्पर्शनादपि नरके ये निमग्नास्तु प्रवेजाये अलह
ये तदैव यान्ति ते स्वर्गं यदा चैनं निरीक्षते हरे गोविंदे ति जपन्मंत्रेऽत्र विक्रियते यदि न नरो नरके पश्यते
वैनत्काम्मेवचं तस्मात् जीविते विष्णुभक्तस्य वर्षपञ्चदिनानि च न तु कल्पसहस्राणि भक्तिहीनस्य केशव
स्थाने वासुदेव विष्णोणां सकान्तत्यानारायणा मत्रविष्णोपास्य कोप्यभाव चक्रगदाधरानैनोति सोऽगम
महस्रन्यासमसकर विकुंदरवते सदीलाविधिविन्यासमयंत्रे द्वादशाक्षरे प्रष्टाक्षरं च मंत्रेण यजपति नरो
नमः तान्दृष्ट्वा ब्रह्महा मेध्यते ते वैष्णवाः स्वयं शो विनस्य क्रिणाभलाया ब्राह्मणाव नमालिनः वसते वैष्
वैलोके विष्णुरूपाणि ते नराः एवं विष्णुभक्तेः फलमनेन वासुदेवशरणं एव सेवयेत् स्मात् बहुनोक्तेन किं वैष्ण
कर्तव्यं पापभीरुणा शरणं वासुदेवे च सर्वपापहरं शुभं हरिप्रणाममाप्नोति तपस्था वरं घोरमरणेपि
जितेन्द्रियः यत्फलं समवाप्नोति नत्वा न गरुडध्वजं कृत्वापि बहुशः पापं नरो मोहसमन्वितः न याति न
रकं नत्वा सर्वपापहरं हरिं एकोपि कृष्णस्य कृता प्रणाम इति मणिस्य दश अश्वमेधो नमस्कारेण योचैये
त् सयोगतिमवाप्नोति न तो क्रतुष्ठातैरपि वह्नितीर्थसहस्राणि ष्ठि तीर्थशतानि च नारायणप्रणाम

राम.
ना.
५१
41

सकलानांहंतिषोडशी नेदनेदनपदांबुजंहृदयेवदनायपरिसादरेमनः मोर्णवविषमोभवार्णवःशूर्णप
वनिखिलोमनोरथः अतसीगुच्छसंकाशंपीतवाससमन्वितं येनमस्यंतिगोविंदंनतेषांविद्यतेभयं प्रण
मस्कृत्वाप्रहृष्टात्मिमनुस्मरंति महतःश्रेयसोमलप्रसवःपुष्पसंनतैः जीवितस्यफलंसाङ्गंनियतेस्मरणेह
देः पृथिव्यांयानितीर्थानिपुण्यपाप्यायतनानिच तानिसर्वाण्यवाप्नोतिविष्णोर्नामानुकीर्तनात् देवेश्व
ह्रैयरंविष्णुंयेप्रपन्नानरोत्तमाः नतेषांयमसालोक्यंनतेवानरकौकसः यदायमलोकदर्शनेनास्ति
नेदानन्त्यासौप्येवर्त्तमानस्यनरकस्यउत्तोदर्शनमिस्पृष्टः इदानीमष्टमेप्रकरणेनावहित्वंमतेपापब्र
ह्महत्याप्रत्स्मरे यावन्नामाष्टकंपातपुहर्षेनहिकीर्तितं अस्मिन्नेवप्रकरणेतान्हष्टाब्रह्महामश्चेत
वक्ष्यतिचाथ रामरामेतियोनित्यंमधुरंगायतिक्षणं सब्रह्महासुरापोवामुच्यतेसर्वपातकैरिस्थक्रमत
लदर्पुलिंगपुराणेसनत्कुमारविनायकसंवाददेवनाख्यानमाह सूतोवाच एकदासुखमासीनौपार्व
तीपरमेश्वरौ अन्योन्यश्लिष्टहृदयौलोकरक्षणतत्परौ इंद्रादिलोकपालैश्चसेवितौचपरापरौ पार्व
तीपरिपृष्टवन्तदानधर्माननुक्रमात् पार्वत्युवाच मन्वाद्यजगतांनाथसर्वलोकमहेश्वर त्वत्प्रसादान्म
याज्ञातंधर्मशास्त्रमनुत्तमं प्रायश्चित्तंतुपापानांश्रुतंसर्वमशेषतः ब्रह्महत्यादिपापानांनिष्कृतिंवक्तु
मर्हसि श्रीमहादेवउवाच शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतमंमहत् सनत्कुमारविप्रेणसंवादंपाप
नाशनं उपविष्टंगणाध्यक्षमेकांतेप्रणिपत्यसः सनत्कुमारःपप्रच्छसर्वधर्मविदांवरं सनत्कुमारउवाच
भगवन्सर्वधर्मज्ञसर्वविघ्नविनाशनं द्विजहत्यामहत्पापंवक्तुमर्हसिमेप्रभो भवद्भिनास्यधर्मस्यवक्तानास्ति ५१

जगद्ध्ये विनायकउवाच साधुपृष्टंत्वयाब्रह्मन्सर्वलोकोपकारकं मयाचिरंकृतंकर्मस्मारितंभवतानघ
पुराहंगजरूपेणजातःपर्वतसन्निभः मत्तोवृन्दान्समन्ताद्यःमुनिहिंसामारभेतदामयामुनिगणाहिंसिता
वहवोवलात् हाहाकारोमहानासीद्ब्राह्मणानांसमंततः तदाहत्यासहस्रेणावेष्टितःपरतोस्म्यहं निः
संतेस्तत्क्षणमासीत्सदेवःपितामम आराध्यजगन्नाथंश्रीरामंसर्वहृत्स्थितं प्रसन्नमकरोद्देवम
अयोरघुनंदनं तदाप्रोवाचभगवान्श्रीरामःपितरंमम प्रसन्नोस्मिमहादेवकिंमांप्रार्थयसेप्रभो दा
स्यामियदभीष्टंतत्त्रिषुलोकेषुदुर्लभं श्रीमहादेवउवाच द्विजहत्यासमाविष्टमुमापुत्रमिमंप्रभो किंपा
पंकुरुदेवेशयथायदस्तिविभातिच तथेत्युक्त्वातदानेनष्टयथावीदितोस्म्यहं तत्क्षणाद्दुःखैश्चेतसोनिर्मल
लत्वान्नैष्ठिकः वहुभिर्गणपपैश्चस्तवानेनप्रणतोस्म्यहं श्रीरामउवाच द्विहत्यासहस्रस्यप्रायश्चित्तेदत्ता
मितेजपन्नामसहस्रंमेहत्याकोटिभिरुत्तमं इतिगुह्यंददौरामःस्वनामसहस्रकं तस्यतद्ग्रहणाद्देव
निःपापोस्मितदैवहि तदाहिसर्वदेवानांपूज्योस्मिमुनिसत्तम नमयेनदधीयानाराघवस्यमहात्मनः
नाम्नांसहस्रंलोकेषुप्राख्यापयमहामते सनत्कुमारउवाच धन्योस्म्यनुगृहीतोस्मिकृतार्थोस्मिगणाधि
पः त्वत्प्रसादान्मयाधीतंरामनामसहस्रकं महादेवउवाच इतिविज्ञाप्यदेवेशंपरिक्रम्यप्रणम्यच तदा
हिसनतेजसास्तोत्रमेतद्वदानने अवाप्यपरमांसिद्धिंपुण्यपापविवर्जितः पार्वत्युवाच श्रोतुमिच्छामि
देवेशात्दहंसर्वकामदं नाम्नांसहस्रंरामस्यत्वद्धृदियद्यस्तिमेदया श्रीमहादेवउवाच शृणुवक्ष्यामिभो
देविरामनामसहस्रके स्तवैकमनालोच्येगुह्यातेरमहत् ऋषिर्विनायकश्चास्यसेनादिछंदः ऋषिन्यासध्यानेकृत्वास्य

राम॰
ज्ञा॰
४२
42

४२

दिनप[illegible]मानेदोनरोवरनिविवयप्रवरमणीयः तिल
स्मपुस्रदनकृसविष्णोरामाभियासभवसागरपात्र
[illegible]नतेनवनाममाला ६ श्रीरामकुसपुरमेश्वरना
रा.म. मथावरानानोदिश्रीरामचरित्रन [illegible] मस्तोय नामभवतजेनजीवजीवकंठेकरोसिसतेनतनाम
बा. नत्मोलवनसमर्थेनोनुसंथाने [illegible] वाणीव रामेसेकीर्तसेकीर्तसेकीर्तसेकीर्तिहव
2 रागपसकुंदनेसुंदरीप्रभतिनि [illegible] इनिव
विसजेनोनपांवसवारामे [illegible] नैवच श्रीरामभजनेकोनुनउपौनुस्याधमः ११ इनिव
कराङ्गमेनसिदयेतिह [illegible] सालिनीनाममाला इगतमनि [illegible] नेलोवानसेवहिना
कुपरानुराद्सात्मर्त [illegible] नि ११ धाहारविंदम [illegible] वेदमपुत्रतेनवा [illegible] मकीर्तिनपरेणाहवक्रोनेन
मितिधाकमानेधोः न [illegible] यारोकमेरतुपनेदामयतमकः १५ इति श्रीरामनाममहात्म्ये [illegible]
नरमनुधाहायुक्ताष्ट [illegible] विराजितेसप्तविंशोत [illegible] प्रकरणे १७ समाप्तम् शुभमस्तु ।।
राजीनसक्रियानरमे
नाहृत्वा रामेति
मातोर्थयोमप्र
सि [illegible] केनहि
[illegible]त्रवथाने [illegible] प
स्वेकाले [illegible] मम
गेम्यना [illegible] प

ज्ञानस्य निवर्तकमिति य[illegible] ज्ञानस्य मार्गमिति नवषष्ठीसमासोऽलुक्: एतस्मान
[illegible]येष्वर्थेयोरपि पायो[illegible]यामार्गोप्यनुप्रयोगायतेः नैवेतितेयांकेष्वयथा
[illegible]कयोतिहिनीयतमा शास्त्रार्थः विचारांतरेणापि निर्वक्ति: अथवा तत्त्वइति नसमभाव
[illegible]मावस्थाने[illegible]तिरामस्तवग्निः अस्तुतिविस्तः सङ्गतिषिद्धावः अनेनाकारो
[illegible]तस्मात् न हि सवानाकस्माद्याचान्नाककत्वमयुक्तं अथवाउक्तानि
[illegible]समारेवंच ध्रुतस्मात् स्वेनोगमात्मन् अज्ञानानामनेकार्थत्वात् अ
[illegible]नाः सप्रकाशं ब्रह्म वक्ति रादी नाविन्यस्य यानेनाश्रयणात् सकारोमा
[illegible]यातर्थं नदेवजगत्कारणमितिमर्थः इतिदुर्वलाधनीयायतिवत्वादिपाद्यः
[illegible]तत्त्वमसि[illegible]इतिमया प्रश्नादिषु वाक्यस्मात् श्रीरामप्रीतयेऽस्तु
[illegible]पूणाम्[illegible] अथ यज्ञानामतवैतन्यरंते येनरोचते २१ रसालफलवत्
[illegible]यत्तं तोषाय कल्पते २२ दुष्टेन्द्रियस्येष्टतमं विषयं कथमस्तु ति
[illegible]वत्सम[illegible]नीयस्मात्पापाहितोयहः तथाकामल रूपोत्यथो
[illegible]यथानराः परिभ्रमंतोऽप्युपरितविंदंत सुवोयतः २५
[illegible]नविदंतिमहादेहावशंवदनात् २६ महामोहविला
[illegible]नेदं चेदस्मा: २७ तदुच्चैलोकाना मेवतेमिहाकंद

रा.म.
क.
2

कथावशान्नोदिशीरामचरित्रनाकलयेत्ः तत्रादावेवैतादृशाचमित्रभाज्ञो भवत्वपरमात्मपरमात्मपरा
भवान्नैकावनसमर्थो तानु सथानेन ज्ञानभाज्ः ध्यानेन निदिध्यासनपरिपर्यायेन परमानन्दमनुभावयेनो वे
रागपदं कुंदनेन सुंदरी प्रभृति विषयपरिवट् अभिलाष विरहे च भजतो पूजनात्तु वंदिन नमस्कारपुरःसरतया
विसर्जनान्तपर्यवसानागमोक्तक्रियासपर्यया परित्यर्येचाभजत् अत्र रामनाम्ना ब्रह्मैवत्र हृत्क्रयोन्नसंपेया प
कराद्भमेन सिद्धं येन त्रिदशीतवाक्यागतपदद्वयाभिहितस्याप्यत्स्य मद्यस्य एतदद्वयस्य संयोगनेत्त
अपराजतुरादसात्मर्नं रूपतादिदार्ष्टांतिकवाक्यगतयोः रामब्रह्मशब्दयोः तृतीयान्तशब्दात्माद्यौ सहीभूता
भिनिधाकुयानयोः ननु प्रभाद्दीनात्तत्त्वे तिद्वप्रमप्रत्ये नोपपद्यते क्रियात्वयानुपादानात् नहि क्रिया
नरमनुपादाय कुलाशकरप्रयोगः तथा सति व्रजतीत्यनुपादाय भवत्वं ततस्यैव केवलस्य प्रयोग प्राप्तेः सैवं
शब्दीन स्यात् क्रियान्तरस्योपादानात् ननु तर्हि कृत्वा शब्दीनीतिवाक्ये पर्यवस्यति एवमप्यनुपपत्तेः प्रभाद्दी
नाकृत्वा शब्दीतिशब्दानार्थे शोनक्रियाप्रतिवेदनात् सहितेन तत्वं यथादिनाशप्रपादीन्प्रभाद्दीनाकृत्वा
प्रागोपांशेयोजयेत् ननु शब्दार्थयोः सिद्धिक्रमनुपादायानुस्यात् तथापि न्यानुपपत्तिः नहि ध्यानेदतयैकावि
बिध कैतर्हि वाचापर्यन्त बपांत्रा पदं क्रिययोरन्यथानैनैव भवति अपितु अन्यथानैनैव भवति अ
नु अन्यथानेन अन्यथानेन च अत एव यो वा पर्यमात्रेणापालिनिःक्ताप्रत्ययेसमासमानकर्तृकयोः
पूर्वकालेत्वाति धर्ममार्गज्ञानमार्गमिति मार्गद्वयमुपायपरः उभयत्रापि कर्मधारयः धर्मस्य मार्गो मा
र्गः ज्ञानस्य वा मार्गश्चेति धर्मशादिहत्वमन्यद्यते ज्ञानवाज्ञाननिवृत्तिः यदाहुः श्रीशंकरभगवत्पादा

3 हेतिरुक्तीश्रवणेतत्संपकरातीत्यत्रतेरासुरेमहीह्यितइत्यत्रतेमकारे चयोजितेस्मातिरामोभवतीति अपरा
नुराजतेर्यातोः रातरेमहीशाहूतातेमकारेयोजितेस्तिभवतीतिपरद्वयगतेनैकैकाक्षरग्रहणेनपदद्वय
तिपाद्योर्थः कथंप्रतिपन्नमइतिचेत् अप्यतरवणसाम्यात्तत्त्वयादितियाक्केदवचनादितिब्रूमः यद्वामं
हीपदगतमकारसंस्पर्शेनरातीतिरामइत्येवनिर्वक्तव्यं नहिरामइत्यत्रसोमकारोनर्थः स्यादितिचेत् तम
स्काराभावेकर्तव्यस्यालाभात् कर्तरिघञ्जोरिकोमकारप्रत्ययोविहितोस्ति अथवारादीतावितियातोः
क्विपिराइत्येवंनिष्पद्यतेमः शिवश्चंद्रमावेधाः वामः शिवश्चंद्रमावेधाइत्यभिधानात् राश्चासौमश्चेतिरामः
शिवाद्यात्मकत्वंसर्वात्मकत्वादेवोपपद्यते विधानेरणामनामनिर्वक्तिरातस्मादितियेनदेतनाराक्षसं
सोद्रेकतोमरणंयातिसरामइत्यर्थः रातसारावणादयः सोद्रेकतः स्वस्वशक्त्याद्यति क्रमदेवमनाइद्रेक
तः आधिक्यात् नहिभगवानेकमात्रात्मान्मानतिलवान् अपितुशक्त्याद्यतिक्रमकरणान्तस्मात् राइ
त्यनेनरातस्मात्स्थतेमइत्यनेनमरणंयातीत्येकदेशेनसमुदायलक्षणावद्भुतमुपलंभात् अथवास्वशा
ब्देनभगवंतमेवपरामृश्यत्सोद्रेकतः सर्वातिशायत्वेनरातसाम्येयंतइतिवाख्येयं ननुचगवनउद्रेको
प्रमाणकः अस्तितिहृदयंगमस्तमितिश्रुतेस्तत्रप्रमाणत्वात्निरुक्तं तेनरमाद रामनामेति अभिरामेणास्
देरेणवशुद्धावात्तस्यरामनामभुविशब्दोपलदितलोकत्रयेप्याते अतएवहर्वमस्कंलोकेष्विविधमेवार्थ
हृदिनिधायकश्चिदाह कवयतिसरामइत्यभिरामेणवपुषानस्वेवोदितः नामधेयंजगहत्स्वक्रेजगदत्र्य
मंमंगलानामितिप्रकारांतरेणापिरामाख्यांनिर्वक्तिरादानात्मादिना चरित्रेनामसदाचारः सवधर्महेतुः

रा.म.
ना.

हृंशारघुश्रेष्ठस्तास्तीकरोम्यधुनापुनः १२ संकर्षणास्तथाख्याहं लीकरिष्यामिशाश्वतं एकमेतत्त्रियोर्यातं स्तुष्टि
स्थितेनतहैतेव १३ शाश्वतेनाक्षरात्मकत्वेनसर्वप्रलयेप्यविनाशि एकस्यैवतत्त्वालौकिकं एकमेवरामेति
नामात्मा निरूपितं प्रयोजनवशान्नहृद्दीनमित्यर्थः इतिरामगीतायांश्रीरामनामव्याख्याने इदानींश्रयर्थवं
णशालोपनिषत्प्रतिपाद्योर्थोलिख्यते चिन्मयेस्मिन्महाविष्णौजातेदशरथेहरौ रघोःकुलेखिलंराति
राजतेयोमहीस्थितः १४ सरामइतिलोकेषुविद्वद्भिःप्रकटीकृतः राक्षसायेनमरणंयान्तिस्वोद्रेकतोथवा
१५ रामनामभुविख्यातमभिरामेणवापुनः राक्षसान्मर्त्यरूपेणराहुर्मनसिजंयथा १६ प्रभाहीनांस्तथा
कृत्वाराज्यार्हाणांमहीभृतां धर्ममार्गंचरित्रेणज्ञानमार्गंचनामतः १७ तथाध्यानेनवैराग्यमैश्वर्यंस्वपू
जनात् तथारामस्यरामोत्वंभुविस्याद्यथातत्त्वतः १८ एतान्मार्कण्डेकानां प्रथमंतेक्रमात्व्याख्यातेलि
ख्यते रघोःकुलेदशरथेचिन्मयेस्मिन्महाविष्णौहरौजातेसतिविद्वद्भिःरामात्मतत्त्वंत्रैलोक्येषुसरामइतिप्र
कटीकृतमित्यन्वयः नायोहरिःरातिददात्यभीष्टंमनसाभीष्टंचस्वकर्मानुसारेणेतिमनुष्याणांनरवदेवमनुष्या
वतारस्यश्रीरामचन्द्रस्यापिप्रसक्तंपरार्तिहरत्वंभावंवारयति हराविति परार्तिंहरतीति हरिःतस्मिन्नभिधेयते
हृदयस्थितिरित्यादिश्रुतिरस्मिन्नर्थेनसंधेया श्रीभागवतेपि लोकत्रयस्यमहतीमहरत्यदार्तिस्ताश्रेभवे
नमनुनाहरिरित्यनुक्तं इति वस्तुतोपिन्नकस्यापिपितरमित्यदर्शयति परमार्थतःकुलरहितस्यापिकु
लजन्मनोश्चाविर्भावकेस्वगताश्चत्वाभिहितं स्मृतिरप्याह चैत्रेचैत्रमासेनवम्यांतुसक्षपदेरघूत्तम प्रा
दुरासीत्स्वयंब्रह्मनरत्वंहिस्वकेवलमिति १९ महीस्थितःसन्राजते महीस्थितःसन्निरतिशयं एतेनरामनाम्नो

भवयितेत्यर्थः स्वप्रकाशज्योतिर्दर्शनेन किं स्यादिति तत्राह यस्त्वेति साक्षात्कृत्येत्यर्थः न हृष्टानस्यापुनरा
वृत्तिर्हि तत्त्वेकथनानन्तरं यतश्चाष्टांकाप्रतिबंधसद्भावादित्यभिप्रेत्य तत्र ज्योतिषि त्री एवमादिमेकला निर्निमि
षमनः सहितेन प्राणवायुना निक्रम्य परमो ऽहमस्मीति भावना भावितः सेतो योगिन रत्नाय यथोक्तं सुषुम्नामा
र्गेण प्रपद्यते तत्त्वत्रयमिदं त्रीणि ज्योतींषि चमुक्ते तानि कानि कथं वा तत्त्वत्रयस्यैकीकरणमित्यपेक्षाया
माह रुद्रो ब्रह्म रुच्यते रेफो विस्नः सोमो मकारः तयोर्मध्यगतो ब्रह्माकारो ऽर विरुच्यते ९ रुद्रादीनां रेफाद्या
त्मकत्वमित्यर्थः रुद्रादीनां रेफाद्यात्मकत्वेपि रेफाद्यात्मकत्वेपि रेफादीनां विजातीयानाम् एवंकरस्तव
त्व प्रतिपादकत्वं न संभवति योग्यत्वाभावादित्याशंक्याह ज्योतींषि कवलीकृत्य त्रीण्याकाशो विभुस्तथा ना
दो ऽभिधते ऽस्मात्तत्त्वमेव परमेश्वरं १० उकाराकारमकारस्वरूपाणि त्रीणि रुद्राद्यादि ज्योतिः स्वरूपाणि ज्योतीं
षि कवलीकृत्यात्मसात्कृत्य नादः स्वयंज्योतिषामधिष्ठानमया स्वरूपभूत एव त्वां निर्दुमं केऽस्मात्तत्त्वमभि
धत्ते अथवा ज्योतींषि कवलीकृत्य स्थिते त्वामभिधत्ते अथवा ज्योतींषि कवलीकृत्य स्थिते त्वामभिधत्ते
त्यर्थः ज्योतींषि कवलीकृतस्य त्र्यक्षीकृतस्य सर्वग्रसिस्तन मुक्तं तस्य भावनार्थं युक्तिमाह मुख्यत्वाद्विश्वबी
जत्वात्तारकत्वान्महेश्वर त्वदंशैः स्वीकृते देवैरस्माभिर्नो मते त्रिभिः ११ मुख्यत्वात्सर्वालयावयित्वेनाद्यत्वा
त्तारकत्वात्प्रकाशकत्वादित्यर्थः हे महेश्वर त्वदंशैः रुद्रब्रह्मविष्णुसंज्ञिकैरस्माभिस्त्रिभिस्त्वदंशत्वादेव देवै
स्तेन न वरामेति नामसंहारस्थितिपालननिमित्ते स्वीकृते यतो नादस्वरूपात्मकस्य नादस्य सर्वग्रसिस्त्वमुचित
मित्यर्थः अस्माभिस्त्वन्नामस्वीकृतमित्युक्तं तत्प्रपंचयति भार्गवाय पुरा भक्त्या सो ऽचक्रे नामैतत्त्रिविधं विष्णु

रा. म.

मायायाःसर्वबीजत्वादित्यर्थः यस्तु तस्य तत्फलार्थिनां तत्तद्बीजप्रक्षेपोपि नापेक्ष्यत इत्याह अचिंत्योयं महाबाहो
मंत्रचिंतामणिर्विभो विहायैनं विमूढात्मन्नन्यत्र धावति ९ अयं मंत्र एव चिंतामणिः संकल्पमात्रेण सर्वकाम
प्रद इत्यर्थः हे महाबाहो मुक्तिप्रद हे विभो मुक्तिप्रद एनं विहाय मूढो लोकस्तत्तुच्छो धावति भूतपिशाचादीनां मंत्रा
न्तरफलाय जपतीत्याक्रोशति परमकारुणिकः शंकरः मूलमंत्रस्य विश्वयोनिबीजमिश्रत्वेन त्र्यक्षितत्त्वस्य मंत्रा
त्मके बीजमिश्रत्वे तत्त्वत्रयमाह अग्नीषोमौ जगद्योनी विंदुनादौ तयोस्तथा तारकस्तदतीतस्तु परमात्मा निरंजनः
९ अग्निरग्निर्बीजात्तरं सोमस्त्वाकारः अग्निश्च सोमश्चाग्नीषोमौ कथंभूतौ जगद्योनी मकारप्रकृतिकोऽनुस्वारो
विंदुः अतएवाद्यहेतुत्वेन शब्दसृष्टेरधिष्ठानभूतः सर्वोत्तरस्थानगतः अकारो नादः विंदुश्च नादश्च तौ यथाक्रमं तयोर्मंत्रा
क्षरोपलक्षितजगद्योनी इत्यर्थः उक्तमंत्रस्वरूपस्यान्योन्यसापेक्षत्वेन कल्पितत्वात्तारकत्वं कथं संभवेदिति तत्रा
ह तारक इति उक्तसमुदायात्मकेन तत्तद्धर्मैर्मात्रात्मकविधानं कार्यं संगृहीतं यत्स्वरूपं तदेव तत्त्वेन तारकमित्यर्थः
तदतीतत्वमुपपादयति निरंजन इति अंजयत्याच्छादयतीत्यंजनं येन तदंजनमज्ञानं तेन निर्गतं यस्मात्स निरंजनः
निरंतर इति पाठे निर्गतमंतरं भेदः सजातीयविजातीयस्वगतलक्षणो यस्मात्स निरंतरः नन्वनादिप्रवाहितस्यैतत्त्व
त्रयस्य तारकत्वाभावेऽपि तत्तारकमुक्तमिति कथमुक्तमित्याशंक्याह तत्त्वज्ञानोपयोगित्वादित्याह तत्त्वत्रयमिदं गुह्य
मेकीभूतं स्वयं महदिति स्वयंज्योतिः प्रपश्यति यत्त्वान्नानिवर्तते ८ इममितिरेफाद्विदलदलं त्र्यग्नि द्विदलं हृद्या
द्विदलदलं चतुर्दिक्स्थितेन त्रिकमध्ये विवदिते गुह्यं संप्रदायहीनैर्बोद्धुमशक्यं एकीभूतं परस्परमभिन्नं भवतीति

5 श्रीवेदव्यासविद्याश्रीजनकेचनद्धामनामवेति श्रीरामेत्येतदेवतारकं अविद्यातत्कार्यनिवर्तक अत्रप्रातिपदिकमेवतार
कत्वेनविवक्षितं असंभावनाविपरीतभावनानिवर्तकयोः श्रवणागमननिदिध्यासनयोः प्रतिपादकेरामरा
मेतिपदद्वयमितिअर्थः ज्ञानकर्मसमुच्चयप्रसंगमोनादिनिषेधद्वारात्रवधारणार्थः हिशब्दः ननुप्रत्यक्ब्रह्मप्रति
पादकस्यवेदान्तवाक्यस्यतारकत्वप्रसिद्धं नतुमन्त्रस्येत्याशंक्याह त्वन्मायामोहिताःसर्वेनत्वांजानन्तितत्त्वतः त्व
दन्यैवविजानन्तिब्रह्मैकेत्वाममेवविद्गिते ३ मन्मायामोहितास्त्वन्तर्हिमांकथंजानीयुरितितत्राह त्वद्भक्तैवेति त्वन्मा
यामोहितास्त्वद्भक्त्याकाम्यनिषिद्धपरित्यागपूर्वकंस्ववर्णाश्रमविहितव्यापारलत्ताएवत्वांविजानन्तितनान्यथायद्वे
न्द्रजालिकमायामोहितास्तत्प्रसादेनैवतत्स्वरूपंजानन्तितद्वदित्यर्थः कीदृशंमांविजानन्तीतितत्राह एकमिति
सजातीयभेदशून्यंवृक्षस्येवविजातीयभेदशून्यंत्वमेवेदमिति स्वगतभेदशून्यमित्यर्थः नन्वेवंमन्मंत्रस्यैवकथंमहावाच
कत्वेविश्वरूपस्यसर्वेशब्दावाचकत्वादित्याशंक्याह विश्वरूपस्यतेरामविश्वशब्दाहिवाचकाः तथापिमूलमंत्रस्तेवि
शेषावीजमतयं ४ यद्यपिविश्वरूपस्यसर्वेशब्दावाचकास्तथापिजगद्बीजस्यतेवजगद्बीजभूतोऽस्यधारणः मूला
मी '' लोरामेतिद्वाक्षरोमंत्रः षडक्षरोवाचकत्वेनयोमयडम्यर्थः अक्षराध्नत्वन्नाम्विवीजस्यकार्योत्पत्तेनासमाश्च
कवविवर्तगोकानिराचष्टेअत्रयमिति ननुमूलमंत्रस्यमुक्तिहेतुत्वेनसाक्षात्कार्यविरोधात्वमेयत्वात्कार्यविरो
धस्यन्याशंक्याह तारादिर्मंत्रकयेरामरमादिरपिमुक्तये वाग्भवादिस्त्ववाक्सिद्धैमायादिरखिलेष्टदः ५ रामे
तिसेवोधनेअत्रमंत्रस्तन्नधगःतारःप्रणवःरमाश्रीवीजं वाग्भवंवाग्वीजं मायाशक्तिवीजंसर्वकामयुक्भवति

रा॰म॰
ना॰

कः श्रीरामभद्रभुवने स्वरतीर्थपादद्वामोदराद्यंधरणीधरकेशवेति विश्वेशवेदयमुनिमानसराजहंसके
ते करोमि सततं नवनाममालां ५। इति श्रीरामनाममहात्म्ये श्रीतिस्कंदपुराणोतिहासोक्ते अचुनाग्रमवि
रचिते षष्टित्रिंशततमे ३५ प्रकरणं पूर्वप्रकरणे सर्वगतस्य हरेर्नाममयं छेत्राह्यमित्युक्तं अतः कारणा
वट्टानीति स्कंदपुराणे निर्वाणखंडे रामगीतायां श्रीमहादेवः श्रीरामनाममहात्म्यमाह यतन्त्रयं अतेनत्र
श्रीमहादेव उवाच मुमूर्षोर्मणिकर्णिकायां नरहोदकनिवासिनः अहं दिशामि ते मंत्रं तारकं ब्रह्मवाचकं १ य
तोहं तवस्तकाले तो मुमूर्षोर्मणिकर्णिकायां तत्राप्यर्होदकनिवासिनोहं विश्वेश्वरस्तव मंत्रं मोहहतं कार्यं इति
वर्तेन तव मेहश्राम्बुपदिशामि किं तत्तारकमित्यपेक्षायामाह श्रीराम राम रामेति एतत्तारकमुच्यते अतस्त्वं
जानकीनाथ परं ब्रह्माभिनिधीयते २ श्रीरामो जगदीश्वरः परमते जगदीश्वरः परमतत्त्वं तेरेवैकाभ्यासेना
त्मयमीज्ञानस्वादिभिर्देहादौ क्रीडतीति रामो जीव इति द्वितीयरामशब्दार्थः देहधर्मैर्नित्यः खादिभिर्दे
हादीनात्मनि रमयतीति वा रामः तृतीयो रामशब्दः ॐकारपर्यायत्वेन वाद्धुतमिदमेवेति तयोरैक्यात्तथा
रणार्थः तत्त्वभावनादेतद्युक्तियोगतत्को हि शब्दः अथवा श्रीरामेति दाशरथेर्नाम द्वितीयरामनामेति जाम
दग्न्यस्य नाम तृतीयं बलदेवस्य नाम तृतीयं बलदेवस्य नाम एतन्नामत्रयं त्रिमात्रकप्रणवापरपर्यायं
परब्रह्मप्रतिपादकत्वेन तारकमुच्यते अथवा रातिस्थावरजंगमविपर्ययं मादिना विषयानिति रा: प्रत्य
गात्मा मनुते विश्वमिति मः परमेश्वरः मापयति विश्वं इदमेतत्परिणामं तावत्प्रत्याक्रमेणाहं कृतभावम
नादिकं नाना खस्मिन्त्रयेशायतीति रामः परमेश्वरः मनुते चवादिकं मिति मो जीवः राश्चासौ मश्चेति रामः

रक्तिस्ततोत्तानेन ततोसाक्षान्मुक्तिर्भविष्यतीति प्रतीयते तन्न एकस्मिन्नेव जन्मनि युगपदेव सर्वं भवे
6 दिति सदृष्टान्तमाह भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः प्रपद्यमानस्य यथाश्नत
स्युः तुष्टिः पुष्टिः क्षुदपायोनुग्रासं प्रपद्यमानस्य नामसंकीर्तनेन निरंतरं हरिकथाश्रवणेन वा हरेर्भजतः पु
ंसो भक्तिः प्रेमलक्षणा परेशानुभवः भगवद्रूपस्य स्फूर्तिः स्यादिति इत्थं सत्यानंदितस्य ततोन्यत्र गृहादिषु विरक्तिरि
त्येष त्रिकः एककाल भजनकाल एव स्यात् यथाश्नतो भुंजानस्य ग्रासं प्रति तुष्टिः सुखं पुष्टिः उदरभरणं क्षु
न्निवृत्तिश्च प्रतिग्रासं स्युः एवं प्रतिलवमेतन्नास्ति कर्मेणमपि तथा सकलसदैव एकमेकैकस्मिन्भजने प्रेमादित्रिकं जा
यमानं स्यात् अनुवृत्त्या भजतः परमप्रेमादिजायते साधनभूयस्त्वे फलभूयस्त्वमिति न्यायात् वहुग्रासभोजिन
इव परमतृप्त्यादिलक्षणं भगवत्प्रसादेन कृतार्थो भवतीत्याह इत्यच्युतांघ्रिं भजतोनुवृत्त्यानेन पादसेवनमुक्तं तदुप
लक्षणं भजनान्येन परमेश्वरप्राप्तौ श्रवणादिभिर्बहुभिः साधनानुष्ठानाभिउदाहृतानि विद्यते नन्त्र कलौस
तह्येतानां लोकानां तानि कर्तुमशक्यत्वात् कीर्तनमेव प्रसेषितेन तु श्रवणादिषु अवतारस्तु येन परमेश्वरेणाहा
कारं येषां तेनभवन्ति तेषां भवतु कलौ तस्माल्लोकराभावात् श्रीरामनामसंकीर्तनस्यैव सर्वोपलक्षणत्व
मस्मात् नामसंकीर्तनेन जनः कृतार्थो भवतीति तथा च स्कंदपुराणे सनत्कुमारसंहितायां यन्नामस्मर
तां पुंसां सद्यो हरति पातकं जायते चात्मसंपूर्णं तत्प्रपद्येन तु प्रभुं ४८ पद्मपुराणे माघमाहात्म्ये प्रयागे
वा प्रयागेवा यन्नामस्मरतां नृणां सद्यो नश्यति पापौघो नमस्तस्मै चिदात्मने ४९ भक्तस्यापि वचनमलि
कल्पोहृविजनेरप्यनिरंतरायणेनिरंतरमितस्ततः प्रलपन् रामकृष्णेति गामप्यिप्सामिवासराव ५ न्नत्मश्रो

रा.म.
मा.

चोग्मादयः सहजा नत धर्माः सत्यादि नि छलमिमिथ्याना निर्हरलोकमलादिहालनादयस्तवांतरधर्माः तथा
भगवत्त्वास्मिन्परमशुद्धसार्थएव सहजो धर्मः पापदयादयस्तवांतरधर्माः तथा सौरपुराणे निरंतरं हन
नापहाराहिषु प्रवृत्तस्मान्यानपि तत्रैव प्रवर्तयेदिति आहारप्रहरेति आदरतो वास्मिन्मात्मायस्यपदानराव
यवत्वेन प्रसंगेनागतानादपिहरप्राप्तात्सर्वोऽपि संहारो वर्णितः तदभ्यासादितर जन्मनि तस्यैव तत्वज्ञानम
पि वर्णितं श्लोकमाह इदं पुण्यमिति ज्ञात्वा कुलं नानेन यद्यपि आहारप्रहरेण्यादिना मसे कीर्तनेन यद्य
पि आहारप्रहरेण्यादिना मसे कीर्तनेन सदा ८२ केचन पुराणेषु चनेषु अनादरं कुर्वंतित दपवादो ना
रदीयपुराणे श्रूयते वेदार्थादधिकं मन्ये पुराणार्थं च भामिनि वेदः प्रतिष्ठितो देवि पुराणे नात्र संशयः
पुराणमन्यथा कृत्वा तिर्यग्योनिमवाप्नुयात् ८३ सुशांतोपि सुदांतोपि न गतिं प्राप्नुयात्क्वचित् ८४
पद्मपुराणे नवदंतिनश्च इति विश्वावीप्राप्यैकथा यत्र मायुर्यशो हतिसंतानं चैव नश्यति ८५
वाचस्मानेपुराणेयेनु भ्रष्टं वितनयधर्माः तेनरानरकं यांति तेषां हासीसदायमः ८६ तत्रैव गंगाया यमु
नाच वेणी गोदावरी सिंधु सरस्वती च सर्वाणि तीर्थानि वसंति तत्र यत्राच्युतोदारकथा प्रसंगः ८७
यत्र हरिकथा वर्तते तत्र सर्वतीर्थफलं भवतीति भावः तत्त्वनामवः पुरुषार्थसाधनत्वं ज्ञानद्वारेण यथा
काशीवासस्यतास्कंदपुराणे पदेशद्वारेणास्तत्वसाधनत्वं काशी विश्वादिषु प्रसिद्धं तत्समभिआरातत्वो
तेन स्यापि नोचेत् अस्यविरोधो तिपरेशो कस्मात्मस्त्रात्मवित् ब्रह्मवेद ब्रह्मैव भवतीति श्रुतिभ्यः ज्ञाना
देव तु कैवल्यमिति स्मृतेश्च विरोधात् किं तर्हि किं यज्जन्मभिः स्थितं तत्पुहितस्मद्यते नेतो भक्तिलवेवि

सर्वविद्भूत्तमे २७ मार्कंडेयउवाच श्रुहषेवास्तदेवंचत्नथासंकर्षणंविभुं प्रतन्मेसंशयंछिंधिनेहिसर्ववि
दुत्तमे मार्कंडेयउवाच शृहषेवासदेवंच शृहषेवासुदेवंचनथासंकर्षणंविभुं प्रद्युम्नमनिरुद्धंचक्र
मादद्धेषुकीर्तयेत् २८ वृलभद्रेनथाकृष्णंसंकीर्तयेदथनहथे माधवंपुंडरीकाक्षंनेथाचभोगशायने २९
पद्मनाभंहृषीकेशंनथादेवंत्रिविक्रमं क्रमेणरामशार्ङ्गलवसंत्तादिषुकीर्त्तयेत् ३० विष्णुंचमधुहं
नारंनथादैवमधोक्षजं वामनंश्रीधरंचैवहृषीकेशंनथैवच दामोदरंपद्मनाभंकेशवंचयदूत्तमे ना
रायणंमाधवंचगोविंदंचनथाक्रमात् ३२ चैत्रादिषुचमासेषुदेवनामानिकीर्तयेत् प्रद्युम्नमनिरु
द्धंचपत्नयोःशुक्लकृष्णयोः ३३ सर्वःशर्वःशिवस्थाणुर्भूतादिर्निधिरव्ययः आदित्यादिषुवारेषुक्रमा
देवंप्रकीर्तयेत् ३४ विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः
३५ अव्ययःपुंडरीकाक्षोविश्वकर्माशुचिश्रवाः संभवोभावनोभर्त्ताप्रभवःप्रभुरीश्वरः ३६ अप्रमे
योहृषीकेशःपद्मनाभोमरप्रभुः अमर्षःशाश्वतोधाताकृष्णस्त्वेतानिकीर्तयेत् ३७ दिवसस्यनामाकृ
ष्णसप्तकृत्तिकादिषुयादव ब्रह्माणंश्रीपतिंविष्णुंकपिलंश्रीपतिंप्रभुः ३८ दामोदरंहृषीकेशंगोविंदम
धुसूदन भूधरंगदिनंदेवंशंखिनंपद्मिनंतथा ३९ चक्रिणंचमहाराजप्रथमादिषुकीर्तयेत् नामानि
सर्वाणिजनार्दनस्यकालस्यसर्वेपुरुषषःप्रवीरः तस्मात्सदासर्वगतस्यनामग्राह्यंयथेष्टंपुरुषर्षभराज
न ४० यथेष्टंदेवदेवस्यसर्वेषांनामयादवे संकीर्त्तयेत्सर्वकालेकालज्ञःपापहर्षयेत् ४१ एवंचाप्रमेया
प्रपरमस्यायेनपापतयोभविष्यति नेवतिकाचनभीतिःमृत्युर्यमहृष्टांतमन्यचाने यथामायार्थहृत

रा.म.
ना.

इत्येतन्नामसहस्रनामकीर्तनगीतादिपंचरत्नोनामस्तिकुरुष्वे गीतागीतायायापार्थसर्वार्थमोहविनाशिनी निम्
लयतिपापानिशुभाशुभकृतानिच १३ गीतानामसहस्रेवस्तवराजोह्यनुस्मृतिः गजेंद्रमोक्षणंपार्थपंचना
रायणात्मकः नराकरोतिसदानित्यंपठितेस्तुतिपंचकं पंचानांफलमाप्नोतिसहस्राख्यस्यकीर्तनात् १५
तस्मान्नामसहस्रंहिपठितिनित्यंसदाकलौ अष्टादशपुराणानांसारमेतद्युधिष्ठिर १६ यथाहितवचाख्यो
वेदिव्यंनामसहस्रकं गृहजातिविधेर्दोषैर्नलिप्यतिकदाचन १७ मत्प्रसादान्नसंदेहोमातृमातापिता
इव यस्मिन्गृहेचलिखितंयत्रतिष्ठतिनित्यशः १८ पार्थनामसहस्रंमेन्नयेनदेहस्थंवसेद् २२ लिखि
तापुस्तकेयस्याभ्यपूज्यंनामसहस्रकं १९ वैष्णवःसतुविज्ञेयोमद्भक्तोममवल्लभः सालिग्रामशिलाग्रेषु
पूज्यंनामसहस्रकं २० गृहजातिविधेर्दोषैर्नलिप्यतिकदाचनमत्प्रसादान्नसंदेहोमातृमातापिता
इव २१ यस्मिन्गृहेचलिखितेयत्रतिष्ठतिनित्यशः पार्थनामसहस्रंमेन्नयेनदेहस्थंवसेद् २२ लिखि
तापुस्तकेयस्याभ्यपूज्यंनामसहस्रकं वैष्णवःसतुविज्ञेयोमद्भक्तोममवल्लभः २३ सालिग्रामशिलाभावे
पूजितंचिवैष्णवे २४ युधिष्ठिरउवाच यथाहंपुंडरीकाक्षयस्मिमेभगवान्नामानि अनुग्राह्योस्मियेनाहंत्वयाना
थेनकेशव २५ नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत त्वयानाथेनगोविंदयास्यामःपरमंपदं
२६ इतिमहाभारतोक्तसहस्रनामकीर्तनरूपंप्रायश्चित्तं इतिशुद्धप्रतिज्ञातभारतेतिहासोदर्शितोस्मा
नवोवुधेः अथवाभगवन्नामकीर्तनंमविस्मृधर्मोनरैर्मेवस्त्रायन्नक्रतमासपरित्वतिथवारतहेत्र
युविशेषोदर्शितः वसिष्ठउवाच कस्मिन्कालेनरैर्वस्यकिंकिंनामप्रकीर्तयेत् एतन्मेसंशयंछिंधित्वंहि

8

त्वकिं तेन कृतं ५७ भेदग्रहेनास्तियत्रूपदेशो न वापि शास्त्रेन च वेदवाक्यं सर्वं संस्कारकृते विपाके पश्चा
दिलोकालसदाभजेति ५८ इति श्रीरामनाममहात्म्ये श्रीस्मृतिपुराणे निद्राप्तोके श्रच्युताश्रमविरचिते च
तुर्विंशत्प्रकरणं २४ अनेन प्रीयतां रामः परमात्मा ममानतः ॥ अतन्सकीर्तनामार्पणामस्तु पूर्वप्रकारेणा
ते भारताध्ययनानुग्रहादर्पितादमथोच्यते ॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः सर्वकं दृढीकरणार्थं श्री
महाभारते लोके सहस्रनामरूपं प्रायश्चित्तमुच्यते तत्र युधिष्ठिरः श्रीकृष्णं पृच्छति निवृत्ते भारते युद्धे भीष्मे च
निधनं गते हतेषु कौरवेष्वेकर्णे निवृत्ते च सुयोधने १ तदा युधिष्ठिरो राजा कृष्णं प्राह कृताञ्जलिः पतेषाह
न नास्ति पापं प्रायश्चित्ते वदाच्युतो २ श्रीकृष्ण उवाच विष्णोर्नामसहस्रं चास्ते भारते मुनिसत्तम ऋषिभिश्च
पुराणैश्च सिद्धैर्देवैर्नमस्कृते ३ यो नरः पठते नित्यं त्रिकालं केशवालये द्विकालमेककालं वा दोषा नश्यन्त्व
पोहति ४ दोषानाह ब्रह्महत्यादिपापानि यानि कामकृतानि च विलयं यान्ति कौन्तेय यथाग्नौ पापस्य
काकयो ५ वेदानां च यथा सामगायत्र्याश्च यथापिता द्विपदानां च यथा हरिः ५ गवां च कपिला यद्व
दाश्रमाणां यथा यतिः एकादशी व्रतानां च पितृमेध कृतानां यथा ७ पतिव्रता यथा स्त्रीणां यात्रानां कांच
ने यथा वैश्वदेवं यथाश्रेष्ठं मोचका नां च यथा निधि ८ ग्रहाणां च यथा सूर्यः पर्वाणां च यथा सूर्यः पर्वा
णां द्वादशी यथा तथा शास्त्रेषु सर्वेषु पठन्नामसहस्रके ९ सांगाश्च चतुरो वेदाः पुराणानीह चैकतः वि
ष्णोर्नामसहस्रस्य कलां नार्हन्ति षोडशी १० वेदशास्त्रे गृहीतेषु सर्वमाश्रमयेषु च उःस्वप्नदर्शने चैव प
ठेन्नामसहस्रके ११ सहस्रनामके हि पठने नैव दृश्यते कलौ प्राप्ते विशेषेणानामन्ते समारभेषजे १२

रा॰म॰
मा॰

मार्गादिसंकटे १९ अथ कारेवलीबंधेचनरसिंहमनुस्मरेत् तरताखिलदुर्गाणि नाशयेज्जलप्लाविते २० ग
रुडध्वजानुस्मरणाद्विषवीर्यंप्रणश्यति स्नानेदेवार्चनेहोमेप्रणिपातेप्रदक्षिणे २१ कीर्तयेद्भगवन्नाम
वासुदेवेतितत्परः स्थापनेवित्तधान्यादेरपध्यानेचदुःस्वप्ने २२ ऊर्वीनततमनाभस्तात्रानेतच्युतकीर्तने
नारायणंशार्ङ्गधरंश्रीधरंपुरुषोत्तमम् २३ वामनंखड्गिनंचैवदुःस्वप्नेषुचसंस्मरेत् एकार्णवादिपर्यंकशा
यिनंतद्धरिंसंस्मरेत् २४ वायाग्निस्त्हदारागहादिषुवृद्धिस्वचितमोहादिविभ्रान्तिवेणाघूर्णितमानसःमनु
ष्यामुनिशार्दूलसदास्महरिंसंस्मरेत् २५ बलभद्रंसमुद्रार्थीसारकर्मणिकीर्तयेत् जगत्सृतिमपत्या
र्थीलवन्भक्त्यानसीदति २६ नपुत्रंसम्प्रभाञ्च देवदेवंचसत्तम देपयोरात्मसेवंचोमविवाहोभ्युपुत्रः
पुत्रः २७ श्रीशंसर्वाभ्युदयिकेकर्मण्येवप्रकीर्तयेत् अमोघार्थंमुशोषप्रअशोकेचसदाजपेत् २८
महत्मनापाग्निजलवंधनादिषुमस्तुषु स्तनेवपरतंत्रेषुवासुदेवंजपेद्बुधः सर्वार्थशक्तियुक्तस्यचक्रि
णः यहाभिरोचनंतनामतत्सर्वार्थेषुकीर्तयेत् ३० सर्वार्थसिद्धियुक्तेषुतस्माम्नामेकार्थतायतः सर्वाण्येता
निनामानिपरस्यब्रह्मणोनहि ३१ एवमेतानिनामानिवासुदेवस्यकीर्तयेत् सर्वार्थसिद्धियुक्तेषुना
म्नामेकार्थतायतः ३२ सर्वाण्येतानिनामानिसमाराध्यजगद्गुरु तन्मयत्वेनगोविंदमित्येतद्धात्मना
नघा ३३ तन्मनोवांछितान्कामान्नरंचाप्नोतिमानवः प्रेताश्चैवपिशाचाद्याःकूष्माण्डाग्रहराक्ष
साः ३४ हरादेवपलायतेनाममंत्रप्रभावतः मालिन्यमपिसंकार्यंयच्चयावच्चदूषणं ३५ सर्वं
विलयमाप्नोतिरामममंत्रेणकीर्तिते ग्रहव्याधिजदोषाश्चनियतातिक्रमोद्भवाः स्त्रीणांचपुरुषाणांमू
मंत्रेणानेननाशिताः ३७ येषुयेषुपिदेशेषुरामःपरमुपास्यते दुर्भिक्षदैन्यदोषाश्चनभवंतिकदाचन

9

नापिसमस्तपुरुषार्थसिद्धानीतिदर्शितं पुलस्त्योवाच एकमेवसमस्तस्य ब्रह्मणोवाद्विजोत्तम नाम्नांबहूनांलोका
नामुपकारकरंशृणु १ निमित्तभेदात्क्रियोनाम्नांभेदःसुदीरणात् विभिन्नान्येकसाध्यानेफलानि द्विजस
त्तम २ यत्कृतिनामयत्नस्यतत्तस्मिन्नेववस्तुनि साधनंपुरुषव्याघ्रसौम्यफलैरेषुवस्तुषु ३ वासुदेवाच्युतानंतसमा
जपनृहरेर्नामभिः परमात्मेश्वराद्यैस्तुतेनामभिरच्युत ४ निमित्तमावंभगवान्विमुक्तेर्याम्ययोतथा मुकार्यसंसि
यथ्रत्नमेनिशामय धर्मकृद्धर्मकृद्धर्मीधर्मात्माविषकृत्कतुःविः शुविषद्विस्तरश्चातःपुष्करादोग्नयोतज्ञः ५
शुचिश्रवाःशिपिविष्टाध्यक्षेशोयज्ञभावनः नाम्नामिमेवमादीनामुच्चारणेननरः ६ धर्ममहानमाप्नोति
पापंवंधयतेतथा नद्यार्थेप्राप्नुयेच्चमानदेवनामानिमेशृणु ७ एषांसमुच्चारणतोविनमाप्नोतिभक्तिमा
न् श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीनिकेतनः ८ श्रीयःपतिश्रीपरमःश्रीमान्श्रीवत्सलांछनः नृसिं
होद्भुतधामनोजयोविष्णुस्त्रिविक्रमः ९ स्तुतःप्रद्युम्नेचार्थमेवमादिभिरच्युतः कामःकामप्रदःकांतःकामपाल
स्तथाहरिः आनंदोमाधवश्चैवकामसंसिद्धयेनृप रामःपरशुरामश्चनृसिंहोविष्णुरेवच ११ त्रिविक्रमश्चैव
मादिजप्यवरिजिगीषुभिः विद्याभ्यसनानित्यंजप्तव्यःपुरुषोत्तमः १२ दामोदरंवंधगतोनित्यमेवज
पेन्नरः केशवंपुंडरीकाक्षंपुष्करादेतथाजपेन् १३ नेत्रबाधासुसर्वासुहृषीकेशंभयेषुच अच्युतंचामृतं
वामृंचैवजपेदौषधिकर्मणि १४ भ्रातिसुसमग्निहोत्रेचजपेदालेवनाश्रितः संग्रामाभिमुखोगच्छन्तंस्म
रेदपराजितं पातालेनारसिंहंचजलप्रभवतोस्मरेत् चक्रिणंगाद्दिनंचैवशाङ्गिंणंखड्गिनंतथा १५ क्षेमार्थेप्र
विशन्मार्गादिक्षुसंस्मरेत् अजितंतवर्वितंचैवसर्वंसर्वंश्वतथा १६ संस्मरेत्पुरुषोभक्त्याव्यवहारेषुस
र्वदा नारायणंसर्वकालंतप्रस्खलनादिषु १७ ग्रहनक्षत्रपीडासुदेवावाधाटवीषुच दस्युवैरिनिरोधेषुसिंह

रा॰म॰
ना॰

लोकेतुपरांतकालेपरामृतात्परिमुच्यंति सर्वे माद्दिश्य ति म्यश्च ज्ञानादेव तमोक्ष यः शूद्रः श्रद्धया यश्च सुखमवा
प्नुयादिति व्यवहितेन संबंधः स्रगानिसिताश्चवणाद्भक्तियोनिरिति श्रीहरिवंशवचनात् श्रावयेच्चतुरोव
र्णानिति महाभारतवचनात् ननु शूद्रः कीर्तयेदिति तथा च श्रुतिः तस्माच्छूद्रो यज्ञेनवक्लृप्त इति श्रुते नक्रोधो
नचमात्सर्यं न लोभो नाशुभा मतिः भवंति कृतपुण्यानां भक्तानां पुरुषोत्तमे ४८ कृतं पुण्यं यैस्ते सहमन्यात्
इमंस्तवमधीयानस्य श्रद्धाभक्तिसमन्वित युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः ४९ इमंनेनमहत्त्वशा
स्त्रेणसर्वंतेनभगवताश्रीकृष्णद्वैपायनेनमहात्मनारायणेनकृतमितिसर्वैमासदंश्रुत्वापठितंचसर्वंफलेसि
द्धेयइतिदर्शयति विश्वंविश्वेश्वरमजंदेवंजगतःप्रभवाप्ययं भजंतिये पुष्कराक्षं न ते याति पराभवं ५० इत्या
दिनाविशेषणोपासकाः सोनाथः सोपन्यासः कृतकृत्याइतिदर्शयति प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुच
स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ५१ आदरेणयथास्तौतिधनवंतंधनेच्छया तथाचेद्विश्वकर्तारं
कोनमुच्येतबंधनेच्छया तथाचेद्विश्वकर्तारंकोनमुच्येतबंधनात् ५२ आलोड्यसर्वशास्त्राणिविचार्यचपुनः
पुनः इदमेकंसुनिष्पन्नंध्येयोनारायणस्सदेति ५३ श्लोकंवाप्यनुगृहाणोतेश्लोकार्द्धंश्लोकमेवच स्य
पिपाठेयःपठेन्नित्यंनचिराद्भारतोभवेत् ५४ अत्रोपनिषदंपुण्यंकृष्णद्वैपायनोभवेत् भारताध्ययनात्पु
ण्यादपिपाठमधीयतः ५५ अहत्यानसमनर्थंपतिसर्वपापात्प्रमोचयतः समाधिसंपन्नस्युक्तैर्ध्येयोयः पुरु
षोत्तमः ५६ तस्मैनमोस्तुकृष्णायसंसारक्लेशहारिणे स्वकृतश्लोकः यदिमयपरमात्मासरामभवंद्रोह
यावान्भवतिचदितांशानाममात्रेणतस्य ध्रुवतनकयदीतिद्राजेषुव्योम्नस्यैवनपरमगतिमवाप्रसाल

10

३८ एतेन तुष्टो वरदो ह्यनाथनाथो भक्तवत्सलः अनेन सदृशो मंत्रो जगत्स्वपि न विद्यते ३९ अनेनाराधितो रामः
प्रसीदत्येव सत्वरं ददात्यायुष्यमैश्वर्यं समानेनान्यतामपि ४० यद्यन्यमन्त्रमार्गेण नामाराधनतत्परः स
कामो भुक्तिमाप्नोति निष्कामो मुक्तिमाप्नुयात् ४१ प्राप्नोमि भयकामश्चेद्भुक्तिं मुक्तिं न संशयः यद्यदिच्छति
यान्निजं तं यश्वाति परिकीर्तयेत ४२ नाम्न भं प्राप्नुयात्किंचित्सोमन्त्रेऽहं च माप्नुयात् परलोकमनन्ता
यिप्यति न ह्यासादिव इमुष्य प्राप्य भावे म च यितं त्रमन्त्रेस्मके वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो वि
जयी भवेत् वैश्यो धनसमृद्धः स्यात्सुखमवाप्नुयात् नानाम्नुपनिषदांश्चेत्र ह्म गच्छतीति वेदान्तगः किं जप
न्मुच्यते नेन जन्मसंसारबंधनात् जपेन कर्मणा सार्ता मुक्तिं शक्या कर्मणा सा त्वान्मोहनं तं उक्तं च कषा
यपंक्तिः कर्माणि ज्ञानेन तु परमा गतिः कषाये कर्मभिः पक्वे ततो ज्ञाने प्रवर्त्तते ४३ नित्यज्ञाने समासाद्य न
दैवधान्मनुच्यते धर्मान्सर्वं च ज्ञानान्मोक्षाधिगम्यते ४४ योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये कर्म
णा बध्यते जंतुर्विद्यया च विमुच्यते ४५ तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः यथोक्तान्यपि कर्माणि
परिहाय द्विजोत्तम ४६ आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ४७ वेदाभ्यासो नाम प्रणवाभ्यास
स्तदर्थः इत्यादि स्मृतिभ्यः श्रुतिभ्यश्च तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाना-
शकेन यजेनाथि द्वाविरोमेनानुपहतमनाप्व भवति ब्रह्मविदाप्नोति परं तरति शोकमात्मवित् ब्रह्म
वेद ब्रह्मैव भवति ब्रह्मैव सन्ब्रह्माप्येति तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय आनंदं ब्र
ह्मणो विद्वान्न बिभेति कुतश्चनेति वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्म

रा.म.
ना.

तिस्समाराध्य जगद्गुरुं ४२ तस्माद्यत्नेन गोविंदं स्मरेत तदाख्यनामधा तस्मयो वांछितान्कामान्प्राप्नोति मानव ४३
इति गौतमः सर्वमंगलस्थितं ये धीमामजन्त्येकत्वमास्थितः सर्वथा वर्तमानोपि स योगी मयि वर्तते ४४ इति चास्यस्त
नावुक्तं यत्र यत्र परावादो विदावापि प्रवर्तते कर्णौ तत्रापि धातव्यौ गंतव्यं वा ततोन्यतः ४५ तस्माद्दूरे वाचार्यं त्रू
पेणावतिष्ठतीति कामायणोक्ति वरं हुतवहज्वालापंजरांतर्व्यवस्थितिः नशौरिनामविमुखजनसंवासवैशस
न ४६ इति यत्र देवनिंदा न तत्र वासः कर्तव्यः श्रुतिश्च यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता
ह्यर्थाः प्रकाशंते महात्मनः ४७ इति ह्येतस्योपराभक्तिकर्तव्येति मेघवदन वल्मीकवासिनौ रसनोरसी यान
गोविंद गोविंद गोविंदेति प्रभाषते ४८ पापवल्लीमुखे तस्य जिह्वारूपेण तिष्ठति यान वक्ति दिवारात्रौ भरुणानो
विंदसंभवान् ४९ एवमादिवचनैः श्रद्धाभक्त्योरभावेपि नामसंकीर्तनेन समस्तंदुरितं नाशयतीति मंतव्यं किमुक्त
के कि मे के देवतं लोके किं वाप्येकं परायणं यतः सर्वाणि भूतानीति यत्र प्रश्ने तन्हि प्रश्ना हूतोक्तमिति आख्या
ते तत्किमित्याकांक्षायां महाविष्णुरिति तथा च ऋग्वेदे अस्य जानंतो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भ
जामहइत्यादिवाक्यैर्विष्णोर्नामसंकीर्तनेन सम्यग्ज्ञानप्राप्त्ये विहिते स्कंदे श्लोकः तरिष्यामि तरिष्यामि तरिष्या
मि भवार्णवे रामसंकीर्त्य संकीर्त्य संकीर्त्य संकीर्त्य संकीर्त्य संकीर्त्य हनुमत्प्रणयः ५० श्रीरामं परमानंदं स्वज्ञानात्
हेतनाशनं अनाद्यविद्याविद्योऽयाविद्याविष्णुपाहिमां ५१ इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणेतिहास
सोत्तेश्च्युतास्वमविरचिते त्रयोविंशतमप्रकरणं २३ अत्र एकैकनामजपस्य विशेषफलसाधनत्वे सर्वफलसा
धकत्वे च साक्षात्प्रतिपादयतः श्रीविष्णुधर्मस्याध्यायैकदेशस्य सहस्रनामव्याख्यानिपठने सहस्रनामसंकीर्तने

वविसर्यंतोयंविश्वरूपपृथक् २५ एवंज्ञातेसभगवाननादिःपरमेश्वरः प्रसीदत्यच्युतस्तस्मिन्प्रसन्नेक्लेशसं
क्षय इति २८ गीतासु बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमितिसमहात्मासुदुर्लभ इ
तिसोमानांक्तिभिश्चहिंसारहितेनस्तुति नमस्कारादिकर्मेमितिदर्शयितुंविश्वशब्देनब्रह्माभिधीयत इ
तिवा मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जित इतिवैस्नवे नचलतितिनिजवर्णधर्मतोयःसममतिरात्म
सुहृद्विपक्षपक्षे नहरतिनहंतिकिंचिदुच्चैःस्थितमनमनसंतमवेहिविस्नुभक्तं विमलमतिरमत्सरः
प्रशांतःशुचिचरितोखिलसत्वमित्रभूतः प्रियहितवचनोस्तमानमायोवसतिसदाहृदितस्यवासुदे
वः यमनियमविधूतकल्मषाणाममनुदिनमच्युतसक्तमानसानां अपगतमदमानमत्सराणांत्य
जेभटदूरतरेणमानवानां इत्यादिवचनैर्वैस्नवस्यैवप्रकारत्वाद्धिंसादिरहितेनविष्णोःस्तुतिनम
स्कारादिकर्तव्यमिति श्रुतिश्च अश्रद्धयादेयंश्रद्धयादेयंश्रद्धयाग्निःसमिध्यत इत्यादि अन्यत्रापि
श्रद्धापूतेनवदान्यस्यहतमश्रद्धयेतरत् इमंस्तवम धीयानःश्रद्धाभक्तिसमन्वितः ३७ पुण्येमहेषणायस्य
मद्भक्तद्वेषिणांतथा क्रयविक्रयसक्तानांप्रणम्यत्वाग्निहोत्रिणां ३९ अश्रद्धयाचयद्दानंदत्तंनायजतां
तथा नतस्यैवैनवदेत्सैद्धमन्त्रमादाद्धविष्यति इति ३९ गीतासु अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् अ
सदित्युच्यतेपार्थनचतत्प्रेत्यनोइह ४० इत्यादिस्मृतिभ्यश्च श्रद्धयास्तुतिनमस्कारादिकर्तव्य महाभा
रते कर्मकांडे नाविष्णुःकीर्तयेद्विष्णुंकीर्तयेद्विष्णुनाविष्णुविष्णुमर्चयेत नाविष्णुःसंस्मरेद्विष्णुनावि
ष्णुर्विष्णुमाप्नुयात ४१ इतिविष्णुधर्मोत्तरे सर्वतोपनानिनामानि परस्यब्रह्मणोनच सर्वान्कामानवाप्नो

राम
ना.

ज्ञानविशेषं तावन्मन्येन लभ्यते १८ यद्यदेवाभिमतानि देयं कुर्वन्निवेदनं योऽयमस्योनित्योदेनमाप्नोति
वमनीषिणः १९ एते भिन्नदृशां दैत्या विकल्पाः कथिता मया कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम २०
विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः २१ समुत्सृज्यासुरं भावं
तस्माद्यूयं तथा वयं प्रयत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिं २२ सर्वत्र दैत्याः समतामुपेत समत्व
माराधनमच्युतस्य नैतन्मन्त्रादिकृतं तात न च नैसर्गिको मम प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि
२३ अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा तस्य पापागमस्तात हेत्वभावान्न विद्यते २४ कर्मणा मन
सा वाचा परपीडां करोति यः तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभं २५ सोऽहं न पापमिच्छामि न करोमि
वदामि वा चिन्तयन्सर्वभूतस्थमात्मन्यपि च केशवं शारीरमानसं दुःखं दैवं भूतभवं तथा सर्वत्र शुभ
चित्तस्य मे जायते कुतः २७ एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं ह
रिः २८ सामदाने हये चाद्ये भेददण्डौ तथापरौ उपायाः कथिता ह्येते मित्रादीनां च साधने २९ तानेवाहं न
पश्यामि मित्रादीनां च साधने २९ तानेवाहं न पश्यामि मित्रादींस्तात मा कृतः साध्याभावे महाबाहो सा
धनैः किं प्रयोजनं ३० सर्वभूतात्मके तात जगन्नाथे जगन्मये परमात्मनि गोविन्दे मित्रामित्रकथाः कुतः
३१ जडानामविवेकानामशूराणामपि प्रभो भाग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ३२ तस्माद्यते
त पुण्येषु य इच्छेन्महतीं श्रियं यतितव्यं समत्वे च निर्वाणमपि चेच्छता ३३ देवा मनुष्याः पशवः पक्षिवृक्ष
सरीसृपाः रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितं एतद्विजानता सर्वं जगत्स्थावरजंगमं द्रष्टव्यमात्म

12 सत्यकर्म परं चापरं च ब्रह्म यदोंकार इति उपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभिध्या
यीत ॐकार एवेदं सर्वमिति ओमित्येतदक्षरमिदं सर्वमित्युपक्रम्य प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतः अपूर्वो
ऽनन्तरोऽवाह्योऽनपरः प्रणवोऽव्ययः सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च १ एवं हि प्रणवं ज्ञात्वा व्याप्नु
वते तदनन्तरं प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितं सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति अमात्रो
ऽनन्तमात्रश्च द्वैतस्योपशमः शिवः १२ ॐकारो विदितो येन स मुनिर्नेतरो जन इत्येषा माण्डूक्योपनिषदि
ॐ तद्ब्रह्म ॐ तद्वायुः ॐ तदात्मा ॐ तत्सत्यं ॐ तत्सर्वं ॐ तत्पुरोर्नमः इति श्रुतिभिः गीतास्मृति ओमित्ये
काक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः १३ प्रणवः सर्ववेदेषु गिराम
स्म्येकमक्षरं आद्यं तमक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता १४ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॐकारस्य
गीतारं तस्माद्ब्रह्माद्ध्येयमाणाः तत्वादि प्रतिपद्यते विकल्पश्चात्मनो कृत्वा वैलौकिका वाचो व्यावर्तन्ते प्रणवा
द्यास्तथा वेदाः प्रणवे पर्यवस्थिताः वाङ्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत् १५ इत्यादिस्मृतिभिश्च वि
श्वशब्देनोंकारोऽप्यभिधीयते वाच्यवाचकयोरत्यन्तभेदाभावाद्विश्वमित्योंकार एव ब्रह्मेत्यर्थः श्रुतिश्च
सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेति अयमर्थः यस्मात्सर्वमिदं विकारजातं ब्रह्म तज्जत्वात्तल्लय
त्वात्तदनत्वाच्च न च सर्वात्मनि रागादयः संभवन्ति तस्माच्छान्त उपासीतेति श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्य
तां आत्मनः प्रतिकूलानि परेषां न समाचरेत् १६ गीतासु आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सु
खं वा यदि वा दुःखं स योगी परमो मतः इति १७ अन्यत्रापि निर्गुणः परमात्मा त्रिदेहान्निष्पन्नस्तिष्ठति न मह

यः समुद्राश्च स एव सर्वं यदत्ति यच्चात्ति च विप्रवर्येति ७ भगवद्गीतासु आदिमानामदे विष्णु रित्यारभ्याथवा
बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इत्येतेनेति भगवद्वचनात् श्रुति
रपि ब्रह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदं सर्वमित्यादि विश्वादिशब्दानां पुनरुक्तानामपि वृत्तिभेदेनार्थभे
दात्पौनरुक्त्यमर्थैक्ये पुनरुक्तिर्दोषाय नाम्नां सहस्रस्य किमेकं दैवतमिति पृष्टे एकदेवताविषयत्वात् यत्र
पुंलिंगशब्दप्रयोगस्तत्र विष्णोश्च यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवताविशेष्या यत्र नपुंसकलिंगशब्दप्रयो
गस्तत्र ब्रह्मविशेष्यं यतः सर्वाणि भूतानीत्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदैवतत्वेनाभि
हितत्वादादौ उभयविश्वं ब्रह्मविशेषणत्वेनोच्यत इत्याह विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः भूतकृद्भूत
भृद्भावो भूतात्मा भूतभावनः ८ विश्वस्य जगतः कारणत्वाद्विश्वमित्युच्यते ब्रह्मादौ विश्वमिति कार्यशब्देन कारणग्र
हणं कार्यभूतविराजादीनामनुपलब्धत्वास्तीति विश्वमिति तदुपनिषद्यद्वा परस्मात्पुरुषान्नभिन्नमिदं विश्वं परमा
र्थतः तेन विश्वमित्यभिधीयते ब्रह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदमित्यादिश्रुतेस्तद्भिन्नं न किंचित्परमा
र्थतः तेन विश्वमित्यभिधीयते यद्वा ब्रह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदमित्यादिश्रुतेस्तद्भिन्नं न किंचित्प
रमार्थतः सदस्ति अथवा विशतीति विश्वं ब्रह्म तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः किंच संहृतो विशंति
सर्वाणि भूतान्यस्मिन्निति विश्वं ब्रह्म यत्प्रयन्त्यभिसंविशंतीति श्रुतेः नाचिकेतोपलेदृष्ट्वा अन्यत्र धर्मा
दन्यत्राधर्मादित्यारभ्य सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदंति यदिच्छन्तो ब्रह्मचर्यं चरंति तत्ते पदं
संग्रहेण ब्रवीम्योमित्येतत् एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ९
ओमिति ब्रह्म ओमितीदं सर्वं तथा यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारः सर्वा वाक् संतृण्णानि पतदे

13

हरयेनमः ७ इतिश्रीरामनाममहात्म्येक्तानिस्रतिपुराणेतिहासाक्तेश्चनुनाश्रमविरचितेद्वोत्रिंशतमेप्रकर
णं ३२ तस्यलोकप्रधानस्यजगन्नाथस्यभूपते विष्णोर्नामसहस्रंमेशृणुपापभयापहं १ तस्यकालादिनस्यैक
नस्यलोकप्रधानस्यलोकहेतुभिः प्रतिपाद्यस्यजगन्नाथस्यजगतोनाथस्यजगतोनाथस्वामीमायाशबलःपर
मात्मा तस्यभूपतेविष्णोर्व्यापनशीलस्यनाम्नांसहस्रंमेश्रुणुभक्तमेक्तानेपापंसंसारलक्षणंभयंपापंभयंचापहं
तीतिमेमतःश्रुणुमेकाग्रमनाभूत्वाःकथारेमध्येविष्णुधर्मोत्तरेच एकस्यैवसमस्तस्यप्रेष्ठज्ञाणोद्विजसत्तम
नामत्रावकृतंलोकानामुपकारकरंशृणु २ विभिन्नशक्तयोनाम्नांभेदिनस्तद्दीरणान् विभिन्नशक्तयोनाम्नां
भेदिनस्तदुदीरणात् विभिन्नान्येवसार्थानेफलानिद्विजसत्तम ३ यस्यक्तिनामयत्नस्ततस्मिन्नेववस्तुनि
सायकंपुरुषंप्राहुःसोमक्तरेवचवस्तु ४ इतिविष्णुधर्मवचनाद्यपिपरस्यब्रह्मणःशक्तिक्रियाजातिरूढानां
शब्दप्रवृत्तिहेतूनांनिमित्तिशक्त्यादीनामसंभवस्तथापिसगुणेब्रह्मणिसविकारेचसर्वात्मनांतेषांशब्दप्र
वृत्तिहेतूनांसंभवात्सर्वेशब्दाःपरस्मिन्ब्रह्मणिवर्तंते यानिनामानिगौणानिविख्यातानिमहात्मनः ऋषिभिः
परिगीतानितानिवक्ष्यामिभूतये ५ तत्रयानिनामानिगौणानिगुणयोगात्प्रवृत्तानिमहात्मनासर्वात्मेति
यज्ञात्मेतियदायदातेयज्ञानिविष्णुानिहि यज्ञात्मनतंभावस्तस्मादात्मेतिकीर्त्यते इतिवचनाद्यःस्मैवमहा
नात्मेतिमहात्मानःतस्याचिंत्यप्रभावस्यतानिवक्ष्यामिभूतये पुरुषार्थचतुष्टयसिद्धयेपुरुषार्थचतुष्टयार्थमि
ति यच्चनामसहस्रेआदिमादिमात्प्रादिशब्दानामर्थोत्तरेभूसिद्धानामादिमाद्यर्थानांनहिभूतित्वेनतद्भेदात्स
वस्तुनिरितिप्रसिद्धार्थग्रहणेविरुद्धंनिवे भूतात्माचेन्द्रियात्माचप्रधानात्मातथाभवान् आत्माचपरमा
त्माचत्वमेकःपंचधास्थितः इतिविष्णुपुराणे ज्योतींषिविष्णुर्भुवनानिविष्णुर्वनानिविष्णुर्गिरयोदिशश्च न

रा.म.
ना.

नदात्म ७९ इतिमहाभारते विष्णुस्तनोविप्रोवाक्षत्रियोवापिवैश्योवापादजोपिवा वरंश्रोयनमेते
षांमानसंविष्णुचिंतने ८० इतितथाचमनुस्मृति जप्येनैवतुसंसिद्ध्येद्ब्राह्मणोनात्रसंशयः कुर्या
दन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते ८१ इतिगीतास्वयज्ञानांजपयज्ञोस्मिस्थावराणांहिमालय इति
स्कंदपुराणेच अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचि ८२
कैलासयात्रायांमहेश्वरवचने आदिस्त्वंसर्वभावानांमध्यमंतस्तथाभवान् ततःसर्वसमुद्भिन्नं
तत्रैवप्रविलीयते ८३ अहंत्वांसर्वगोदेवत्वमेवाहंजनार्दन आवयोरंतरंनास्तिशब्दैरर्थैर्जग
त्त्रये ८४ नामानितवगोविंदयानिलोकेमहांतिच तान्येवममनामानिनात्रकार्याविचारणा
णा ८५ त्वदुपासाजगन्नाथसैवास्तुमममापते यस्त्वांद्विषतेगोपसमांद्वेष्टिनसंशयः ८६
त्वद्विस्तारोयतोदेव अहंभूतपतिस्ततः ततर्दस्मिविभोदेवयतेविरहितंक्वचित् ८७ यदासीद्व
र्ततेयच्चयच्चभाविजगत्पते सर्वंतद्देवदेवेश किंचिनाकिंचित्वयानहि ८८ इत्यावाक्यैरनेकैत
श्रुतिपादकानि यदेकेदैवतेप्रस्तुतेतस्योपलक्षणमाह यतःसर्वाणिभूतानिभवंत्यादियुगागमे
यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये ८९ यतोयस्मात्सर्वाभूतानिभवंत्युद्भवंति आदियुगागमे कल्पा
दौयस्मिंश्चप्रलयेविलयंयांतिपुनर्भूयएवेत्यवधारणार्थः नान्यस्मिन्नित्यर्थः युगक्षयेमहाप्रलयेच
कामान्यथेपिच स्मितिष्टति नेतीयकेच यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयं
त्यभिसंविशंतीतिश्रुतेः तदुक्तंश्लोकैः द्वैताद्वैतस्वरूपायद्वैताद्वैतानिवर्तिने सर्वात्मदैवतामंत्ररूपिणे

14

क्षिपोऽइव येन भूतान्यशेषेणाद्भुतस्तस्मात्मन्यथोमपि तेन तेष्वेकत्वे सर्वोपनिषत्सु सिद्धं द्रष्टव्यमित्यर्थः
सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं ५२ इ
त्येकत्वात्मज्ञाने सम्यक्दर्शनमित्युक्तं भगवतापि तस्मादात्मन्येवेश्वरे मनो दधीत तथा च श्रुतिः यथा
खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरु
ते तदभिसंपद्यते तथा च स्मृतिरपि अकामतः क्रिया काचिद्दृश्यते नेह कस्यचित् यद्यद्धि कुरुते कि
ञ्चित्तत्तत्कामस्य चेष्टितं ५३ काम एष क्रोध एष इति च अन्यपराणां मन्त्रार्थवादानां प्रामाण्यमङ्गीक
र्तव्यं तेषामप्रामाण्यं कथ्यते नेत्यभिप्रेत्य गतवानिदमृषिः अतः अद्वेयमात्मज्ञाने तथा च स्मृतिः अश्रद्दधा
नाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि इति भगवताप्युक्तं तैत्तरीयशा
खायां एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येतेति तथा ईशावास्ये अविद्यावानिदार्थो
मेवोच्यते असुर्या नाम ते लोका अन्धेन तमसावृताः तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना ५५
इति तैत्तरीयके च असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति स्मृतिश्च किं तेन न कृतं पापं चोरेणा
त्मापहारिणा योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ५६ इति सहस्रनामजपस्यानन्तरं स्नानमु
च्यते यस्मिन्नेवेश्वरे देवाः सर्वपवित्रं कृत्स्नमेकतो ५७ व्रजेत् जन्मान्तरसंतीर्थं यस्मिन् स्नाता नात्मतो भवे
त् स्नानं हृद्ध्यानजलेरागद्वेषमलापहं ५८ यः स्नाति मानसे तीर्थे स याति परमां गतिं आत्मान
दी संयमतोयपूर्णा सत्यह्रदा शीलतटा दयोर्मिः तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुद्ध्यति चा

राम॰
ना॰

होक्तविशेषः परमात्माप्रतिपन्नव्यः तथाहि परमात्मप्रक्रियायां जाबाला आत्मनेनैवेनमभ्युपगछन्तित्वं
वा अहमस्मि भगवतो देवतेऽहं च त्वमसि देवतेति तथा मेपि यदेवेह तदमुत्र यदमुत्र तदन्विह तथा
आपस्तंबाश्रुति सयश्चायं पुरुषे यश्चासावादित्ये स एकः तदात्मानमेवावेदहं ब्रह्मास्मीति बृहदार
ण्यके तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म स वा एष महानज आत्माऽजरो
ऽमृतोऽभयो ब्रह्मेत्येवमादश्रुतत्वात्मोपगामीदृशाः आत्मप्रतिपादकाश्चार्थः ग्राहयति च चात्म
नैनैव एवं वेदान्तवाक्यानि य एव आत्मा सर्वान्तर एष त आत्मान्तर्याम्यमृतः यन्मनसा न मनुते नाहुर्म
नो मतं तदेव ब्रह्म त्वं विद्धि तत्त्वं स आत्मा तत्त्वमसीत्येवमादीनि ननु प्रतीकदर्शनमिदं विष्णुप्रति
मान्यायेन भविष्यतीति नदग्रहे गौणत्वप्रसंगात्वाक्यवैरूप्याच्च यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृ
देव तत्र वचनं च भवति यथा मनो ब्रह्मेत्यादित्यो ब्रह्मेति इह पुनस्त्वमहमस्म्यहं वै त्वमसीत्याह अतः
प्रतीकश्रुतिवैरूप्याद भेदप्रतिपत्तिः भेददर्शनापवादाच्च श्रुतिषु अथ योऽन्यां देवतामुपास्तेऽन्योऽसा
वन्योऽहमस्मीति न स वेद यथा पशुः मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यथोदकं दुर्गे
वृष्टं पर्वतेषु धावति एवं धर्मान् पृथक् पश्यंस्तानेवानुधावति द्वितीयाद्वै भयं भवति यदा ह्येवैष एत
स्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति तत्त्वं भवेयुरिड्गुणमनात्मनः सर्वं तं परादाद्योऽन्यत्रात्मनः
सर्वं वेदेत्येवमाद्यास्त्यस्माः श्रुतयो भेददर्शनमपवदंति आत्मैवेदं सर्वं आत्मनि विज्ञाते सर्वमिदं विज्ञातं भ
वति इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमिति च श्रुतिः तथा च स्मृतिरपि यज्ज्ञात्वा न पुनर्मोहमेवं यास्य

15

नेत्यादि सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छतीति स्मृतिस्थितं
न करणो ब्रह्मविष्णुशिवात्मिको ममैव मायेति भगवानेक एव जनार्दनः ४० तस्मान्न विज्ञानमृतेऽस्ति किंचि
त्क्वचित्कदाचिद्द्विज वस्तुजातं विज्ञानमेकं निजकर्मभेदैर्विभिन्नचित्तैर्बहुधाभ्युपेतं ४१ ज्ञानं विशुद्धं वि
मलं विशोकमशेषलोभादिनिरस्तसंगं एकं सदेकं परमं परमेश्वरं स वासुदेवो न यतोऽन्यदस्ति ४२ यदा
समस्तदेहेषु पुमानेको व्यवस्थितः तदा हि को भवान्कोऽहमित्येतद्विफलं वचः ४३ सितनीलादिभेदेन य
थैकं दृश्यते नभः भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् ४४ एकः समस्तं यदिहास्ति किंचित्तदच्यु
तो नास्ति परं ततोऽन्यत् सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहं ४५ इतीरितस्तेन स राजवर्यस्त
त्याज भेदं परमार्थदृष्टिः यमेनाप्युक्तं सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः इति म
तिरचलीभवत्यनन्ते व्रजतान्विहाय दूरात् यथाहं वस्तथा सर्वं सत्यमेतद्विवोकसः अहं भवान्भवंतश्च स
र्वे नारायणात्मकं ४६ त्रिमूर्तयस्तु यासां तासामेव परस्परं आधिक्यमूनता वा बाध्यबाधकत्वेन वर्तते
४७ भवानेव हि विश्वात्मन्नेकमेव हि कारणं जगतोऽस्य जगत्यर्थं भेदेनैवं व्यवस्थितः ४८ तथा यदभयं
मया मत्तोऽन्यभिन्नमात्मानं दृष्टमहं सशोकर ४९ योऽहं स त्वं जगच्चेदं सदेवासुरमानुषं अविद्यामोहि
तात्मानः पुरुषा भिन्नदर्शिनः ५० इति विष्णुपुराणे विष्णोरन्यं तु पश्यन्ति यो मां ब्राह्मणमेव च कृतकर्मत
यो मृष्टाः पचेते नरके ध्रुवं ५१ ये च मद्भक्तात्मानो नाभिन्नं पश्यन्ति मामहरेः ब्राह्मणं च तथा ते वै भ्रूणह
त्यासमे नत्वं ५२ इति भविष्योत्तरपुराणे महेश्वरवचनं आत्मेत्येवाभ्युपगच्छेतिया हयंति वेति आत्मैव शा

रा.म.
ना.

तंदेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वैशरणमहंप्रपद्ये इतिश्वेताश्वतराणांमंत्रोपनिषदि सेयंदेवतैक्षत एकमेवाद्वितीयमि
तिछांदोग्ये अनुकथ्यते एकोदेवोजीवपरयोर्भेदात् तत्सृष्ट्वातदेवानुप्राविशत्सएषइहप्रविष्टआनखाग्रेभ्य
इत्यादिश्रुतिभ्योविकृतत्वबुद्धिनिवृत्तिसाहित्येनप्रवेशश्रवणाद्भेदः प्रविष्टानामितरेतरभेदात्सर्वोनेकत्वमि
तिचेन्नएकोदेवोबहुधासन्निविष्टःएकःसन्बहुधाविभक्तमेकोसिबहूननुप्रविष्टइत्येकस्यैवबहुधाप्रवेश
श्रवणात्प्रविष्टानांपरस्परंनभेदः हिरण्यगर्भइत्यष्टौमंत्राःकस्मैदेवायइत्यत्रयकारलोपेनैकदेवप्रतिपाद
काः तैत्तरीयके अग्निर्यथैकोभुवनंप्रविष्टःरूपंरूपंप्रतिरूपोबभूव एकस्तथासर्वभूतान्तरात्मारूपंरूपंप्रतिरू
पोबहिश्च १९ सूर्योयथासर्वलोकस्यचक्षुःनलिप्यतेचाक्षुषैर्बाह्यदोषैः एकस्तथासर्वभूतान्तरात्मानलि
प्यतेलोकदुः १० एकोवशीसर्वभूतान्तरात्माएकंरूपंबहुधायःकरोति तमात्मस्थंयेनुपश्यंतिधीरास्ते
षांसुखंशाश्वतंनेतरेषां १८ नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान् तमात्मस्थं
येनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषां १२ इतिकाठके ब्रह्मवाइदमग्रआसीदेकमेवतदात्मानोमित्र
ष्टेत्यादिबृहदारण्यके अनेजदेकंमनसोजवीयःतत्रकोमोहःकः शोकएकत्वमनुपश्यतइतिईशावास्ये आ
त्मावाइदमेकएवाग्रआसीन्नान्यत्किंचन सर्वेषांभूतानांमंतरपुरुषःसमआत्मेतिविद्यात् एकःसद्विधाव
हुधावदेति एकंसंतंबहुधाकल्पयंति द्यावाभूमीजनयन्देवएकः एकोदधारभुवनानिविश्वमृग्वेदस्मृति
रपि सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः विद्याविनयसंपन्ने अहमात्मागुडाकेशसर्वभूताशयस्थि
तइति यदाभूतपृथग्भावमेकस्थमनुपश्यति यथाप्रकाशयत्येकः सर्वधर्मान्परित्यज्यमामेकंशरणंव्र

16

साचमहता २३ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै यानि तेषामशेषाणां कृष्णानुस्मरणं परं २४
कलिकल्मषमत्युग्रं नरकार्त्तिप्रदं नृणां प्रयाति विलयं सद्यः सकृद्यत्राभिसंस्मृते २५ सकृत्स्मृतो हि गो
विंदो नृणां जन्मशतैः कृतं पापराशिं दहत्याशु तूलराशिमिवानलः २६ तथा चित्तस्थितो विष्णुर्योगिनां
सर्वकिल्बिषं २७ ईश्वरो देवीप्रमादस्य भुक्तिकारणं यावज्जीवं प्रणं च मथवा वर्जयेच्छौह्रियं वा याज्ञवेद्यं वस
तिमथ्यवारणास्यो विदध्यात् हित्वा लज्जां कलिमलकलछेदकारी रयेद्वा विष्णोर्नामान्यनिशमसते प्राप्तिरेषा
चतुर्ही २८ जनार्दनं भूतपतिं जगद्गुरुं स्मरन्मनुष्यः सततं महामुने दुःखानि सर्वाण्यपहंति साध्ययत्नशेषा
कार्याणि चाप्यभीप्सते २९ कलावपि ब्राह्मिदोषाश्रवो विषयाकृष्टमानसः कृत्वापि सकलं पापं गोविंदं संस्मरन् गो०
शुचिः ३० वासुदेवमनो यस्य जपहोमार्चनादिषु तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलं ३१ लोकत्रयाधिप
तिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमाद्यं जन्मांतरप्रलयकल्पसहस्रजातमाशु प्रणाशमुप
याति नरस्य पापं ३२ एकोपि कृष्णस्य सकृत्प्रणामो दशाश्वमेधावभृथेन तुल्यः दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ३३ अतसीपुष्पसंकाशं पीतवाससमच्युतं ये नमस्यंति गोविंदं न तेषां विद्य
ते भयं ३४ शाठ्येनापि नमस्कारः प्रयुक्तश्चक्रपाणये संसारमूलबंधानामुद्वेजनकरो हि सः ३५ इमादिश्रु
ति स्मृतीतिहासपुराणवचनेभ्यः मंगलं स्वस्त्ययने तज्जापकं च तेषामपि परमानंदलक्षणं परमम
गलानां च मंगलं दैवतं दैवतानां च देवानां देवः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्मा
ध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै

रा म केस्तुनिष्पन्ने ध्येयो नारायणः सदा ७ हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः उमित्येवं सदा विप्रः पठ
ना न्ध्यात केशवं ८ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ९
यन्नामकीर्तनं भक्त्या विलायनमनुत्तमं मैत्रेयाशेषपापानां धातूनामिव पावकः १० अवशेनापि यन्ना
म्नि कीर्तिते सर्वपातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ११ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वा
परेऽर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं १२ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अनि
च्छयापि संस्पृष्टो दहत्येव हि पावकः १३ ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् सर्वपापं लयं याति
तोयस्थं लवणं यथा १४ यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिंतने विघ्नो यत्र निवेशितात्ममनसो
ब्राह्मोपि लोकोल्पकः मुक्तिं चेतसि यः स्थितोमलधियां पुंसां ददात्यच्युतः किं चित्रं यदघं प्रयाति वि
लयं तत्राच्युते कीर्तिते १५ समापाले जले वह्नेस्तमसो भास्करोदयः शान्तिः कलावघौघस्य नामसंकीर्तनं
हरेः १६ हरेर्नामैव नामैव नामैव भवनारकं कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा १७ स्नात्वा विष्णुवास
देवं विधायोनामायनेन नरः विष्णोः संपूजनान्नित्यं सर्वपापं प्रणश्यति १८ सर्वदा सर्वकार्येषु नास्ति ते
षाममंगलं येषां हृदिस्थो भगवान्मंगलायतनो हरिः १९ गंगास्नानसहस्रेषु पुष्करस्नानकोटिषु
यत्पापं विलयं याति स्मृते नश्यति तद्धरौ २० मुहूर्तमपि यो ध्यायेन्नारायणमतन्द्रितः सोपि सिद्धि
मवाप्नोति किं पुनस्तत्परायणः २१ एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते दस्युभिर्मुषितेनैव
युक्तमाक्रन्दितुं भृशं २२ यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते सा हानिस्तन्महच्छिद्रं संमोहः

17

श्रूयते भीषास्माद्वातः पवते भीषास्मादेति च न पतिष्ठ इति च तपः अस्यैश्वर्यमनवच्छिन्नमिति महत्वं एष सर्वेश्वर
इत्यादिश्रुतेः परमं सत्यादिलक्षणं ब्रह्म महनीयतया महत् परमं प्रकृष्टं पुनरावृत्तिशोकादिविवर्जितं परम
ग्रहणात्सर्वत्र अपरं तेजः आदित्यादिकं आवर्तते सर्वत्र यो देव इति विशेष्यते यो देवः परमं तेजः परमं तपः प
रमं ब्रह्म परमं परायणं समपर्कं सर्वभूतानां परायणमिति वाक्यार्थः स्वकृतश्लोकं रामेति द्व्यक्षरो निशं भुवि
मेन सेनावतां सतयः पापानामतिष्ठापयकं खलु पुनर्नामैव नान्यत्कृते मार्तंडोदयकालपर्यंतमसो नाशे
सविसाहस्रमः किं कार्यं बहुधैः प्रदीपकरणं चायानभिज्ञैः तथा इति श्रीरामनाममहात्म्यस्तुतिस्तु तिपु
राणोति दासोत्तेय अनुतां अमविरचिते एकत्रिंशोत्तमं प्रकरणं ३ इदानीं प्रथमप्रश्नोत्तरमाह पवित्राणां
पवित्रं यो मंगलानां च मंगलं दैवतं देवतानां च भूतानां योऽव्ययः पिता १ पवित्राणां पवित्रं पावनानां तीर्था
दीनां परमसत्पुमान् ध्यायतो हृदः स्मृतः कीर्तितः पूजितः संस्मृतः प्राणतः पाप्मानः सर्वान्नुन्मूलयति वित्रा
सयतीति परमं पवित्रं संसारबंधहेतुभूतपुण्यापुण्यात्मकं कर्म तत्कारणं चाज्ञानं सर्वं नाशयन् स यथा
त्मज्ञानेनेति वा पवित्राणां पवित्रं रूपमाश्रयमर्थांश्च भोगांश्चैवानुषंगिकान् ददाति ध्यायतो निम
पवर्गं प्रददाति हरिः २ चिंत्यमानो समस्तानां क्लेशानां हरि विदायतः समस्तरूपाखिलेचान्यस्तोस्तुतः किं न वि
त्पते ३ ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु प्रायश्चित्तंहि सर्वस्य दुष्कृतस्येति वैश्रुतिः ४ संसा
रसर्पसंदष्टनष्टचेष्टैकभेषजं कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः ५ अतिपातकयुक्तोपि ध्यायन्नि
मिषमच्युतं भूयस्तपस्वी भवति पंक्तिपावनपावनः ६ आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः इदमे

ना म
भा॰

ब्रह्मण्यं ब्राह्मणाय तपसे श्रुतये हिते सर्वान्धर्मान्जानातीति तेन लोकानां सर्वप्राणिनां कीर्तिं यो वर्द्ध
यति स्वशक्त्यनुवेशनेन वर्द्धयतीति लोकैर्नाथ्यते याच्यते लोकानामीष्टे इति वा लोकनाथस्तं महद्भूतं विश्वो
कर्षेण वर्त्तमानं महादिति महद्भूतं परमार्थसत्यं सर्वभूतानां भवः संसारो यस्मात्कारणाद्भवति तं सर्वभू
तभवोद्भवं पंचमप्रश्नस्य परिहारः एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चे
न्नरः सदा ८ सर्वेषां वेदलक्षणानां धर्माणां मध्ये वक्ष्यमाणो धर्मोऽधिकतमो ममाभिप्रेतः यद्भक्त्या तात्पर्ये
ण पुण्डरीकाक्षं हृदयपुण्डरीके प्रकाशमानं वासुदेवं गुणसंकीर्तनलक्षणाभिः स्तुतिभिः सदार्चयेन्न
रः स्वैकर्म चैनं करोमनुष्य इति यत् एष धर्म इति सर्वधः श्रेष्ठत्वमितिलक्षणस्याचेनस्याधिक्ये किं कारणं
उच्यते हिंसादिपुरुषान्तरदेशकालादिनियमानपेक्षत्वादाधिक्ये कारणं ध्यायन्कृते यजन्यज्ञैस्त्रे
तायां द्वापरेऽर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् इति विष्णुपुराणवचनात् जप्येनैव च सं
शयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ९ अहिंसया च भूतानां जपयज्ञः प्रवर्तते इति महाभार
ते यज्ञानां जपयज्ञोऽस्मीति भगवद्वचनं एतस्मिन्प्रेमैव एष मे सर्वधर्माणां धर्मोऽधिकतमो मत इत्यु
क्तेर्द्वितीयप्रश्नं समाधत्ते परमं यो महत्तेजः परमं यो महत्तपः परमं यो महद्ब्रह्म परमं यः परायणं ९ प
रमं प्रकृष्टं महद्बृहत्तेजः प्रकाशनलक्षणं सर्वावभासकं श्रुतिश्च येन सूर्यस्तपति तेजसेद्धः तदेव ज्योति
षां ज्योतिः न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं
यस्य भासा सर्वमिदं विभाति स्मृतिश्च यदादित्यगतं तेजो इति स्मृते परं तपः सर्वमाज्ञापयतीति तपः
यस्मिंश्च लोके परमे च लोके सर्वाणि च भूतानि योऽन्तरो यमयतीत्यन्तर्यामी ब्राह्मणः सर्वनियन्तृत्वे

फलानामपितद्धेतूनामुक्तत्वात्प्राधान्यख्यापनार्थं भीष्मउवाच सर्वेषांशत्रूणांभयहेतुर्भीष्मः मोक्षधर्मादीनां
प्रवक्ता सर्वज्ञः जगत्प्रभुं देवदेवमनन्तंपुरुषोत्तमं स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः ४ षट्प्रश्नाः कथि
ताः पश्चात्तेनैवक्रमविशेषस्य प्रश्नोनेनश्लोकेनपरिहार्यते जगत्स्थावरजंगमात्मकंतस्यप्रभुः स्वामी
ते देवदेवंदेवानांदेवंअनन्तंदेशतः कालतोवस्तुतश्चापरिछिन्नंपुरुषोत्तमंक्षराक्षराभ्यांकारणाभ्यामुत्कृ
ष्टंनामसहस्रेणनाम्नांसहस्रेणस्तुवन्गुणान्संकीर्तयन्सततोत्थितः निरन्तरमभियुक्तः पुरुषः सर्वबन्धा
त्परिहायनाहापुरुषःसर्वदुःखातिगोभवेदितिसर्वत्रसंबध्यते उत्तरेणश्लोकेनचतुर्थंप्रश्नंपरिहरति तमे
वचार्चयन्नित्यंभक्त्यापुरुषमव्ययं ध्यायन्स्तुवन्नमस्यंश्चयजमानस्तमेवच ५ तमेवचार्चयन्नाश्रमर्चनेनज
वेननित्यंसर्वेषुकालेषु भक्त्याभजनेनतात्पर्येणतथापुरुषमव्ययंविनाशविक्रियारहितं ध्यायन्ध्यानेनार्चनेनज
पेनभक्तवत्सलोक्ते नमस्यन्नमस्कारंकुर्वन्इज्याशिष्मतमुभयंक्तेतिनमस्कारलक्षणंकुर्वन् यजमानःपूज
कः फलभोक्ताःस्वयंवासर्वंयजन्तेनाभयमर्चनमुक्तेतेध्यायन्स्तुवन्नमस्यन्नितिमानसवाचिककायिकैर्वा
च्यते रतीयप्रश्नंपरिहरतिउत्तरेणार्धेन अनादिनिधनंविष्णुंसर्वलोकमहेश्वरं लोकाध्यक्षंस्तुवन्नित्यंस
र्वदुःखातिगोभवेत् ६ अनादिनिधनंउत्पत्तिविकाररहितंविष्णुंव्यापनशीलं सर्वलोकमहेश्वरंसर्वलोका
नमीष्टेइतिईश्वरःसर्वलोकस्यनियन्ताब्रह्मादीनामपिईश्वरत्वात्सर्वलोकमहेश्वरस्तंलोकान् स्वभावे
नवीर्येणसाक्षात्पश्यतीति लोकाध्यक्षस्तंनित्यंनिरन्तरंस्तुवन्सर्वदुःखातिगोभवेदिति त्रयाणांसाधारण
फलवेयनेसर्वाण्याध्यात्मिकादिदुःखान्यतीत्यगच्छतीतिसर्वदुःखातिगोभवेत्तस्मात् पुनरपितमेवस्तु
तं विशिनष्टि ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्धनं लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं ७ ब्रह्मण्यं

रा म
ना·

धर्मान्देवमश्नान्वेदललक्षणानशेषेण कार्त्स्न्येन पावनानि पापक्षयकराणि सर्वशः सर्वप्रकारैः श्रुत्वा यु
धिष्ठिरो धर्मपुत्रः शान्तनवं शान्तनुपुत्रं भीष्मं भीष्माचार्यं सकलपुरुषार्थसाधनं स्वस्वं संपादयन्नक्ष्मितिच्छ
त्वा पुनः भूयपूर्वभ्यभाषत प्रश्नं कृतवान् युधिष्ठिर उवाच किमेकं दैवतं लोके किं वाप्येकं परायणं स्तुवं
न्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभं २ किमेकं दैवतं देवशब्दार्थः स्वार्थे तद्धितविधानात् लोके लोकेनद्देत
मते समस्तविद्यास्थानेषु कं च शब्दान्तरायाप्रवर्तते किं वाप्येकं परायणं तस्मिन्लोके एवं परायणं किंप
रमयनं प्राप्तं अस्थानेषु सिक्षितिदिनेभ्यप्रेतहृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मि
विज्ञानमात्रेण स्थानेषु ललक्षणा मोक्षः प्राप्यते यद्विद्वान्न बिभेति कुतश्चन यत्प्रविष्टस्य न विद्यते पुनर्भ
वः यत्स्वैकस्तानेदेव भवति यद्विहायापरः पन्थाः नास्ति तत् कमेकं परायणं च लोके यत् किमिति द्वि
तीयः प्रश्नः कं कं तमं देवमर्चन्तः स्तुवन्तः गुणसंकीर्तनं कुर्वन्तः कं कं तमं देवमर्चन्तः बाह्यमभ्यन्तरं चार्चनं कु
र्वन्तो वा मानवाः मनुष्याः शुभं कल्याणं स्वर्गापवर्गादिफलं प्राप्नुयुर्लभेयुरिति पुनः प्रश्नद्वयं को
धर्मः सर्वधर्माणां भवतः परमो मतः किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ३ को धर्मः पूर्वोक्तलक्षणाः स
र्वधर्माणां सर्वेषां धर्माणां मध्ये भवतः परमः प्रकृष्टो मतोऽभिप्रेत इति पंचमः प्रश्नः किं जपन्नन्तर्वाचा उपांशु मा
नसलक्षणं जपं कुर्वन् जन्तुः जनिधर्मा जपार्चनस्तवादिषु यथायोग्यं सर्वप्राणिनामधिकारं सूचयति ज
न्मसंसारबन्धनात् जन्माज्ञानकिन्तु भितमानामविद्याकार्यं णास्य पलक्षणं संसारो विद्यानाभ्यासंसार
जन्माभ्यासहेयं न तस्मान्मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः जन्मसंसारबन्धनादितीदमुपलक्षणं तेषां

लिकं संप्रवर्तते ईश्वराराधनलक्षणमाह इष्टदेवार्चनं सम्यक् विधिपूर्वकमन्वहं त्रिसंध्यमेकसंध्यं वा
भवमेवेश्वरार्चनं ८१ सिद्धांतश्रवणलक्षणमाह वेदस्यागमसिद्धांतश्रवणं मननं तथा श्रुतिस्मृति
पुराणादिमध्यात्मोदंकं दर्शनं ८२ सिद्धांतश्रवणोद्यतमाख्यातेन तत्त्वदर्शिभि ८३ लज्जालक्षणमाह श्रुत्या
दिभिर्लौकिकैश्चयद्यत्कर्मविनिंदितं तत्राप्रवर्तनं लज्जा वाच्यं नः कर्मणामपि ८४ दानलक्षणमाह
यदिष्टदेवतायात्मात्मनं दर्पणं धियान्वहं सम्यात्रे दीयते तत्तु दानमभिधीयते मतिलक्षणमाह
गुरोर्लब्धस्य मंत्रस्य सम्यग्गवाचर्नने द्वियत् अंतरेणांतराणां च त्यागः शुद्धो जपो भवेत् ८६ व्रतमाह
कर्त्तव्यस्य समस्तस्य नियमग्रहणं भवेत् नियमव्यतिरेकेण सर्वं भवति निष्फलं यमेश्च नियमैश्चैव
कृतं यत्तस्य फलं भवेत् ८७ इत्यागमलिवचनात् तत्कृतश्लोकः नाहं जाने देवरूपेण देवान् जानेनाहं वि
प्रा एषां सम्यग्व्रह्मचैतन्यरूपं ब्रह्मादीनां त्वेकमेवं समस्तं ८८ एतज्जन्मनि पूर्वजन्मसु मया पुण्यं
कृतं यद्भवेत्तत्सर्वं तव पादयोर्नरपते मामद्य चक्षुः प्रभो ब्राह्मजन्म विना पितृण्यनिचयैर्नो लभ्य
ते तेदद्वरेः वाक्यं प्रोत मितिप्रश्लिष्टमनस्तं कालत्रयेनो भवेत् ८९ इति श्रीरामनाममहात्म्ये श्रुतिस्मृ
तिपुराणेतिहासोक्ते श्रच्युताश्रमविरचिते एकोनत्रिंशत्तमं प्रकरणं २९ पूर्वं पूर्वप्रतिज्ञातानि श्रु
तिस्मृतिपुराणानि दर्शितानि ज्ञातमनिविश्रुभक्तैः इदानीं सहस्रनामस्तवनार्थं पूर्वप्रतिज्ञातं
भारतेतिहासं दर्शयति तत्राह वैशंपायन उवाच श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः यु
धिष्ठिरः शांतनवं पुनरेवाभ्यभाषत १ श्रथार्थः प्रोकरभाष्यं निरूप्यते धर्मानभ्युदयिनः नि

रा.म. तेथीरेस्तद्ब्रह्मप्राप्तिसाधके ४४ अस्तेयसाधनमाह रत्नादेरप्यनादानं परस्वस्यतपोधन अस्तेयमेतदुक्तं
मा. गत्ब्रह्मप्राप्तेःसनातन ४५ ब्रह्मचर्यलक्षणमाह अवस्थास्वपिसर्वासुकर्मणामनसागिरा स्त्रीसंगतिपरि
त्यागोब्रह्मचर्यंप्रचक्षते ४६ दयालक्षणमाह परेषांदुःखमालोक्यस्वस्येवालोच्यतत्परं उत्पादनानुसंधा
नंदयेतिप्रोच्यतेबुधैः ४७ परेवाबंधुवर्गेवामित्रेद्वेष्टरिवातथा अपत्येरहितंभावंतद्दयेषापरिकीर्तिता
४८ आर्जवलक्षणमाह व्यवहारेषुसर्वेषुमनोवाक्कायकर्मभिः सर्वेषामपिकौटिल्यराहित्यंत्वार्जवंस्मृ
तं ४९ क्षमालक्षणमाह बाह्येचाभ्यंतरेचैवदुःखमुत्पादितेपरैः नकुप्यतिनवाद्वेष्टिसाक्षमापरिकीर्ति
ता ५० धृतिलक्षणमाह इष्टाप्रपन्नत्यादितोजायतेविषयेष्वपि लोभवत्स्वधृतोयोगःप्रवदंतिमनी
वरं ५१ मिताहारलक्षणमाह भोजनंचैवचतुर्थांशेभोजनंस्वस्थचेतसः अम्लकटतिक्ताम्ललवणा
दिविवर्जितं ५२ इतिलक्ष्यंसहितोमितमिताहारंप्रचक्षतेशौचलक्षणमाह निगतेनवरंयेभ्योरोमकूप
भ्यपवच मलेवदेतिद्वाराणांक्षालनंशौचमुच्यते ५४ मृज्जलाभ्यांबहिःसम्यक्निर्मलीकरणंपुनः
५५ अतःशौचलक्षणमाह पूर्वोक्तमन्त्रसुधेनशौचमाचक्षतेबुधाः एतत्प्रायमावृष्टन्नतद्ब्रह्मप्राप्ति
हेतवे ५६ अथनियमाह तपश्चतुष्टिरास्तिक्यंईश्वराराधनंतथा सिद्धांतावेदनंचैवलज्जादानं
मतिस्तथा ५७ जपोव्रतंतद्धौतेचहुतीस्तानियमास्स्मृताः प्रत्येकमेषांवक्ष्यामिलक्षणानितपोनिये ५८
तपस्तुनखानेनामविधिपूर्वकमिष्यते ५९ तुष्टिलक्षणमाह अनायासोपवासेनतत्समर्थनेनजीव
नेतुष्टिरेषाविधायैतन्नप्राप्तिर्नान्यथाविना ६० आस्तिकलक्षणमाह कृत्वासत्कर्मसुविश्वासंमा॰

20

दस्यैव नत्वन्तत्सर्वं नत्वविद्वांसतो २९ प्रवृत्तौ च निवृत्तौ च सर्वदात्मानुभाविनो किंच रागमोहमिमेव सर्वदानुस्मरेन्निये
२० न तेषां स्वामिणोऽन्येने राम एव न संशयः राम एवात्र भोक्ता च भोग्यमार्ग्यभुक्तिक्रिया २८ एकस्मिन्नवस्थिते
त्वकिमसत्य—सत्रने अतो न मुक्तिमार्गस्योपनीमुक्तिर्विद्यते अनेन विधिना रामं य एवमनुतिष्ठति सभ
क्तिं च लभते नात्र संशयः ३१ यथा विधिनिषेधौ तमुक्तिं नैवोपसर्पतः तथा नस्येने रामोपासके विधिश्वं
के ३१ सदा रामोहमिमेव चिंतयेदनन्यधीः नमस्स्वविहिते लोके निषिद्धे च न विद्यते ३२ यथा घटस्य क
लस्य कार्यस्यामिथ्यात्वकः तथा ब्रह्मचरामस्य स्तुतमेकार्थतमरः ३३ अतो रामोहमित्येन त्वामर्घेणावदं
निये रामचूपासलपवासुवनेषोर्विहितादिके ३४ दात्मनसेवटूनि यथा वर्किंचिदन्नेहे उदकोदनवस्त्रा
दिरामयैव न संशयः ३५ अतो ब्रह्मविदेहमानेन मायप्रकल्पते ये द्विषन्नपि निंदंति तन्मायफलभागिनः
ऊहेविनो दरिद्रास्युः खिनस्युनसंशयः कारणहेतु सर्वत्र निर्निमित्तं पतंति हि ३६ अहोस्मंदभाग्य
स्यपयावत्तत्पाणम्यति अतो ब्रह्मविदृद्वेषो न कर्तव्योऽशुभमेप्सुभिः ३८ निंदां च नैव कर्तव्या हितमेव समाचरे
त्व येस्त्वं तमनुमोदंति वदंत्यस्यैव मनीषिणः ३९ नमस्तु पापमखिलं आत्त्वस्वर्गतिं प्राप्नुवंति ते ज्ञात्वात्मानमेवमा
त्मानेहितं कुर्वन्निरंतरं ४० एतेनैव तवाभीष्टं भविष्यति न संशयः माजड्जेनगोष्ठी च सत्संगो ह्यां समाचर
४१ हितमेव सतां नित्यमहिंसा तत्परो भव अहिंसा सत्यमस्तेयं ब्रह्मचार्य दयार्जवे ४२ क्षमा धृतिर्मिताहारः
शौचं चैव यमा दश इदानीमहिंसा लक्षणमाह सर्वेषामपि जंतूनां मक्लेशजनने मनुने वाङ्मनः
कर्मभिरुत्तमहिंसेत्यभिधीयते ४३ सत्यलक्षणमाह यथादृष्टश्रुतार्थानां स्वरूपकथनं पुनः सत्यमित्युच्य

रा.म.
मा.

९ विशुद्धज्ञानरूपाय रघुनाथाय ते नमः नमो रावणसंहर्त्रे नमो वालिविनाशिने १० नमो वैकुंठनाथाय नमो
विश्वस्वरूपिणे नमो यज्ञस्वरूपाय यज्ञभोक्त्रे नमो नमः योगिध्येयाय योगाय परमानंदरूपिणे शंकरप्रिय
मित्राय जानकीपतये नमः ११ यस्त्वेतान्नमस्याय भक्तिश्रद्धासमन्वितः षोडशैतानि नामानि रामस्य
सन्निधौ पठेत् पठेद्विद्वान्स सर्वेषां सर्वदा नमः श्रीरामभक्तिरचला भवत्येव हि सर्वदा १४ मरणसम
ये प्राणिराघवः सीतया सह हृदिस्थस्तस्य सान्निध्यं सौमित्रिणा सह १५ नित्यं चापररात्रे शुभमनसेतान्समा
हितः सर्वानेतान्स्मरन्नित्यं न स पापी विमुच्यते १६ इति रामनामानुस्मृतेः कल्याणानां निधाने कलिमल
दहने पावने पावनानां पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य विश्रामस्थानमेकं कविवरवच
सां जीवनं सज्जनानां बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम १७ इति सीताकुवलयोक्तेः शिवोवाच
श्रुत्वा नेत्रगोविंद विष्णो नरहरे देव लक्ष्मीपते रामकृष्ण नारायण पुनीहि मा १८ इदानीं मनागपि संहिता
यां श्रीराममंत्रमाहात्म्यं श्रुतं श्रोतुमिच्छति सुतीक्ष्णोवाच श्रुतिस्मृतिपुराणानां निश्चयं ज्ञानवि
ज्ञानं संदेहच्छेदि यत्प्रश्ना मितानां त्वं यदेकतः १९ आत्मानं भवरूपेण सा वाक्कारेण केवलं पुनरावृत्ति
रहितं प्राप्नुवंत्यपि २० इति क्रमादितत्त्वज्ञाः प्रवदंति मनीषिणः भक्तियां सैव भक्तिस्त्वकष्टमेव
त्रिवीधय २१ निवृत्तिरेव भक्तिस्तु प्रवृत्तिर्भक्तिरुच्यते उभयोरप्येकपदवकेमार्गो भवेदृढ २२ अगस्त्यो
वाच त्वयायेन यदुक्तं यन्मुक्तं समस्तविद्यावर सर्वजन्मसु खोच्छितिर्दुःखोच्छितिस्तु चितनः २३ निवृत्तिल
क्षणा ज्येष्ठा भक्तिरित्यभिधीयते विषयासंगमसर्गः करणानां सदा सह २४ भक्तिः प्रचलते लोकेवेष
म्यमभयोरपि तथाप्यात्मानसंस्थानमभयत्रापि दृश्यते २५ भक्तिरात्मानसंस्थानेनात्मावस्थानमेवहि एव

वदेवनगात्राथकृतार्थोस्मिनसंशयः त्वद्दर्शनमपुण्यानांनास्तिमेजनार्दन ८७ ब्रह्माद्यायेनपश्यंति
यन्नपश्यंतिवेदतः तत्स्वरूपेहेपरंब्रह्मकिमस्मादधिकंवरं ८८ सूरयोयन्नपश्यंतियन्नपश्यंतियोगिनः
तत्स्वरूपेपरंधामकिमस्मादधिकंवरं ८९ यन्नपश्यंतिकर्मिष्ठायन्नपश्यंतिदाम्भिकाः तेपश्येयमनाद्य
तेकिमस्मादधिकंवरं ९० परोपकारनिरतायन्नपश्यंतिनिष्ठुराः दयाद्युक्तानपश्यंतितन्मयदृष्टमीश्व
रः ९१ यन्नामस्मरणमात्रेणमहापातकिनामपि त्वमसेपरयान्तिदृष्टानाकिमुताच्युत इतिहृष्टमनारदी
येमार्कंडेयोक्ते रामनाममाहात्म्यविलिख्य सकृतश्लोकः श्रीवेदमुक्तफलमध्यगेयत्राकसन्तूपेचसदाशिवे
वे पंचाणिग्रकेवकूनामहात्म्यमासहस्रणामषष्टितसकेठं ९३ इतिरामनाममहात्म्येस्कृतिसप्तपुराणेति
हासोक्तेभ्यश्चतुराश्रमविरचितेभूमिकाप्रकरणं ८८ एवंप्रकारेणयन्नामस्मृतिमात्रेणमहापातवि
नाशिने यमदेवपरंधामंतीर्थकृन्मनोब्रह्माण्डपुराणोक्ते श्रीरामनाममहात्म्यमुच्यते ब्रह्मोवाच वंदेरामजग
हृदेयंसुंदरंसौम्यविस्मिते कंदर्पकमलाकांतंकामिनार्थप्रदायकं १ भास्वत्किरीटकनककटिसूत्रोपशो
भिते विशाललोचनंभ्राजत्कल्हाणकोमले २ श्रीवत्सकौस्तुभमलसद्वक्षसेवनमालिने मुक्ताहारवि
शोभाढ्यमुद्रिकारत्नभासुरे ३ सर्वांगसुंदरंहृद्येद्विभुजंरघुनंदनं नीलजीमूतसंकाशंनीलालककुन्तला
नने ४ ज्ञानमुद्राभयसहंसेबाहुंदक्षिणमप्यदरि वामजानुपरिन्यस्तवामहस्ताम्बुजेप्रभं ५ वीरासनेसुखा
सीनेविद्युत्पुंजनिभांवरं कोटिसूर्यप्रतीकाशंकोमलावयवोज्वले ६ जानकीलक्ष्मणाभ्यांचवामदक्षिण
शोभिते हनुमद्भिर्विभुग्रादिकपिमुख्यैश्चसेविते ७ दिव्यरत्नसमायुक्तेसिंहासनगतेविभे ध्यायेद्रामंहृदा
पद्मामलेवरामबहहदि ८ एभिःषोडशभिर्नामपदैस्तानमेहदि नमोरामायपद्मायसहायचविदायपरमात्मने

राम कल्पायुतसुतातोद्भवैः ७० मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीरामस्मरणेनैव व्यपोहति न संशयः ७१
ना॰ इदं सत्यमिदं सत्यं सत्यं नैवात्र संशय रामः सत्यं परं ब्रह्म रामात्किंचिन्न विद्यते ७२ तस्माद्रामस्वरूपं हि सत्यं
सर्वमिदं जगत् ७३ तथा च श्रुतिः यथैव वटबीजस्थः प्राकृतस्य महाद्रुमः तथैव रामबीजस्थं जगदेतच्चरा
चरमिति ७४ ग्रंथिदोषात्मके विश्वे रामबीजे प्रतिष्ठिते इत्याथर्वणवेदे इति नारदप्रोक्तं श्रीरामनाममा
हात्म्यमित्यर्थः इदानीं बृहन्नारदीयपुराणे मार्कंडेयस्याह सहस्रशीर्षं देवेशं नारायणमनामयं वासुदेव
मनाधारं कीर्तयामि जनार्दनं आधारं सर्वलोकानामनादिनिधनं प्रभुं ७५ अमेयं सर्वनामानं कीर्त
यामि जनार्दनं ७६ आरण्यके च ऋक्षैतद्धि सर्वाणि नामानि विभजंति संज्ञैः सर्वाण्येतानि प्रज्ञान
स्य नामधेयानीत्यृग्वेदे अध्येयमजिरं नित्यमद्वान्नैकविग्रहं अप्रतर्क्यमनिर्देश्यं कीर्त्ते ७७ अक्षरं प
मं नित्यं विश्वाक्षं विश्वसंभवं सर्वतत्वमयं शांतं कीर्तयामि जनार्दनं ७८ पुराणपुरुषं शुद्धं सर्वज्ञानैक
साधनं परात्परतरं रूपं कीर्त्तने ७९ परंज्योतिः परंधाम पवित्रं परमं पदं सर्वस्वरूपं परमं कीर्त्ते ८०
सगुणं निर्गुणं शांतं मायातीतं समायिनं अरूपं [illegible] बहुरूपं च कीर्त्ते ८१ सच्चिदानंदचिन्मात्रं पराणां
परमं परं एकं सनातनं श्रेष्ठं कीर्त्ते ८२ यदेतद्भगवान्विश्वं सृजत्यवहतीति च तमादिदेवमीशानं कीर्त्ते ८३
परेशं परमानंदं शरणागतवत्सलं त्राहि मां करुणासिंधो सदा तां कीर्तयाम्यहं ८४ नमोस्त्वनंताय स
हस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ४०
इत्येवं स्तुवतस्तस्य प्रसन्नोभूज्जनार्दनः वरं वृणीष्व दासामीत्येवं वचनमब्रवीत् ८६ मार्कंडेय उवाच दे

22 ले ५२ सर्वक्लेशापहरणे विभीषणवरप्रदे दशग्रीवहरे रुद्रे केशवे केशिमर्द्दने वालिप्रमथने वीरे सुग्रीवेप्सित
राज्यदे नरवानरदेवैश्च सेविते हनुमत्प्रिये ५४ शुद्धे सूक्ष्मे परे शान्ते तारके ब्रह्मरूपिणे सर्वभूतात्मभूतस्थे
सर्वाधारे सनातने ५५ सर्वकारणकर्तारे निदाने प्रकृतेः परे निरामये निराभासे निरवद्ये निरंजने ५६ नित्या
नंदे निराकारे अद्वैते तमसः परे परात्परतरे तत्त्वे सच्चिदानंदविग्रहे ५७ मनसा शिरसा नित्यं प्रणमामि रघूद्व
हे ५८ वेदांतवेद्यं कविमीशितारमनादिमध्यान्तमचिंत्यरूपं अगोचरं निर्मलमेकरूपं नमामि रामं तमसः प
रस्तात् ५९ इत्यादीन्सर्वदेवानेवमेवाह ब्रह्माविष्णुश्च रुद्रश्च देवेंद्रादेवतास्तथा आदित्यादिग्रहाश्चैव त्वमेव र
घुनंदन ६० तपसामृषयः सिद्धाः साध्याश्च मुनिपुंगवाः विप्रा वेदास्तथा यज्ञाः पुराणाधर्मसंहिताः ६१
वर्णाश्रमास्तथा धर्मा वर्णधर्मास्तथापरे नागा यक्षाः सुगंधर्वा दिक्पाला दिग्गजादयः ६२ स्थावरं जंग
मं चैव त्वमेव रघुनंदन ६३ त्वयाप्रकृति इदं विश्वं यदयमात्मेयदिदं सर्वं नतद्धि सर्वाणि रूपाणि विभर्त्तीति
बृहदारण्यके ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुंगवं तुष्टोस्मि मुनिशार्दूल वृणीष्व वरमुत्तमं ६४
नारद उवाच यदि तुष्टोसि सर्वज्ञ श्रीराम करुणानिधे त्वन्मूर्त्तिदर्शनेनैव कृतार्थोहं न मे प्सितं वरं मया
चेद्रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु इमं प्रियं नाथ वरं प्रयच्छ पुनः पुनस्त्वामिदमेव याचे
६५ इत्येवमीडितो रामस्तस्मै प्रादाद्वरोत्तमं इति श्रीरघुनाथस्य स्तवराजमनुत्तमं ६६ सर्वसौभाग्य
संपत्तिदायकं मुक्तिदं शुभं ६७ भक्तानामिष्टदः यः पठेत्परया भक्त्या त्रिसंध्यं श्रद्धयान्वितः ब्रह्महत्
यादि पापानि तत्समानि बहूनि च ६८ स्वर्णस्तेयसुरापान गुरुतल्पायुतानि च सर्वपापैः प्रमुच्यते

भिःपरिसेविते ३४ पदंसंचिंतयेहृदि स्मुर्यद्रूपोनिर्वेदोनिषेवरे प्रहृष्टमानसोभूत्वामुनिवर्यःसनारदः ३५ सर्वलो
कहितार्थायतच्छ्रुत्वरघुवल्लभं कविंपुराणंपुरुषंपुरस्तात्सनातनंयोगिनमीशितारं अणोरणीयांसमनं
तवीर्यंप्राणेश्वरंराममसौददर्श ३६ ३७ श्रीनारदउवाच नारायणंजगन्नाथमभिरामंजगत्पतिं कविंपुराणं
वागीशंराममसद्भुतात्मजं ३८ राजराजंरघुवरंकौसल्यानंदवर्धनं भर्गंवरेण्यंविश्वेशंरघुनाथंजगद्गुरुं ३९
सत्यंसत्यप्रियंश्रेष्ठंजानकीवल्लभंविभुं सौमित्रिपूर्वजंशांतंकामदंकमलेक्षणं ३९ आदित्यंरविमीशानंघृ
णिसूर्यमनामयं आनंदरूपिणंसौम्यंराघवंकरुणाकरं ४० जामदग्न्यंतपोमूर्तिरामंपरशुधारिणं वाक्पतिं
वरदंवाच्यंश्रीपतिंपक्षिवाहनं ४१ श्रीशार्ङ्गधारिणंरामंचिन्मयानंदविग्रहं हलधृग्विष्णुमीशानंबलरामं
कृपानिधिं ४२ श्रीवल्लभंकृपानाथंजगन्मोहनमच्युतं मत्स्यकूर्मवराहादिरूपधारिणमव्ययं ४३ वासुदे
वंजगद्योनिमनादिनिधनंहरिं गोविंदंगोपतिंकृष्णंगोपीजनमनोहरं ४४ गोपालंगोमतीवासंगोपक
न्यासमावृतं विश्वकर्मजपतीकाशंरामकृष्णंजगन्मयं ४५ गोगोपिकासमाकीर्णंवेणुवादनतत्परं काम
रूपंकलावंतंकामिनीकामदंप्रभुं ४६ मन्मथंमथुरानाथंमाधवंमकरध्वजं श्रीधरंश्रीकरंश्रीशंश्रीनिवास
परात्परं ४७ भूतेशंभूपतिंभद्रंविभूतिंभूमिभूषणं सर्वदुःखहरंवीरंदुष्टदानवमर्दनं ४८ श्रीनृसिंहंम
हाविष्णुंमहांतंदीप्ततेजसं चिदानंदमयंनित्यंप्रणवंज्योतिरूपिणं ४९ भक्तप्रियंपद्मनेत्रंभक्तानामीप्सि
तप्रदं कौशल्येयंकलामूर्तिंकाकुत्स्थंकमलाप्रियं ५० सिंहासनसमासीनंसत्यव्रतमकल्मषं विश्वामित्र
प्रियंदांतंस्वदारनियतव्रतं ५१ यज्ञेशंयज्ञपुरुषंयज्ञपालनतत्परं सत्यसंधंजितक्रोधंशरणागतवत्स

23 गर्भजन्मजरामृत्युघोरसंसारतारकं अगस्तिनारदप्रोक्तं यःपठेच्छृणुयादपि १८ सयातिपरमंस्थानंराम
भद्रप्रसादतः एतदेवराममनाममहात्म्यंअगस्तिनारदप्रोक्तमित्यर्थः इदानींकृतिसारोक्तंश्रीरामस्तव
राजनामसहस्रमुच्यते सूतउवाच सर्ववेदार्थतत्वज्ञंव्याससत्यवतीसुतं धर्मपुत्रःप्रहृष्टात्माप्रत्युवाचमु
नीश्वरं १८ भगवन्योगिनांश्रेष्ठसर्वशास्त्रविशारद किंतत्वंकिंपरंजाप्यंकिंध्यानंमुक्तिसाधनं १९ श्रोतुमि
च्छामितत्सर्वंब्रूहिमेमुनिसत्तम २० धर्मराजमहाभागशृणुवक्ष्यामितत्वतः यत्परंयद्गुणातीतंयज्ज्योतिरम
लंशिवं २१ तदेवपरमंतत्वंकैवल्यपदकारणं श्रीरामेतिपरंजाप्यंतारकंब्रह्मरूपिणं २२ ब्रह्महत्यादिपाप
घ्नमितिवेदविदोविदुः श्रीरामरामरामेतियेवदंत्यपिसर्वदा २३ तेषांभुक्तिश्चमुक्तिश्चभविष्यतिनसंशयः स्तवराजंपु
राप्रोक्तंनारदेनमहात्मना २४ तत्सर्वंसंप्रवक्ष्यामिहरिध्यानपुरःसरं तापत्रयाग्निशमनंसर्वाघौघनिकृंतनं
२५ दारिद्र्यदुःखशमनंसर्वसंपत्प्रदायकं नमस्कृत्वाप्रवक्ष्यामिरामकृष्णमनामयं २६ अयोध्यानगरेरम्ये
रत्नमंडपमध्यगे ध्यायेत्कल्पतरोर्मूलेरत्नसिंहासनंशुभं २७ तन्मध्येऽष्टदलंपद्मंनानारत्नप्रवेष्टितं स्मरेन्मध्ये
दाशरथिंसहस्रादित्यतेजसं २८ पितुरंकगतंराममिंद्रनीलसमप्रभं कोमलांगंविशालाक्षंविद्युद्वर्णां
बरावृतं २९ भानुकोटिप्रतीकाशंकिरीटेनविराजितं रत्नग्रैवेयकेयूररत्नकुंडलमंडितं ३० रत्नकंकण
मंजीरकटिसूत्रैरलंकृतं श्रीवत्सकौस्तुभोरस्कंमुक्ताहारोपशोभितं ३१ दिव्यरत्नसमायुक्तमुद्रिकाभि
रलंकृतं राघवंद्विभुजंबालंराममीषत्स्मिताननं ३२ सदाभरतसौमित्रिशत्रुघ्नैरुपशोभितं विद्याधर
सुराधीशसिद्धगंधर्वकिन्नरैः ३३ योगींद्रैर्नारदाद्यैश्चस्तूयमानमहर्निशं विश्वामित्रवसिष्ठादिमुनि

राम
ना·

गस्त्योक्तेच महात्म्य प्रथामंकारणोमहत् वक्ष्ये श्रीमंत्रराजस्य श्रुत्वायघ्यानिमज्जति १ सर्वेषुमंत्रवर्गेषु
श्रेष्ठंवैष्णवमुच्यते गाणपत्येषुशैवेषु शाक्तसौरेष्वभीष्टदं २ वैष्णवेष्वपिसर्वेषुराममंत्राःफलाधिकाः
गाणपत्यादिमंत्रेभ्यःकोटिकोटिगुणाधिकः ३ विनैवदीक्षांविप्रेन्द्रपुरश्चर्यांविनैवहि विनैवन्यासविधिना
जपमात्रेणसिद्धिदाः ४ मंत्रेष्वेष्वनायासफलदोऽयंषडक्षरः षडक्षरोऽयंमंत्रस्तुसर्वाघौघनिवा·
रणः ५ मंत्रराजइतिप्रोक्तःसर्वेषामुत्तमोत्तमः दिनेदिनेचाहरितेपत्स्मासर्वंवर्जने ६ सर्वंदहति
निःशेषंतृणराशिमिवानलः ब्रह्महत्यासहस्राणिज्ञाताज्ञातानिकानिच स्वर्णस्तेयसुरापानगुरु
तल्पायुतानिच कोटिकोटिसहस्राणिउपपातकजान्यपि ७ सर्वाण्यपिप्रणश्यंतिराममंत्रानुकीर्त
नात् तथाचश्रुतिः यएतन्मंत्रराजंब्राह्मणोनित्यमधीतेसपाप्मानंतरतिसमृत्युंतरतीति अगस्त्यउवाच
मंत्ररूपेप्रवक्ष्यामिश्रृणुनारदनन्दनः अनलादिमकारांतेमंत्रषड्वर्णसंयुते ८ षडक्षरात्मकंमंत्रंना
दकंब्रह्मवाचकं राजेंद्रराघवेरामेराजानेरक्षकेनेदने ९ राजीवलोचनेवंदेरावणारिंरघूत्तमे रामभद्रं
रघुपतिंप्रपद्येरावणांतकं माधवंमन्मथाधीशंमधुरेशंमहातप मायातीतंमहाविष्णुंमापतिंप्रण
मामहं यज्ञधीशंयज्ञयोनिंयज्ञेशंयज्ञभावनं १० प्रपद्येयज्ञभोक्तारंयज्ञपालननामरं नरोत्तमेन
राधीशंनौमिनागारिवाहनं ११ नारायणंनमस्तस्मैनारदाद्यैरभिष्टुतं महादेवायमहतेमहेशाय
महात्मने १२ मंत्ररूपायरामायमहानायनमोनमः इतिश्रीरामचंद्रस्यमंत्रराजात्मकस्तवं १३

हस्तेद्यात् अनुपल्लवःसर्वमाप्नुयेतितः प्राजापत्यमश्नुतेरायस्पोषंगोपत्यंयएतद्रहस्यंप्राप्नोतिर्लिखि ध्याय
त्वहोमाचक्रुतेपापंनाशयतितेनोमोक्षमश्नुते ततोमोक्षमश्नुतइत्युपनिषत् इत्यथर्वरहस्येगोपीचन
नोपनिषत्समाप्ता एतदर्थंवसिष्ठोप्याह ऊर्ध्वपुंड्रविहीनस्तुसंध्यादिकंचरेत् तत्सर्वंराक्षसान्याति
नरकंचाधिगच्छति १७ दत्तउवाच मार्जनानंतरंप्रातरूर्ध्वपुंड्रंविनिर्दिशेत् मध्याह्नेतिलकंचादौ
पश्चाद्धर्मंसमाचरेत् उशनाःऊर्ध्वपुंड्रंमृदाकुर्यात्तिर्यक्पुंड्रंचभस्मना १८ अथैदानानंतरंप्रातरू
र्ध्वमध्याह्नएवतत् ऊर्ध्वपुंड्रंमृदाकुर्यात्तिर्यक्पुंड्रंचभस्मना १९ इतिपादद्वयेनरूदमुक्तंभवति वै
ष्णवैस्तुमृदाऊर्ध्वपुंड्रतिलकःकार्यः तिर्यक्पुंड्रंतुभस्मनाशिवोपासकैः कार्यइतिस्वस्वसंप्रदा
यानुसारेणचवर्णितम् तदुक्तंशिवोभस्मनाशिवंयजेदितिवचनात् तथाच तर्यभस्मपरब्रह्म
हंयेमृत्तेष्वकारणं तयोरेकतरंसेव्यंसंसारभयभीरुभिः २० इतिवक्तव्यामस्तमहात्म्यं तत्रत
स्तत्संहितादिनाऽऽरण्येश्रुतंकुत्रविद्युक्तं गोपीचंदनमहात्म्यंतवइदस्योक्तमस्मिन्नेवग्रंथेलिखि
तेहंकमश्रीविष्णुश्रवणस्मरणानामसंकीर्तनेनतिष्ठपणास्मृंगारादितियावत् स्वकृतश्लोकः यसेनमो
भान्तमपिप्रसंगात्पिपीलिकामहत्यराकदाचित अथ्यागमंपाठयतिप्रवाहाश्रीराममभवत्तदास्या
त् २१ इतिश्रीरामनामसमहात्म्येश्रुतिस्मृतिपुराणोक्तिहासोक्तंसप्तविंशतिप्रकरणं २७ एवंप्रकरा
णेनेनामसमुद्धारसंग्रहतीनरामनामसाहेभ्यक्तमेनोम्नागस्तिनारदप्रोक्तरामनाममहात्म्यमाह अ

रा म कोटिरेशते १४ इतिगोपीचंदनोर्ध्वपुंड्रतिलकप्रशंसा पूर्ववासुदेवोपनिषदि गोपीचंदनलिप्तस्य
ना· देहस्यानिचतस्यवै अशीतिचक्ररूपाणिभवंत्येवदिनेदिने १५ इत्यक्षेत्रतस्यगोपीचंदनमहात्म्य
अथर्वणवेदेगोपीचंदनोपनिषत्सूक्तंतस्यमाख्यते बाष्कला योमोहाल्पेयहोपीमनसावचसाव
चसापिवा वादेनवासपापीयोगत्तिमाभ्रोत्रसंशयः १८ गोपिकानामसंवरणीकृतस्यचंदनेणीन
रकान्त्रसोर्भयाश्चमेस्तणीचंदनेनतुष्टिकारणं किन्नामतुष्टिकारणंब्रह्मानंदकारणंयएवंवि
द्वान्पतत्वाप्यापयेत् यएतत्सुधारयेत् यएतच्चधारयेत् गोपीचंदनमृत्तिकाद्यानिहत्यासत्र
स्तलोकामहीयतइत्युपनिषत् गोप्यानामविष्णुपत्न्यस्तासांचंदनमाह्लादः एषब्रह्मानंद
रूपःकाष्ठविलुपत्न्योगोप्यानामजन्मशिष्यानकारिण्यःप्रकृतिमहद्यामहामायाःक
स्वविष्णुःपरंब्रह्मवविष्णुःकस्माह्लादोविदितमत्कर्मानुष्ठानेनपापसंहरणात् सुहृतैःकर
णानांब्रह्मप्राप्तिस्वयएवंवेदेत्युपनिषत् गोपीनरुत्तमाचंदनेनतत्तःपश्चात् गोपीमस्तर
हृये चंदनेनस्मृतरपंकंयएवंविद्वान्गोपीचंदनंधारयेत् पश्चात्तरंपरमाप्नोति पंचत्वमन
पश्यति नतोऽस्मतत्वमस्पृत नतोऽस्मतत्वमस्पृत इतिउपनिषत् ३ अथमायाशबलितब्रह्मासीत
नतस्वमहद्यावहरणमायासमेलनात् पंचमतेषुगंधवतीयं पृथिव्यासीत अस्मात्पृथिव्या
स्वैभवाद्दुर्गाभेदाः पीतवर्णास्त्राजायेतेमायामनुष्यरूपमाविष्णुर्महामायास्वगोपीकाला
कानुग्रहार्थसंसारक्षिप्यर्थंचमायाशबलितब्रह्मसेवयपक्षेणादस्यचंदनस्यवैभवंयएवंविद्वान्

25 नात्र संशयः २ मद्रूपमद्वयं ब्रह्म मध्याद्यंतविवर्जितं स्वप्रभं सच्चिदानंदं भक्त्या जानाति चाव्ययं ३ एको
विष्णुरनेकेषु जंगमस्थावरेषु च अनुस्यूतो वसत्यात्मा भूतेष्वहमवस्थितः ४ तैलं तिलेषु काष्ठेषु
वह्निः क्षीरे घृतं यथा गंधः पुष्पेषु भूतेषु तथात्मावस्थितो ह्यहं ५ यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयते
पि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ६ देहादिरहितः सत्यः सच्चित्प्रकाशो निरंजनः सर्वान्
स्यूतमद्वैतं परं ब्रह्म भवाम्यहं ७ ब्रह्मरंध्रे भ्रुवोर्मध्ये हृदये चिद्रविं हरिं गोपीचंदनमालिप्य तत्र ध्यात्वाप्नुया
त्परं ८ ऊर्ध्वदंडोर्ध्वरेताश्च ऊर्ध्वपुंड्रोर्ध्वयोगवित् ऊर्ध्वं पदमवाप्नोति यतिरूर्ध्वचतुष्कवान् इत्येतन्नि
श्चितज्ञानं मद्भक्त्या सिध्यति स्वयं नित्यमेकाग्रभक्तिः स्याद्गोपीचंदनधारणात् ब्राह्मणानां तु सर्वे
षां वैदिकानामनुत्तमं गोपीचंदनवारिभ्यामूर्ध्वपुंड्रं विधीयते ११ यो गोपीचंदनाभावे तुलसी
मूलमृत्तिकां मुमुक्षुर्धारयेन्नित्यमपरोक्षात्मसिद्धये गोपीचंदनलिप्तस्य देहस्थानि च तस्य वै
अक्षीणि चक्राणि भवेयुर्दिनेदिने १२ एवं विधिना गोपीचंदनं यो धारयेत्स वेदमधी
ते स सर्वमहापातकेभ्यः पूतो भवति पापबुद्धिस्तस्य न जायते स सर्वेषु तीर्थेषु स्नातो भवति स
र्वैर्यज्ञैर्याजी भवति सर्वैर्देवैः पूज्यो भवति नारायणे मय्येकांतभक्तिश्च वर्द्धते सम्यग्ज्ञानं ल
ब्ध्वा विष्णुसायुज्यमवाप्नोति न च पुनरावर्तते न तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव च
क्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदं ॐ सत्यमथर्वणाव्वेदे वासुदेवोप
निषत्कृतिभ्यः स्मर्तव्यः सर्वदा रेच गोपीचंदनं त्वं इन्द्रयोदशाति द्विजातये ऊं लक्ष्मनारिते तेन भवेदा।

ग म दिसद्दितं विष्णुं वेदनेन मंत्रेण तिस्त्रिन्मालिप्तं गोपीभिः प्रक्षालनाद्गोपीचंदनमाख्यातं मदंगलेपनं पुण्यं चक्रती
ना र्थांतःस्थितं चक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति अथ गोपीचंदनं नमस्कृत्वोद्धृत्य गोपीचंदन पापघ्न वि
ष्णुदेहसमुद्भवं चक्रांकित नमस्तुभ्यं धारणान्मुक्तिदो भव ॥१६॥ धारणविधिमाह इमं मे गंगे इति जलमादा
य विष्णोर्नुकमिति मर्दयेत अतो देवा अवंतु न इत्येताभिरृग्भिर्विष्णुगायत्र्या च त्रिवारमभिमंत्र्य शंख
चक्रगदापाणे द्वारकानिलयाच्युत गोविंद पुंडरीकाक्ष रक्ष मां शरणागत मिति ध्यात्वा गृहस्थो लला
टादिद्वादशस्थानेष्वनामिकया अथवा विष्णुगायत्र्या केशवादिद्वादशनामभिर्वा धारयेत ब्रह्मचा
री वानप्रस्थो वा ललाटकंठहृदयबाहुमूलेषु वैष्णवगायत्र्या कृष्णादिपंचनामभिर्वा धारयेत यतिस्तर्जन्या शि
रो ललाटहृदयेषु प्रणवेन धारयेत ब्रह्मादयस्त्रयो मूर्तयस्तिस्रो व्याहृतयस्त्रीणि छंदांसि त्रयो वेदास्त्रयः स्व
रास्त्रयोग्नयो ज्योतिष्मंतस्त्रयः कालास्तिस्रोवस्थाः त्रयस्त्रात्मानः पुंड्रास्त्रय ऊर्ध्वा अकारोकारमकारा एप
ते सर्वे प्रणवमयार्ध्वपुंड्रत्रयात्मकास्तदेतदोमिति एकदा समभवत् परमहंसो ललाटे प्रणवेनैकमूर्ध्वपुंड्रं
वा धारयेत तत्त्वदीपप्रकाशं स्वात्मानं पश्येत ब्रह्मैवाहमस्मीति भावयन योगी मत्सायुज्यमवाप्नोति
२ अथवा न्यासहृदयस्थोर्ध्वपुंड्रमध्ये वा हृदयकमलमध्ये वा स्वात्मानं भावयेत तस्य मध्ये वह्निशिखाणी
योर्ध्वा व्यवस्थितः नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ॥१९॥ नीवारशूकवत्तन्वी पीताभास्वत्यणू
पमा तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ॥२०॥ इत्यूर्ध्वमध्यपुंड्रस्थहृत्पद्मेनु तनोभ्यसेत क्रमादेव
स्वात्मानं भावयेन्मां परं हरिं ॥ एकाग्रमनसा यो मां ध्यायेद्धरिमव्ययं हृत्पंकजे स्वमात्मानं स मुक्तो

26 हन्यते सुरसद्मनि प्रत्यहं द्वादश शिला शालिग्रामस्य योऽर्चयेत् ८५ द्वारवत्याः शिलायुक्ताः सर्वे कुंडे महीय
ते तेन तुलसीयस्य भवने प्रत्यहं परिदृश्यते तद्गृहं नोपसर्पंति कदाचिद्यमकिंकराः गोपीचंदनतुलसीशंखः शा
लिग्रामः सचक्रकः ८७ गृहे यस्य सदा पंचैते तस्य पापभयं कुतः विष्णुर्नाम स्वरूपे हि सर्वव्यापिनि शीलिनि
८८ सर्वेषां चेंद्रियाणां नामीशानः परमेश्वरः हृषीकेशः श्रुतिख्यातो यः सर्वत्र संस्थितः ८९ न च्यवंते पि
यद्भक्ता महत्यां प्रलयापदि अतोऽच्युतोऽखिले लोके स एकः सर्वगोऽव्ययः ९० इदं चराचरं विश्वं यो बभार स्व
रूपतस्तस्मात्सोत्र विश्वंभरोऽखिले ९१ तस्य त्वेणः समीहंते नान्यद्विष्णुपदाद्धृते निर्गीतपुंडरीकाक्षतेनान्यो निय
मतोऽच्युतः ९२ नान्यशास्त्रग्रहे हस्तज्ञातो शास्त्रग्रहावपि विना मत्कृते गोविंद दामोदर चतुर्भुजः ९३ गो
विंदचरणार्थं स्तनयश्येद्रुवतोऽपुतः चापचक्रांकितो तस्मान्नान्यकर्मकरो करो ९४ निर्द्वंद्वचरणं द्वंद्वं तस्मा
न्नोमन्यते हरेः हित्वान्यन्मनने सर्वं निश्चलत्वमवाप्नुहः चरणो विष्णुशरणो हित्वा नारायणागणो तस्य तो
चरणोन्यत्र चरतो विपुलं तपः ९५ वाणी प्रकाशनी क्रियते गोविंदगुणवर्णने जो घसमासतोऽनेन महा
सारं तपस्यता ९६ नितांतं कामसंलोकाः तन्नामधेयसंकुपारसं रमयंतीनरमनो तस्मान्परमसुस्पृहा ९
वे गोपीचंदनलिप्तांगो हृष्ट्वा नदचं... इति गोपीचंदनमहात्म्ये काशीखंडे उक्तं तदथर्वणवेदे वा
सुदेवोपनिषदि विस्तरेणोच्यते ॐ नमस्कृत्य भगवान्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ श्रीभगवान्नूर्ध्व
पुंड्रविधिं द्रव्यमंत्रस्थानादि सहितं मे ब्रूहीति तं होवाच भगवान्वासुदेवो वैकुंठस्थानोद्भवं मम प्रीति
करं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचंदनं वैकुंठस्थानादाहृत्य द्वारकायां मया प्रतिष्ठितं चंदनं कुंकुमा

रा.म. श्रद्धेयत्तदर्थे यथोक्तं सपवसफलः कालोयस्मिन्कलौ तिकीर्तनं ६७ तावज्जीवितं श्रेयो यावत्त्वं हरिवर्त्त
ना. से रोगप्रशमनं तावत्पादोदकसेवनं ६८ महापापानि गोविंद जन्मार्जितान्यपि सद्यो विलयमायाति
वसुदेवेति कीर्तनात् ६९ अहो पुंसां महामोहस्त्वहो पुंसां प्रमादता वासुदेवमनाहृत्य यदन्यत्र कृताश्रमः
७० इदमेव हि मांगल्यमिदमेव धनार्जनं जीवितस्य फलं चैतद्यद्दामोदरकीर्तनं ७१ नायोग्य जात्य रोध
मौ नारायणात्परः न कामः केशवात्कर्मो नापवर्गो हरेः परः हरेर्नाम यतं पुंसां किंकिं न कुरुतेवत
पुत्रमित्रकलत्रार्थे राज्यस्वर्गापवर्गदं ७३ हरिस्त्वं चेंद्रसमयति व्याधीनाधीन्प्रियच्छति धर्मं विवर्धयति दि
प्रं प्रयच्छति मनोरथं ७४ भगवच्चरणद्वंद्वध्यानमत्तमं पापिनापि प्रसंगेन विहितं सुहितं कृतं ७५
पापिनां यांति पापानि महापापानि यान्यपि सुनीलध्यानसंपन्नो नामोच्चारो हरेर्हरेत ७६ प्रमादाद
पि संस्पृष्टो यथानलकणो दहेत् तथौष्ठपुटसंस्पृष्टं हरेर्नाम दहेदघं ७७ इदमेव परं तीर्थं विष्णुपादा
म्बुयः पिबेत् न सोयद्वारं भक्तायं सेवते यत्नतः सुधं ७८ सेवनस्तेन नियतं पुरोडाशो महाधिया सचैवाच
मृथस्नानः सच गंगाजलाप्लुतः ७९ विष्णुपादोदकं कृत्वा शिरसि यः स्नाति मानवः ब्राह्मणः क्षत्रियो वैश्यः
शूद्रो वा यदि चेन्नरः ८० विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमः स्मृतः कोध्वांतरे हरेर्नाम स्फुलिंगसहस्र
जस्तु ८१ महतां पातकानां च राशिस्तूलोपमः क्वच गोविंदपरमानंदमुकुंदमधुसूदनं ८२ त्यक्त्वा
न्यनैव जानामि भजामि च स्मरामि वः न नमामि न चलौमि न पश्यामि हि चक्षुषाः ८३ न स्पृशामि
न वायामि न गायामि हरिं विना शालिग्रामशिलायेन पूजिता तुलसीदलैः सपारिजातमालाभिः

27 पठायेत्तु हरिनामानि परायणाः वर्णावावर्णावाह्यावा तेषां नित्यं नमो नमः अहोरात्रे हरेर्नाम कीर्त्तयंति च येन नराः नि
ष्कामा वा सकामा वा न कलिर्बाधते हि तान् ५२ पत्रं देवालये काशी खंडे पापवल्ली मुखे तस्य जिह्वा रूपेण ति
ष्ठति यानवक्ति दिवारात्रौ गुणानां कोटिं संभवान् ५३ इयमेव परा हानिरुपसर्गोयमेव हि अभाग्यं पर
मं चैतद्वासुदेवं न कीर्तयेत ५४ यन्मुहूर्त्तः क्षणो ये चयाः काष्ठा ये निमेषकाः ऋते र्विष्णुस्मृतियातास्तेषुम
ष्टा यमेन समः ५५ हरिर्नाम भवत्सर्वमुखे भाले गोपी मृदंकितं तुलसी मालते ।रस्कं स्पृशेयुर्न यमो द्भटाः ५६
वाचि चेत सि वैर्नेत यस्य देवो जनार्दनः स एव नररूपेण पूजनीयो हरिः स्वयं ५७ शंखचक्रांकित तनुः
शिरसा मंजरी धरः गोपी चंदनलिप्तांगो दृष्टश्चेत्तदघं कुतः ५८ इदानीं क्रमेणैके केवा कथ्य संप्रज्ञ रक्षयज्ञा
ङ्गः यदभक्तत्वं नवर्त्तितः सिद्ध्यो ह्रौं नृपात्मजः ५९ नमामा ह्यहृषीकेशमपवर्गाय्य हूरतः द्वादशाक्षरमंत्रे
णवासुदेवात्मकेन च ६० ध्यायेच्च तन्मंजवि संजप्यामि द्धिनकेभातः सर्वोपि गात्र इत्यर्थः अतसी पुष्प संका
शं पीतवाससमच्युतं तं गां सर्वात्मकं चंपत्कोनं सिध्यति मानले ६१ पुत्रान् कलत्रं मित्राणि राज्यं स्वर्गापव
र्गकं वासुदेवं जगन्मर्त्यः सर्वं प्राप्नोति संशयः ६२ वासुदेवजपासक्तान पि पापकृतो जनान् नोपसर्पंति
वै विघ्नाय महृता सुदारुणाः ६३ अगस्तिरुवाच पितामहेन ते प्येष महामंत्र उपासितः मनुः ज्ञाराज्यका
मेन वैवस्वते न वैस्वतेन महात्मना ६४ त्वमप्येतेन मंत्रेण वासुदेव परो भव यथाभिलषितां सिद्धिं द्विप्र
प्राप्नुहि सत्तम ६५ एवमागस्तिनोपदिष्टः अश्ववो द्वादशाक्षरविद्यया राधितं भगवतं स्तुति शेषांते ध्रुवो
वाच सत्कथाय यत्नेनामतन्मनोयतवार्षितं तत्कर्मयतद्रेथ्यै वेतन्न पायद्भवसृतिः ६६ नद्धंनयनितं

रा म.
ना.

तिविस्नुभक्तिरतात्मनां आश्चर्यमेतद्गतिमीनारदस्तुतिः अहोमर्त्वमहोमर्त्वमहोमूढमिदंजगत् हृत्पद्मेसंस्थि
तेविस्नुनविजानातिसर्वदा ३५ मृणुध्वमृषयःसर्वेभयोभयोवदाम्यहं हरिःस्मृद्धावहानंदष्टोनयनैनचवीर्यकैः
३६ अतएव द्विजन्मभक्तिहीनानांदेवदेवेजनार्दने समाचरदानभूमंचव्रतस्नानेपिकृपुनःपुनः ३७ ततमेद्विस
वेयस्यशरीरेकर्ममेदेन पापानामाकरंतदेहेतेयेविद्धयसत्तमाः ३. तस्मात्सर्वगतविप्रेंद्राहरिभक्तिपरायणाः
श्रेष्ठाःसर्वत्रविख्यातायतोभक्तिःसुदुर्लभाः ३८ उपसंहरति तस्मात्संसारतप्तानांहरिरेवपरागतिः य
न्नामस्मरणादेवघुपात्मेपेयंपदं ३९ किंच मानुष्यंदुर्लभंप्राप्ययोहरिंनार्चयेन्नरः तस्मात्सर्वेनरः
कोपिकोन्यस्तस्मादेवेतन ४० आराधितोजगन्नाथोददात्यभिमतेफलं कथंनपूजयेद्विप्राःसंसाराग्रौ
सुदारुणः ४१ रागद्वेषपरित्यक्तःप्रचंडोलोपिद्विजाधिकः रागद्वेषसमायुक्तोद्विजोपिश्वपचाधमः ४२
तस्मात्कामादिदस्युनां त्यक्त्वाभजततेहरिं तस्मिन्तुष्टेखिलंतुष्टंयतःसर्वगतोहरिः ४३ अथातःस्तुतःपू
जितोवाकीर्तितोवाजनार्दनः संसारपाशविच्छेदीकस्तंनपरिकीर्तयेत् ४४ यन्नामोच्चारणादेवमहा
पातकनाशनं तंसमभ्यर्च्यविप्रेंद्राःपरमोक्षंलभेद्ध्रुवं ४५ अहोचित्रमहोचित्रमहोचित्रमिदंद्विजः
हरिनामपरित्यज्यसंसारेवर्ततेपुनः ४६ यावन्नेंद्रियवैकल्यंयावद्व्याधिर्नवाधते तावत्संकीर्तयेद्धे
हिस्तुयदिभक्तिरतोनरः ४७ मातुर्गर्भाद्विनिष्क्रान्तोयदाजन्तुस्तदैवहिःस्मृर्वकृगतोवाढंतस्माद्राम
तंकीर्तयेत् ४८ सर्वसत्येषुनःसत्यमुद्धत्यभुजमुच्यते देभाचारपरित्यज्यमवध्येचक्रपाणिनं ४९
मेगात्स्नेहाद्भयाल्लोभाद्ज्ञानाद्वापियोनरः विस्नोहृपासनेऊर्यात्सोवयेसत्वमश्नुते ५० हरिभक्ति

28 नीषिणः १७ गंगा च तुलसी चैव सत्संगो हरिकीर्त्तनं अनसूया ह्यहिंसा च सर्वे पापप्रणाशिनः १८ वि
ष्णोर्पितानि कर्माणि सफलानि भवंति हि अनर्पितानि कर्माणि भस्मनि क्षिप्तहव्यवत् १९ वाच्यो नारा
यणः प्रोक्तो मंत्रः स्याद्वाचकस्ततः वाच्यवाचकयोर्भेदो नास्त्येव महात्मनः २० अत एव यन्नाम संकी
र्त्तनेनातुरो रे समस्तपापैः प्रमुच्यति नमीशभाग्येषु रूपेषु गणेन तोषि विष्णुरूपार्थिसिध्ये
२१ उत्क्रांतिकाले यन्नाम स्मरन्नवै तो पि वैसकृत् लभते परमं स्थानं किं पुनस्तत्परायणाः २२ महा
पातकयुक्तो वा चोपपातकैः शमक्तो पि नित्यं कीर्त्तनं लभते परमं पदं २३ यतीनां विष्णुभक्तानां परिच
र्यापरायणाः ईक्षितान्यपि गच्छंति पापानिपि परां गतिं २४ तस्मात् नारायणं परं देवं सच्चिदात्मनं
विग्रहं यजध्वम् यत्सर्वे विमुक्तिं यदि चेच्छथ २५ शिव एव लवं पश्यंति नवा यं ते ग्रहा भूमेः राद्
सायुज्यतां इतिम केशवे निशदिनं २६ भक्तिर्हि लाभवेद्यस्य देवदेवे जनार्दने श्रेयांसि तस्य सिध्यंति
सर्वलोकहितेरताः २७ सत्कथा यां चरमतेत्स्वकथां च करोति यः सत्संगो निरहंकारस्तस्य प्री
तो रमापतिः २८ नाम संकीर्त्तने विष्णोः क्षुत्प्रस्खलनादिषु करोति सततं विप्रास्तस्य प्रीतो ह्यधो
क्षजः २९ अहोधैर्यमहोधैर्यमहोधैर्यमिदं नृणां विष्णोः स्थिते जगन्नाथे न भजंते महाद्भुताः ३० प
केके कस्मात् अनादृत्य जगन्नाथं सर्वथा नारमृच्छते संसारसागरे मग्नाः कथं पारं गमिष्यथ ३१ अ
त एव अच्युतानंत गोविंदनामोच्चारणभेषजं संसाररोगमात्यर्थं पिव नित्यं महात्मने ३२ ना
रायण जन्मान्नाथ वासुदेव जनार्दन इतीरयंति ये नित्यं ते वै सर्वत्र वंदिताः ३३ प्रभावेन विजाने

रा॰ म तत्र गंगा महाभागा विष्णुपादोद्भवा नदी तिष्ठति स्नानमघकाः शीताम्भो प्रथितो जनः २ एतस्मिन्नेत
ना॰ रैविमार्देवर्षिर्नारदो मुनिः आजगाम मुदा युक्तो महर्षेर्नारायणादिकं ३ नारायणाच्युतानन्त वासुदेव
जनार्दन एते पापहरा कृष्ण विष्णो नमोस्तु ते ४ पद्मनाभ कमलाकान्त गुणाजनक केशव हरे
दशाङ्गि देव दामोदर नमोस्तु ते ५ श्रीकृष्ण विष्णो नरहरे मुरारे प्रद्युम्न संकर्षण वासुदेव अजा
निरुद्ध अमल विश्वरूप त्वं पाहि नः सर्वभयाद् जनं ६ नमः पराय देवाय परस्मात्परमाय च परावर
निवासाय सहस्रायनामाय च ७ ज्ञानाय ज्ञानगम्याय सर्वज्ञानैकहेतवे ज्ञानेश्वराय ज्ञानाय ज्ञा
नगम्याय ते नमः ध्यानाय ध्यानगम्याय ते नमः ध्यानाय ध्यानगम्याय ध्यातपापहराय च ध्यानेश्व
राय सुधिये ध्येय ध्येयस्वरूपाय ते नमः ८ यन्नामसंकीर्तनतो गणपशीलाः स्वेनैनं पश्यन्ति यमं नरेन्द्राः जा
नेति नाम याचि विरिंचि स्वस्मिन् तस्मै नमस्तेस्तु नमोस्तु ते ९ इदानीं वासुदेव भक्तेन मस्करोति ह
रिकीर्तनशीलो वा नरकान्नाप्नुयाद्यो पि वा सुस्मृष्ट्वापि मनुष्यो सर्वेभ्यो स्माभिरुत्तमः ११ नारायणे
ति कृष्णेति वासुदेवेति वा पुनः अहिंसादिपरं ज्ञात सर्वेभ्यो स्माभिरुत्तमः १२ शिवेति नीलकण्ठेति
शंकरेति च वा पुनः सर्वभूतहितेनित्यं सर्व १३ अभेददर्शी देवस्य नारायणशिवात्मनोः स वि
द्वो ब्राह्मणो नित्यं सस्माभिः किमतो न्यतः १४ एवं न कीर्तयद्यस्तु नाम्नानेन तारयेन्नरः स सर्वदु
ष्कृतो मुक्तः को न्यस्तस्मात् चेतनः १५ जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयं विष्णुलोकमवाप्नोति पु
नरावृत्तिदुर्लभं १६ गोविन्देति सदा ध्यायेद्यस्तु रागादिवर्जितः स याति विष्णुभवनमिति प्राह मे

29 ममाहात्म्ये मंगलानि गृहे तेन स्वसर्वसौख्यानि भारत दिवारात्रौ तु येनोक्तं हरिरित्यक्षरद्वयं ५७ गंगासर
स्वतीरेवायमुनासेतुबन्धे पुष्करे एतत्सर्वं कृतं तेन येनोक्तं हरिरित्यपि ५८ वाराणस्यां कुरुक्षेत्रे नैमिषे पु
ष्करे तथा स्नानं दानं कृतं तेन येनोक्तं हरिरिति ५९ सूर्यपर्वे कुरुक्षेत्रे कार्तिक्यां स्वामिदर्शने कृष्णा
स्नानं कृतं तेन येनोक्तं हरिरित्यपि ६० माघस्नानं प्रयागे तु गयायां पिण्डपातनं एतत्सर्वं कृतं तेन ये
नोक्तं हरिरित्यपि ६१ दर्शनं मल्लिनाथस्य गंगासागरमज्जनं कन्यादानं कृतं तेन येनोक्तं हरि॰ गवां को
टिसहस्राणि बलीवर्दशतानि च अश्वदानं कृतं तेन येनोक्तं ह॰ ६३ भूमिदानानि दत्तानि रत्नानि विवि
धानि च हेमदानानि दत्तानि येन वै ६४ वापीकूपतडागानि देवतायतनानि च दत्तं श्रीतोदकं तेन ये
नो ६५ पृथिव्यां सर्वदानानि महीदानानि भारत अन्नदानानि दत्तानि येनोक्तं ६६ अतिथ्यादिकृतं तेन
मातापित्रोश्च सेवनं एकादशी कृता तेन येनोक्तं ह ६७ प्रायश्चित्तं कृतं तेन महापातकनाशनं तपांसि
तेन तप्तानि येनोक्तं ६८ अष्टादशपुराणानि इतिहासस्तथैव च सेवितानि च तेनैव येनोक्तं हरिरेव हि
६९ प्राणप्रयाणपाथेयं संसारव्याधिभेषजं मोक्षकल्पतरोवीजं हरिरित्यक्षरद्वयं ७० सत्कृतं स्तो
कं कृपालो भगवन् विलोक्य मम यत्पदाश्रिते तेमामत्याहीरनाथ मामनन्यः कः शरणं मम ७१ इति श्रीरा
मनाममहात्म्ये श्रुतिस्मृतिपुराणेतिहासोक्ते मञ्चकलाश्रमविरचिते षड्विंशतमे प्रकरणं २६ ए
वं प्रकरणपञ्चके मोक्षकल्पतरोवीजं हरिरित्यक्षरद्वयं इत्यतो बृहन्नारदीयपुराणोक्तं नाममाहा
त्म्यमुच्यते एकदा ब्राह्मणाः पुत्राः सनकाद्या महौजसः मेरुशृङ्गे समाजग्मुर्वीक्षितुं ब्रह्मणः सभां १ ॥

रा.म भवेज्जन्मनिजन्मनि ४३ कृपाचार्य उवाच सज्जन्मनःफलमिदमथकैटभारेःसम्प्रार्थनीयमदनुग्रहद-
ना. क्ष एव त्वदंघ्रिस्मरणमरिचारकस्य स्मरतस्य स्मरतस्य स्मरतस्य स्मरणतः समनिमासवलोकनाय ४५ वसिष्ठ उवाच न-
मःकमलयशुद्धायब्रह्मणेलिंगमूर्त्तये योगेश्वराययोगाय त्वामहंशरणंगतः कृष्णायवासुदेवाय
हरयेपरमात्मने प्रणतक्लेशनाशायगोविंदायनमोनमः द्रोणाचार्य उवाच एकोगंगासिनीगंगा
पावयेदखिलंजगत् श्रीगंगापुत्रसंसर्गीनामकिंकरणमद्वयं ४६ अतएवतन्नामसंकीर्त्तनंक-
र्त्तव्यमितिभावः भूरिश्रवाउवाच आयुःकृतयजन्नुजैस्त्रेतायांद्वापरेऽर्चयेत् यदाप्नोतितदाप्नोति
कलौसंकीर्त्यकेशवं ४८ सोमदत्त उवाच अतसीपुष्पसंकाशंपीतवाससमच्युतं येनमस्यंति
गोविंदंनतेषांविद्यतेभयं ४९ कर्ण उवाच नाहंवदामिनस्मरामिनचिंतयामिनाहंस्मरामि
नमज्ञामिनचाश्रयामि भक्त्यात्वदीयचरणांबुजमादरेणश्रीश्रीनिवासपुरुषोत्तमदेहदास्यं ५०
पुंडरीकउवाच किंतस्यबहुभिर्मंत्रैर्भक्तिर्यस्यजनार्दने नमोनारायणायेतिमंत्रःसर्वार्थसाधकः
५१ एवंब्रह्मादयोदेवाऋषयश्चतपोधनाः कीर्तयंतिसुरश्रेष्ठंदेवंनारायणंविभुं ५२ इतिसर्व-
पुराणसंगृहीतपांडवगीतावाक्येभ्यः नंदके द्वारकामहात्म्यसफलंजीवितंतस्यसफलंतस्यजी-
वितं तेसफलाभारतीतस्यकृष्णकृष्णेतिवदति ५३ नामपुण्यंसमंतेहृष्टागायंतिदिविसंस्थिताः
नरकास्थितरोमस्क्राःप्रवर्त्ततिहसंतिच ५४ गोप्यंयस्यानकंपुंसांकृष्णनामव्यपोहति कृष्णकृष्णे-
तिरामेतिस्वपन्जाग्रन्व्रजन्नपि ५५ वदन्तिनिकलौराजन्कृष्णसाम्यमाप्नुयात् तथाचपुरुषान्न

30 नारायणोमुक्तापुमान कल्पशतत्रयं गंगादिसर्वतीर्थेषु स्नातो भवति पुत्रक ३० तत्रैव गंगा यमुना च तत्र
च गोदावरी सिंधु सरस्वती च सर्वाणि तीर्थानि वसंति तत्र यत्राच्युतोदारकथाप्रसंगः ३१ कृष्ण कृष्णेति कृ
ष्णेत्यंतकाले जल्पन्ते नु जीवितं यो जहाति आयुःशत्रूः कल्पते तस्य मंत्रो येन मंत्रोऽजानन्मंत्रो तिष्ठतो द्वाष्टण
स्या ३२ कुंतिरुवाच स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहं तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु
मे ३३ कृष्णं स्मरंतः कृष्णमनुस्मरंति रात्रौ च कृष्णं पुनरुत्थिता ये ते भिन्नदेहाः प्रविशंति कृष्णं हविर्यथा मं
त्रहुतं हुताशे ३४ गोविंद गोविंद हरे मुरारे गोविंद गोविंद रथांगपाणे गोविंद गोविंद मुकुंद कृष्ण गोविंद गो
विंद नमो भजेयाः ३५ विश्वामित्र उवाच नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च जगद्धिताय कृष्णाय गो
विंदाय नमो नमः ३६ उत्तरा उवाच अच्युतानंत गोविंद सच्चिदानंद शाश्वत मच्चित्तो रमतां नित्यं त्वच्च
रणांबुजे ३७ सात्यकिरुवाच अप्रमेय हृषीकेश कृष्ण दामोदराच्युत गोविंदानंत सर्वेश नारायण हरे नमः
३८ कृतवर्मा उवाच वासुदेवं परित्यज्य योऽन्यदेवमुपासते तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ३९ या प्री
तिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ४० भीष्म उवाच विपरीते
षु कालेषु परिक्षीणेषु बंधुषु पाहि मां कृपया कृष्ण शरणागतवत्सल ४१ धृतराष्ट्र उवाच नमो नमः
कारणकारणाय नमो नमो मंगलमंगलाय श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु तस्मै पुरुषोत्तमाय
४२ गांधार्युवाच त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव त्वमेव विद्या द्रविणं त्वमेव त्व
मेव सर्वं मम कृष्ण नाथ विदुर उवाच वासुदेवस्य ये दासाः शांतास्तद्गतमानसाः तेषां दासस्य दासोऽहं

राम
ना.

गोमूत्रगर्भे सततं स्मरंति ध्यानेन तेनेह हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबंति १८ सहदे
वउवाच वासुदेवस्य ये भक्ताः शांतास्तद्गतमानसाः तेषां दासस्य दासोऽहं भवेयं जन्मजन्मनि १९ धौ
म्यउवाच आर्त्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्त्तमानाः संकीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवंति २० सर्वदुःखविप्रमुक्ताः हरिसंकीर्त्तनात्सुखिनो भवंतीत्यर्थः अश्वत्था
मोवाच गोविंद केशव जनार्दन वासुदेव विश्वेश विश्व मधुसूदन कृष्ण विष्णो श्रीपद्मनाभ पुरुषो
त्तम पुष्कराक्ष नारायणाच्युत नृसिंह नमो नमस्ते २१ श्रीकृष्णउवाच कृष्ण कृष्णेति कृष्णेति यो मां स्म
रति नित्यशः जलं भित्त्वा यथा पद्मं नरकादुद्धराम्यहं २२ कृष्ण कृष्ण कृपालो त्वमगतीनां गतिर्भ
व संसारार्णवमग्नानां प्रसीद पुरुषोत्तम २३ प्रह्लादउवाच नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं
तेषु तेष्वचला भक्तिरच्युतास्तु सदा त्वयि २४ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अ
निच्छयापि संस्पृष्टो दहत्येव हि पावकः २५ वसिष्ठउवाच गोकोटिदानं ग्रहणेषु काशी प्रयागगंगा
युतकल्पवासः यज्ञायुतं मेरुसुवर्णदानं गोविंदनामस्मरणेन तुल्यं २६ वेदव्यासउवाच अच्यु
तानंतगोविंदनामोच्चारणभेषजात् नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहं २७ एवं संकीर्त्तनं यः
करोति किं तस्य दानैः किं तीर्थैः किं तपोभिः किं मखैः कीर्त्तयेति स्मरश्रेष्ठं देवं नारायणं विभुं २८
नित्यानन्दवाजपेयस्तेषां नित्यश्रीर्नित्यमंगलं येषां हृदिस्थो भगवान्मंगलायतनो हरिः २९ सकृ

31

तस्तैरेहेषु पुण्यस्य पापस्य विदानभूते उच्चारणादेवनराणां मंनीदृ नारायणायेतितथार्थवादः नारायणाइतिश्र
र्थवादइतिव वाक्यद्वयोच्चारणं तु क्रमेण पुण्यपापप्रकारणं भवतीत्यर्थः पद्ये हि द्विद्वे भवतीति श्लोकं मेगच्छा
स्वर्गोविंदपदारविंदं यद्येनरैस्ताविषयानिहस्थः क्रोशतमेभो स्तुहलोचनेति ११ हे चित्त त्वमागच्छ कि
मिति गोविंदे प्रतिगच्छ किमर्थं भवत्याय दिगच्छे तमोमध्ये विषयवासनाः हृति ष्यातीति चेत्तर्हि द
कुस्वकमललयनेति उच्चैर्घोषकुर्विन्यर्थः नथैव विश्वासरूपे मार्कंडेयवचने नारायणसहस्रा
हे पद्मनाभ भगवतने प्रणतोस्मि हृषीकेश किं नो मृत्युकरिष्यति १२ इत्यादिष्टश्लोकोक्तेः कार्ति
कमहात्म्ये ते यन्नाकुलक्रमार्ज्ञे तेषां च सफलो भवः येभ्युमाराधितो विष्णुर्नामसंकीर्तनादिभिः ध
सम्यगाराधितो विष्णुः किंत्वयत्कलितेहितो अत्रदृष्टांतेन सदाचारप्रमाणयति श्रीत्वतचरणोर्थेन ध्रुवः
सम्यग्पाचितः पुराश्चाहयहीतानागेंद्रो यन्नामसंस्मरणात्पुरा १४ विप्रक्षः सप्तर्षिप्राप्तो ज्ञातो येन यमेत्न्कः
न केवलमयमेव किंतु … की तेन … स्मरणेन सद्गतिप्राप्तः अपितु सर्वेप्यस्तीत्याह यन्नामस्मर
णादेव जन्तायाश्चदिसद्गति ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चान्याः सर्वजातयः १५ योषितः सर्वज्ञातीनाम
नुपनानां संशयः मनुष्याधिकारत्वा … मस्तीतिवचनात् अतस्त्वयार्चितो विष्णुस्तस्मात्रिर्थ्यं प्रयच्छे
ति १६ सूतउवाच नारायणो नाम नरो नराणां प्रसिद्धचौरः कथितः पृथिव्यां अनेकजन्मार्जित
तपापसंचयं हरत्यशेषं स्मरणमात्रएव १७ श्रीरुद्रोवाच येमानवा विगतरागपरापरज्ञा नाराय

रा.म. वायतेकलिः १ कलिशब्देन पापमित्यर्थः द्विजो वा राक्षसो वा पि पापी वा धार्मिको पि वा । रामरामेति
ना. यो वक्ति स मुक्तो भव बंधनात् २ आलस्याद्यातमस्मयेयस्य नाम संकीर्तनेरितं सभितामेंऽलभातेः परं
पदं न वा मुयात् ३ रामरामेति रामेति ये वदंत्यपि सर्वदा तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः
४ गरुडध्वजोसौ गोविंद केशव हरेऽच्युत पद्मनाभ दामोदर जनार्दन पते नरसिंह राम कृष्ण त्रिविक्रम
मधुसूदन जनार्दनेति मम के द्विज वदंतियः प्रहर्षः समृतः ५ नक्तं दिनमहोरात्रं रमात्रयोरस्य नाम स्व
त्वामालापसंकेतकेतिमम्मसुद्धस्यार्थः चतुर्णां वेदानां हृदयमिदमाकृष्य विधि नाचतुर्भिर्वद
नैः स्मृतम् द्विनारायणपदं तदेतन्नायं तेवपम निशमात्मानमधुनापुनामोजानीमो नानीमोन
हि वैतां घाकिमपि नारायणपदं चतुर्णां वेदानां कमानंतरवद्वात्मकेनविधिना ग्राह्मणां सारमाहृत्य लो
कानां कीर्तनायदत्तमित्यर्थः अतएव तिष्ठता गच्छता वापि जाग्रता स्वपता पि वा शयनेनापि
केन जप्यो नारायणः सदा ८ सर्वावस्थासु सर्वदा नारायणः सर्वमेनमात्रे सेव्य इत्यर्थः गृह्णी
ष्व सर्वभावेन राम सर्वहृदालयं यद्यपि तत्कुराचारो भक्त्या पूतो भविष्यति भागवते द्विजिवच
ने महापातकियुक्तो पि यन्नामस्मृतिमात्रतः प्रयाति मुक्तिं देवेशं तं कथं पारयाम्यहं ९ वि
ष्णुरुवाच परोप्येतानि विष्णुस्वामममनामसत्ताः सदा मत्कथाश्रवणे सक्ताः वदंति सततं हि मां १० च
तुर्थस्कंधे पार्वतीवचनं यद्व्यक्षरं नाम गिरेरितं न्मणां सकृत्प्रसंगादघमाशु हंति तत् पवित्रकीर्तिं त
मलंघ्यशासनं भवानहो द्वेष्टि शिवं तरः १ शिवेतरः अमंगलः सकृत्प्रसंगात् पवित्रकीर्तिं तमलंघ्य
शासनं भवानहो द्वेष्टि शिवे शिवेतरः पवर्गोच्चारणात् म्लेच्छशासनं अलंघितानां अहो हि वाकोच

32 यनेकाहृत्यावेदत्रयपारायणानां फलं सकृच्चारायणनामोच्चारो ददातीत्यर्थः एवं कृतो नारायणनाम्नः माह वेदे
रामायणे स्कान्दे पुराणे भारते तथा आदौ मध्ये तथा चान्ते हरिः सर्वत्र गीयते ४१ तथा वेदाक्षराणि यावंति
पठितानि द्विजातिभिः तावंति हरिनामानि कीर्त्तितानि न संशयः ४२ इति वचनात् येन वेदात्मकहरिना
म संकीर्त्तितं कृतं तेन सर्ववेदपारायणफलं प्राप्तमिति ज्ञेयं यज्ञेषिनामेति स्मृतेः श्रीभागवते यन्नाम
श्रुतमनुकीर्त्तितं वेदकस्माद्वा नाम यदि पतितः प्रलंभनाद्वा हंत्यंहः सपदि नृणामशेषमन्यं कं शेषमन्त्यके सो
पाद्भवतस्त्वामपायेन्मुमुक्षुः ४३ यन्नाम पतितो महापातकान्यपि अनुकीर्त्तयेन्नर्द्दिसप्तहोदिति किं वक्तव्यं
यतो सावेचनत्रणामशेषस्त्रहः पातकं सद्योदहति कथमनुकीर्त्तयेदन्यतः श्रुतेनाश्रकस्माद्वा श्रातीवासनं प्र
लंभनाद्वा परिहासाद्वा नमस्कोशेषाद्भक्तं कमपत्तदाश्रयेत् यदेवकीर्यपसनकालकूटं जितवा सयापायपदत्य
ताच्छी लेभेगतिधात्रुचिनां ततोऽन्यः किंवा दयालुं शरणं व्रजेम ४४ सकृन्मनः कृष्णपदारविंदयोर्निवेशि
तं तद्गुणरागि यैरिह न ते यमं पाशभृतश्च तद्भटान्स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः ४५ हरिचरणा
रणारविंदयोः सकृदेकवारं मनो वेशितं यैस्ते स्वप्नेपि यमं तांश्च न पश्यन्ति कुतेः पुनर्जाग्रदवस्थायां
यतस्ते चीर्णनिष्कृताः कृतसकलायाः सकृतश्लोकः पापगतेयकृच्चिनामकीर्त्तनाज्ज्ञाताज्ञातेयद्गुण
रूपकर्मणात् हे गतेयकृच्चिरूपचिंतनात्तेरामभद्रं भजचित्तसर्वदा ४६ इति श्रीरामनाममहात्म्ये
श्रुतिस्मृतिस्पुराणेतिहासोक्तेप्रचुराप्रमाणविरचिते पंचविंशतमप्रकरणं २५ एवं प्रकरणेषु
केषेवाञ्छदेवेदेवरणागमपिमनोनिवेशं कुर्वंति तेस्वप्नेपियमहतान्नपश्यंति तो व्रजपुराणे कृतानाम
संकीर्त्तनमहात्म्यमाह वेदव्यास उवाच अज्ञानाद्वा तु जगन्नाथपीतांबरधराव्यय इतीरयंति ये नित्यं नते वा

राम
ना

यथकामस्य विषयविषयप्राप्तिरपि भवति अतो भगवानेवोपास्य इत्याह अथसंदूवित्यांद्य रामहरामहर्म्मर्पह
याराजाः सत्यं निस्सर्गमोहो वसहरेहरिभक्तितः ३१ परं तन्निष्कामतया नामसंकीर्तनादिभक्तिकार्या
दित्यर्थः नामसंकीर्तनाद्यस्य पापमस्येह प्रदेवैः समं विनाशमायाति देवकोष्ठ्यथि कल्पतः ३२ अ
स्येह प्रदेवैः रोगादिभिः अधिकरूपेनेनतत्र देवताभ्यः परमानंदसत्यज्ञानस्वरूपत्वादिति दर्शितः
सत्यज्ञानमात्रेदत्त्वदोषैर्निष्कृतेः अतः श्रीविष्णुनामसंकीर्तनेनैव मम सर्वकालोगाङ्कवित्याह हरे
राम हरेराम रामहरे इति व्याहरतो नित्यं छित्वा नृपाद्वेयायतमम किंच यस्य नामपरो निमिषग्रह्य
हत्यादिदोषतो नाशुयेषमानकेस्यः किंपुनः कथनेपरं ३३ अपरं स्तत्र पातकमित्यर्थः कीर्तन
प्रभावे दर्शयति नैवेकमेवध्वका वै जिह्वाग्रं वर्तते वैष्णवी आश्वाभगवन्नाम जगत्कृत्स्नं पुना
ति हि ३४ आश्वास्याव पित्रास्वतितारयति अतएव जिह्वालग्नापि यो विष्णुकीर्तनीयत्नकी
र्तयेत् लग्नापि मोक्षात्रि अग्नौ सत्तारोहेति दुर्मतिः ३५ अभक्तरित्यर्थः इतिमत्स्यब्रह्मकैवर्तयो
र्वचनेभ्यः तथाच अग्निपुराणे अग्निष्टोमादिकर्माणि समपात्यातिकलौयुगे गंगास्नाने हरेर्नाम निरा
पायमिदं द्वयं ३६ निरपायं हि साद्दिसूत्रमित्यर्थः नाम्नः स्मरणमेव दर्शयति गोविंदेति सम्यगुच्चार्यपरंद्व
पितकल्मषः तत्र वैधुर्यं विष्णुर्ह्यात्मा गोविंद नमस्तेपियिवान् ३७ अद्वात्मा स्मृहवितइत्यर्थः श्रीभागव
ते बहुगोनामरराजर्षिभ्यान्त्येयत्ना मिहायुषः मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिः ३८ आदित्य
पुराणे स्थोयन्तेषि मासानि याथीतः सकृदंजसा सर्वाचारायणोत्पुकाममनस्य फलमश्नुते ३९

33 नाध्वरकर्मकः योनामवदतेविष्णोस्तेनसर्वंकृतंभवेत् २३ समंनाथैवादःविपक्षेवाधकमाह ब्राह्मणोवेद
विद्याःहामन्त्रक्रियारहितोयदि हरिपादाब्जः सविज्ञेयः संसारोनास्यनश्यति २४ श्रुतिश्च ऋचोअक्षरे
परमेव्योमन्यस्मिंदेवाअधिविश्वेनिषेदुः यस्तन्नवेदकिमृचाकरिष्यति यइत्तद्विदुस्तइमेसमासते १
भगवन्नाममहीनस्यजातिःशास्त्रंजपस्तपः अप्राणस्येवदेहस्यमंडनंलोकरंजनं यथा २५ अथवादेवा
अभक्तस्यवेदशास्त्राणिपाठमात्रेणसर्वथाननारयंति तत्कुतः आचारहीनंनपुनंतिवेदायद्यप्य
धीताः सहषड्भिरंगैः छंदांस्येनंमृत्युकालेत्यजंतिनीडंशकुंताइवजातपक्षा २६ इतिस्मृतिवचनात्
आचारोनामवेदार्थानुष्ठानंयतोईश्वरप्रतिपादकाः सर्वेषांवेदानांवाक्यानांब्रह्मणिसमन्वयादिति
परोक्षवादोवेदोयंबालानामनुशासनं कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा २७ नाचरेद्यस्तुवेदोक्तं
स्वयमज्ञोजितेन्द्रियः विकर्मणाह्यधर्मेणमृत्योर्मृत्युमुपैतिसः २८ संसारात्संसारांतरंप्राप्नोतीत्यर्थः
योवाएतदक्षरमविदित्वागार्ग्यस्मिंल्लोकेतपस्तप्यतेतवान्तवदेवास्यलोकोभवतिलोकोदेहोवायोवाएतद
क्षरंगार्गिविदित्वास्माल्लोकात्प्रैतिसकृपणः इतिबृहदारण्यके तस्मादभक्तस्यजातिःशास्त्रंजपस्तप
आदिसर्वमपार्थंयथामृतस्यशवस्यालंकारादिकंतद्वदितिद्वयोरर्थः व्यासादियुक्तस्यप्रावचनंकुतइत्यतआह
दारुकिंनचलसंगंकिंनश्वसंतिभस्त्रिका कश्चिद्वीणानवदतिसजीवत्वंनतावता २९ तस्मात्स
मस्तश्रेयसांमूलंहरितोरुक्रमसेवनं यन्नमालेनरंयतक्तंजीवतीतिनशोकमः ३० सर्वेषांवेदोक्तानांपु
ण्यानांमूलकारणंभक्तिविष्णुभजनंनम कुर्वंभाक्तीवनीतिवक्तेनशाक्यनद्दत्यर्थः हरिभजनेनैववि

रा.म. रविकुलान्वयदीपप्रभासीताजीवनहेतु किं वदामः वैरामास्यतेमानसे १४ यन्नामास्तिरामास्यतेयस्य
मा. हृदिस्थे च चेतर्हि सर्वं साधनजातेमर्थं मिस्याह पठति शकलवेदः शास्त्रपारंगतोवा यमनियमपरोवा
धर्मशास्त्रार्थकृद्वा अपिलसकलतीर्थस्नानकोवाहिताग्निर्नहियदिहृदिरामः सर्वमेतद्वृथा स्यात् १५
अपि नहृदयमध्ये राम चेद्रस्यये धोत्कृतमजननजन्मानो सर्वदानेदरीस्या कृतमपि सुकृतं तैः दुःखदू
पेणासर्वं फलति च स्तु खले स्वलेषु नो भावनीयः १६ एतदर्थं महादेव आह अहं भवन्नामगृणन्कृ
तार्थो वसामि काश्यामनिशं भवान्या मुमूर्षमाणस्य विमुक्तये हं दिशामि मंत्रं तव राम नाम १७
वानरात्मलि संपातिरुवाच यन्नामस्मृतिमात्रतोपरमितं संसारवारानिधिं तीर्त्वा गच्छति दुर्जनोपि
परमं विष्णोः पदं शाश्वतं तस्यैव स्थितिकारिणस्त्रिजगतामस्मद्गताः प्रियाःस्य किन्त्वं समुद्रमात्र
नरणाशङ्क्यः कथं वानराः १८ जयस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते अहिंसया च भूतानां जय
यज्ञः प्रशस्यते १९ इति महाभारते किं च यस्य नाम सततं जपंति येज्ञानकर्मकृतबन्धनं क्षणा
त् सद्य एव परिमुच्य तत्पदं यांति कोटिरविभासुरं शिवं २० यस्यादपंकजरजः श्रुतिभिर्विमृग्यं
यन्नाभिपंकजभवः कमलासनश्च यन्नामसाररसिको भगवान्पुरारिस्तं रामचंद्रमनिशं हृदि भा
वयामि २१ यस्यादपंकजपरागसरागयोगिवृन्दैर्जितं भवभयं जितकालचक्रैः यन्नामकीर्तन
पराजितदुःखशोकैर्देवस्तमेव शरणं सततं प्रपद्ये २२ इति रामायणे वाल्मीकाद्दिवचना
नि दर्शनीत्रस्ये ववर्ते व्यासोत्रनमेव नाम माहात्म्यं वेदव्यासउवाच नाधीतवेदशास्त्रोपि नकृ

34 सकाश्यये विद्याप्रादुर्भवस्तेषांकदाचने ३ तदेवनववनामश्रीशंकरःकाश्यामुपदिशतीत्याह सर्वज्ञःशं
करःसाक्षात्पार्वत्यासहितःसदा त्वद्रूपमेवसततंध्यायन्नास्तेरघूत्तम ४ मन्मुमूर्षोःसदाकास्यांतारकं
ब्रह्मवाचकं रामरामेत्युपदिशन्सदासंतुष्टमानसः ५ अतस्त्वंजानकीनाथपरमात्मासिनिश्चितं स
र्वेतेमाययामूढास्त्वांनजानंतितत्वतः ६ इतिरामायणोक्तेः पद्मपुराणेच मुमूर्षोर्मणिकर्ण्यामर्धो
दकनिवासिनः अहंदिशामिमंत्रंतारकब्रह्मसंमितं ७ ब्रह्मत्वंजानकीनाथइतिपाद्मेशिवोक्तिः
रुद्रस्तारकंब्रह्मव्याचष्टेनासावमृतीभूत्वामोक्षीभवतितस्मादविमुक्तमेवनिषेवेतअविमुक्तंनविमुंचे
देवमेवैतद्याज्ञवल्क्यइतिश्रुतेश्च रामत्वत्तोधिकंनामयदुक्त्वैवपुमांस्तरेत् विनापिसेतुनिर्माणम
पारंभवसागरे ८ श्रीरामउवाच सकृदेवप्रपन्नायतवास्मीतिचयाचते अभयंसर्वभूतेभ्योददाम्ये
तद्व्रतंमम ९ किंच मन्नामजापकालोकेमामेवशरणंगताः निरपेक्षान्नान्यगतास्तेषांहृदयोहमन्वहं
विश्वामित्रउवाच रामरामेतिरामेतिरामचंद्रेतिवास्मरन् जनोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंदति
१० जगज्जैत्रैकमंत्रेणरामनाम्नाभिरक्षितं यःकंठेधारयेत्तस्यकरस्थाःसर्वसिद्धयः ११ रामरामेतियो
नित्यंमधुरंगायतिक्षणं सब्रह्महासुरापोवामुच्यतेसर्वपातकैः १२ किंमंत्रैर्बहुभिर्विनश्वरफलैरा
यासमाध्यैर्मखैःकिंचिल्लोपविधानमात्रविफलैःसंसारदुःखप्रदैः एकःसन्नपिसर्वमंत्रफलदो
लोपादिदोषोज्झितः श्रीरामःशरणंममेतिपरमोमंत्रोयमष्टाक्षरः १३ हनुमानुवाच दृष्टासाजन
कात्मजारघुपतेशुष्यत्समुद्रान्तरालंकानामपुरीसमस्तजनहेरतत्रास्तिवीरप्रभो राक्ष्यस्तनिपातये

राम
ना॰

ष्टागच्छन्निर्गीयाणीवं इत्यग्रेपतितेदृष्ट्वामामस्तुर्मुनिसत्तमाः ७६ उत्तिष्ठोत्तिष्ठ भद्रं ते सफलः सत्तमा
गमः उपदेष्टा महे त्वमंकिंचित्तेनैव मोदसे ७७ परस्परे समालोक्य ऋष्टितोयं द्विजाधमः उपेत्य एवमतद्
तैलख्यापि शरणंगताः ७८ रत्नाणीयः प्रयत्नेन मोक्षमार्गोपदेशतः इत्युक्त्वा राममंत्रेणा मम त्वमस्यादर
पूर्वक ७९ एकाग्रमनसात्रैव मरेति जप सर्वदा आगच्छामः पुनर्यावत्तावद्भक्त्या सदा जप ८० इत्युक्त्वा प्रय
युः सर्वे मुनयो दिव्यदर्शनः अहं यदोपदिष्टं तेन तथा करवमे जपा ८१ जपत्नेकाग्रमनसा वाह्यविस्म
तवानहं एवं बहुतिथे काले गते निश्चयरूपिणः सर्वसंगविहीनस्य वाल्मीकोभन्ममोपरि ततो युग
सहस्रांते ऋषयः पुनरागमन् ८२ मामूचुर्निष्क्रमस्वेति तच्छ्रुत्वा तूर्णमुत्थितः वल्मीकान्निर्गतश्चाहं नी
हाराद्दिव भास्करः ८३ ममचप्याहुर्मुनिगणा वाल्मीकिस्त्वं मुनीश्वरः वाल्मीकात्संभवो यस्माद्द्वितीयं
जन्मतेभवत् ८४ इत्युक्त्वा ते ययुर्दिव्यगतिं रघुकुलोत्तम अहं ते नाम नामस्य प्रभावादीदृशोऽभवं ८५
अद्य साक्षात्प्रपश्यामि ससीतं लक्ष्मणेन च रामराजीवपत्राक्षं त्वां मुक्तो नात्र संशयः ८६ इति वाल्मी
कोक्तेः स्वकृतश्लोकः यन्नामकीर्तनात्सद्यो विमुच्यन्ते नराधमाः श्रीरामायनमस्तस्मै स्वभक्तक्लेश
हारिणे ८७ इति श्रीरामनाममहात्म्ये अग्रतिसंस्तिपुराणोतिहासोक अच्चात्माश्रम विरचिते चतुर्विंश
तमं प्रकरणं २४ सर्वप्रकरणं अहं ते रामनामस्य प्रभावादीदृशोऽभवं इति वाल्मीकिनोक्ते पुनः स
हे सप्रवाह श्रीरामपरमेश्वरं एवं भक्तस्तव नामसंकीर्तनमहिमा हृष्टपनेयः १ अनन्यभक्तिसंपन्ना
मुक्तावपवनसंशयः तन्नामामृतहीनानां मोहात्स्वप्नेपि नो भवेत् २ लोके तत्र भक्तिनिरताः तन्मंत्रापा

35 ९ तत्रस्थलभवं दुःखं विप्राणां तृष्णोनिरीक्षते संसारधर्मानिरक्तस्य तेमानसंग्रहे ९१ यद्यपि तिये सर्वे
महापापैर्भान्वितः तेमन्यमनेन्तमेकं अलेपकं सर्वगतं वरेण्यं तेषां हृदये महर्सीतयावस ९२ निरंतरा
भ्यासदृढीकृतानां त्वत्पादसेवापरिनिष्ठितानां त्वन्नामकीर्त्याहतकल्मषाणां सदा समेतत्समहृद्द
देवे ९३ शमतत्त्वाममहिमा वर्णिते केन वा कथं यत्प्रभावाद्देहे रामब्रह्मर्षित्वमवाप्नवान् ९४ अ
हे पुरा किरातेषु किरातेषु किरातैः सहवासितः जन्ममात्रद्विजत्वमे शूद्राचाररतः सदा ९५ शू
द्रायां बहवः पुत्रा उत्पन्ना मे जितात्मनः ततश्चौरैश्च संगम्य चोरोऽहमभवं पुरा धनुर्बाणधरो नित्यं जी
वानामंतकोपमः एकदा मुनयः सप्त दृष्टा महति कानने ९७ साक्षाद्भासयाप्रकाशेता ज्वलनार्कसम
प्रभाः तानन्वधावं लोभेन तेषां सर्वं परिच्छदान् ९८ गृहीतुकामस्तत्राहं तिष्ठ तिष्ठेति चाब्रुवन् दृ
ष्ट्वा ते मां तु यो पृष्टवन् किमायासि द्विजाधम ९९ अहं तानब्रुवं किंचित् रस्तात्मनिमज्ज्ञमा पुत्रदाराद
यः सन्ति बहवो मे बुभुक्षिताः १०० तेषां संरक्षणार्थाय चरामि गिरिकानने ततो मामूचुरव्यग्राः
पृच्छ गत्वा कुटुंबकं १०१ यो यो मया प्रतिदिनं क्रियते पापसंचयः यूयं तद्भागिनः किं वा नेति वे ति
इत्यवक्तु यत १०२ वयं स्थास्यामहे यावदागमिष्यसि निश्चयः तथेत्युक्त्वा गृहं गत्वा मुनिभिर्यदु
दीरितं १०३ अपृच्छं पुत्रदारादीन् तैरहं क्रोधितस्तु तम १०४ पापं त्वैव तत्सर्वं वयं तु फलभागिनः
१०५ तच्छ्रुत्वा जातनिर्वेदो विचार्य पुनरागमं मुनयो यत्र तिष्ठन्ति करुणापूर्णमानसाः १०६ मुनी
नां दर्शनादेव शुद्धान्तःकरणोऽभवं धनुरादीन्परित्यज्य दंडवत्पतितोऽस्म्यहं १०७ रक्ष मामपि

रा म
ना·

वाल्मीकिरुवाच गत्वा रामोथ वाल्मीकेराश्रमं ऋषिसंकुलं तत्र दृष्ट्वा समासीनं वाल्मीकिं मुनिसत्तमं ४४
ननाम शिरसा रामो लक्ष्मणेन च सीतया दृष्ट्वा रामं रमानाथं वाल्मीकिर्लोकसुंदरं ४५ जानकीलक्ष्म
णोपेतं जटामुकुटमंडितं कंदर्पसदृशाकारं कमनीयांबुजेक्षणं ४६ दृष्ट्वैव सहसोत्थाय विस्मयानि
मिषेक्षणः आलिंग्य परमानंदं रामं हर्षाश्रुलोचनः ४७ पूजयित्वा जगत्पूज्यं भक्त्यार्घ्यादिभिरादृतः
फलमूलैः समधुरैर्भोजयित्वा च लालितः ४८ राघवः प्रांजलिः प्राह वाल्मीकिं विनयान्वितः पितुरा
ज्ञां पुरस्कृत्य दंडकानागता वयं ४९ भवंतो यदि जानंति किं वक्ष्याम्यत्र कारणं यत्र मे सुखवासाय भ
वेत्स्थानं वदस्व तत् ५० सीतया सहितः कालं किंचिदत्र नयाम्यहं इत्युक्तो राघवेणासौ मुनिः सस्मि
तमब्रवीत् ५१ त्वमेव सर्वलोकानां निवासस्थानमुत्तमं तवापि सर्वभूतानि निवाससदनानि हि
५२ एवं साधारणं स्थानमुक्तं ते रघुपुंगव सीतया सहितस्येति विशेषं पृच्छतस्तव ५३
तद्वक्ष्यामि रघुश्रेष्ठ यत्ते नियतमंदिरं शांतानां समदृष्टीनामद्वेष्टॄणां च जंतुषु ५४ त्वामेव भजे
तां नित्यं हृदयं तेधिमंदिरं धर्माधर्मान्परित्यज्य त्वामेव भजतो निशं ५५ सीतया सह ते राम तस्य हृत्सु
खमंदिरं त्वन्मंत्रजापको यस्तु त्वामेव शरणं गतः ५६ निर्द्वंद्वो निःस्पृहस्तस्य हृदयं ते सुमंदिरं निरहं
कारिणः शांता रागद्वेषविवर्जिताः ५७ समलोष्टाश्मकनकास्तेषां ते हृदयं गृहं त्वयि दत्तमनोबुद्धि
र्यः संतुष्टः सदा भवेत् ५८ त्वयि संत्यक्तकर्मा यस्तन्मनस्ते शुभं गृहं यो न द्वेष्ट्यप्रियं प्राप्य प्रियं प्राप्य
न हृष्यति ५९ सर्वं मायेति निश्चित्य त्वां भजेत्तन्मनो गृहं षड्भावादिविकारान्यो देहे पश्यति नात्मनि

36 तचेतसो ३९ श्रवणास्मरणान्नामसंकीर्तनादिनायेनकेनप्रकारेणामथ्यसगुणोवानिर्गुणोपरमेश्वरेभव
तियेषांमनोवृत्तिःसर्वदावर्त्ततेषांभक्तानांमहेपरमात्माहरिः अचिरान्नशीघ्रंसंसारार्णवात् उद्धर्त्तासाहेणा
द्धरिष्यामीत्यर्थः एवंज्ञात्वापुंसोभजनेकर्तव्ये तदुक्तंरामायणे ब्रह्मघ्नोगुरुतल्पगोपिपुरुषःस्तेयीसुरापो
पिवामातृभ्रातृविहिंसकोपिसततंभोगैकबद्धातुरः नित्यंरामसितिजपनरघुपतिंभक्त्याहृदिस्थंतथाध्या
यन्मुक्तिमुपैतिकिंपुनरसौस्वाचारयुक्तोनरः ३७ पापिष्ठोवादुरात्मापरधनपरदारेषुसक्तोयदिस्याच्चित्ते
स्नेहाद्भयाद्वारघुकुलतिलकंभावयन्संपरेतः भूत्वाशुद्धांतरंगोभवशतजनितानेकदोषैर्विमुक्तः सद्योरा
मस्यविष्णोःसुरवरविनुतंयातिवैकुंठमाद्यं ३८ तातिभ्रष्टोतिपापीपरधनपरदारेषुनिंद्यादितोवास्तेयी
ब्रह्मघ्नमातापितृवधनिरतोयोगिवृंदापकारी यःसंपूज्याभिरामंपठतिचहृदयेरामचंद्रस्यभक्त्यायोगी
द्रैरप्यलभ्यंपदमपिलभतेसर्वदेवैःसमर्च्यः ३९ तथाचोक्तंस्कांदयामले श्रीराममनामाक्षरमंत्रबीजसंजीव
नाचेन्मनसिप्रविष्टा हालाहलंवाप्रलयानलंवामृत्योर्मुखंवाविशतांकुतोभीः ४० रामरामेतियेनित्यं
जपंतिमनुजाभुवि तेषांमृत्युभयादीनिनभवंतिकदाचन ४१ तावद्देवमदस्तेषांमहापातकदंतिनां
यावन्नश्रूयतेरामनामपंचाननध्वनिः ४२ अतएवाद्येराममंत्रेसर्वेभ्योन्यमंत्रेभ्यःश्रेष्ठःसाध्यइत्या
ह मंत्राःसंतिसहस्रशोत्रजपतांक्लेशेनकामप्रदाः कोप्यश्राविसवेष्मतोपिविकलैःसानूपमंकिं
प्रदः कोप्याविमभियामिसंशयधियापृष्ठःसकाशीपुरप्रांतेकेचनपंचटंनमठेदिग्वाससंतापसे
४३ महादेवमित्यर्थः इत्यादिवाक्यैःश्रीराममनाममहिमावर्णितः अत्रार्थेरामायणे आख्यानं

रा.म.
ना.

मैत्रेयैरसनास्यगेवफलतीश्रीरामनामात्मकः २२ एवमिति श्रीरामस्मरन्मर्त्यः यदिदृष्टोयमेनवै कस्यत
मितितस्मिंवाक्यिवदिष्यमितदग्रतः २३ उत्तरेनास्तीत्यर्थः नरकेपच्यमानेनयमेनपरिभाषिते किंत्वयाना
र्चितोदेवःकेशवःक्लेशनाशनः २४ अनाढ्योनकथंपूजनीयइतिचेत्तत्राह अरण्येसंतिपत्राणिनद्यास्वदे
कानिच हस्तपादादयःसंतिकथंनार्चितोहरिः २५ किंच आश्चर्येणमयःआह नारायणेतिमंत्रा
स्तिवाग्स्तिवशवर्तिनी तथापिनरकेघोरेपतंतीतिमेतदद्भुतं २६ यमंप्रत्याहभगवान् कृष्णकृष्णेतिकृष्णेति
योमांस्मरतिनित्यशः जलंभित्वायथापद्मंनरकादुद्धराम्यहं २७ एवमुक्तंभगवताप्रतोदेहेंद्रियशुद्ध्यर्थंभ
गवंतंभजतामेववाणशेंद्रियशुद्धिमाहतदुक्तमगस्तिसंहितायां यन्नामकीर्तनेनैवगुणानामपिकीर्तने
भक्त्याश्रीरामचंद्रस्यवचसःशुद्धिरिष्यते २८ तत्कथाश्रवणेनैवतस्योत्सवनिरीक्षणे श्रोत्रयोर्नेत्रयो
श्चैवशुद्धिःसम्यगिहोच्यते २९ पादोदकस्यनिर्माल्यमालानामपिधारणे उच्यतेशिरसःशुद्धिःप्रणत
स्यहरेःपुनः ३० आघ्राणेगंधपुष्पादेरर्चितस्यतपोधन विशुद्धिःस्यादनेनस्यघ्राणस्येहाभिधीयते ३१
पत्रपुष्पादिकंयद्यद्रामपादयुगार्पितं विशुद्धेभगवत्येवचात्मनाधार्यतेयदि ३२ गृहोपसर्पणंचैवत
स्यानुगमनंहरेः भक्त्याप्रदक्षिणंचैवपादयोःशोधनंपुनः ३३ अथकर्माण्यथवापूर्वंयच्चहिस्तुसमर्पितं
तदेवपावनंलोकेतद्धिसर्वंविशोधयेत् ३४ पूजार्थंपत्रपुष्पाणांभक्त्यैवोत्तोलनेहरेः करयोःसर्वशुद्धाना
मियंशुद्धिर्विशिष्यते ३५ एवंप्रकारेणसर्वेंद्रियशुद्धिरित्यर्थः एवंरूपयाभक्त्याअहंभक्तंसंसारादुद्धरि
ष्यामीतिभगवानाह गीतासु तेषामहंसमुद्धर्तामृत्युसंसारसागरात् भवामिनचिरात्पार्थमय्यावेशि

37 किंच स्तवन्निस्मृवासुदेवं विपापो जायते नरः विष्णोः संकीर्तनान्नित्यं सर्वपापक्षयो भवेत् १८
भागवते (स्तवन्निस्मृवासुदेवं विपापो जायते नरः) स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः
परेशः विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सन्निविष्टः १९ अनन्यभक्त्या हृदि सन्निविष्टो
हरिः तस्य सर्वं पापं नाशयति नतु यमः नरकयातनया प्राणिनां पापं नाशयति यतो दंडकीर्तनग्रा
ह परेशः ब्रह्मादीनामीश इत्यर्थः त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि यत्र क्व
वाभद्रमभूदमुष्य किंको वार्थ आप्तोऽभजतां स्वधर्मतः २० स्वधर्मं त्यक्त्वा श्रीकृष्णं भजति यः स पुमान्
अपक्वः अपरिपक्वो भक्तियोगः यदि पतेत् यत्र क्व वा यस्यां कस्यां वा योनौ तावता तस्य किमभद्रममुष्य
वं पूर्वं भजनसंस्कारवशान्नाभद्रं च किंच स्वधर्मतो अभजता पुरुषेण को वा अर्थः आप्तः प्राप्तः न कोपी
त्यर्थः इदानीं हरिस्मरणं सर्वदुःखं नाशयतीत्याह तस्मिन्प्रविष्टे विलक्षुट्कर्मजा माया विनश्यमं
हत्ता महीयसः स एवोपयथाद्विष्यलितैयत्रागते हरिस्मृतिः सर्वविपद्विमोक्षणं २१ यस्माद्देवतस्मादु
जामः पारणां जगद्गुरुं नाम संतो यत्तस्तितिमेकप्रियः नकुलः अयं हितस्थितिपालनक्षणः सर्वेश्वरा
णां संभवाय देहिनां देहिनो भक्तानां भवाय मंगलप्राप्तिलक्षणः अवस्त्वसमयः अतः सोऽपि भगवान् स्वाके
स्त्वविधायस्तिकरिष्यतीत्यर्थः अतः श्रीरामनामात्मको मंत्रः जिह्वासंयोगमात्रेण प्रयस्त्वरणं विना
पि सी मृत्युपाशकालो फलतीत्यस्मात् सर्वदा सर्वैर्भजनमस्त्यादि आकृष्टिः कृतचेतसां सुमहतामप्युच्चाटनेचा
हे समाचरणं लमसकलोकस्य भगवद्दर्पविमुक्तैस्त्रियः नोदीतोऽनचदक्षाणां नचपुरस्सर्वयामनागीहते

नाम.
ना.

सर्वधर्मबहिर्भूतो भ्रष्टाचारोऽथवान्ततः कदाचिन्नारकेन्द्रः एवं नाम भक्त्या न पश्यति ७ श्रीरामनामस्मरतो
मानसे यस्य वर्तते नरस्यैव वत्तनेः राजा कुरुते लिपिमार्जनम् मिति ८ इंद्रियवैकल्येपि नाम भासोच्चारणे
दृष्टमान्सर्वपापैः प्रमुच्यत इत्याह अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान्विमुच्यते सद्यः कुरु
हं मात्र संशयं ९ यन्नामकीर्तनं भक्त्या विलापनमनुत्तमं मैत्रेयाशेषपापानां धातूनामिव पावकः
१० यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिंतने विघ्नो यत्र निवेशितात्मनसां ब्राह्मोपि लोकोऽल्पकः
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यच्युतः किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते
११ अच्युतः परमात्मा च वासुदेवः नाम संकीर्तनेन भक्तानां मुक्तिं यच्छति ददाति तत्र किं वक्तव्यं पापं नाश
यतीति यावत् एवं लवनत्वा राजन्सदा नारायणो विभुः यमलोकं न पश्येत नरकोस्तु कुतः पुनः १२ स्मृ
ण्वन्नपि स्वपन्निमेषस्मरन्नपि वदन्नपि कीर्तयन् महापातकजान्मर्त्यो मुच्यते नात्र संशयः १३ विलुहि
स्य विष्णोर्नामैव पुंसः शमलमपहरत्पुण्यमुत्पादयच्च ब्रह्मादिस्थानभोगाद्विरतिमथ गुरोः श्रीपदद्वं
द्वं भक्तिं तत्त्वज्ञानं च विष्णोरिह मृतिजननभ्रांतिबीजं च दग्ध्वा संपूर्णानंदबोधे महति च पुरुषं स्थापयि
त्वा निवृत्तं १४ अत एव येऽहर्निशं जगद्धातुर्वासुदेवस्य कीर्तनं कुर्वंति मानवास्तान्न कलिर्बाधते
कश्चित् १५ गोविंदेति सदा स्नानं गोविंदेति सदा जपः गोविंदेति सदा ध्यानं सदा गोविंदकीर्तनं
१६ इत्यनेन सर्वधर्मफलं भवतीति ज्ञेयं अत एव हरिभक्तानां विश्वासार्थं हृष्टेनेन सर्वपापक्षयकरं कृ
नामेत्याह शमायालं जलं वह्नेस्तमसो भास्करोदयः शांतिः कलावघौघस्य नामसंकीर्तनं हरेः १७

38 श्रीमहामहदेवनाम्नां भक्तानां संसारिणामस्मिनिति कृत्वा विश्वासो नास्ति तेषां मन्वादिभिः केवलेनामैव प्रायश्चि
त्तं नोक्तं यद्दामहानिरेकभयादिति चेन्न तु तः नामोच्चारणेन सर्वेषां पापिनां तारयिष्यति ततश्च सर्वे
षां भक्तिर्भविष्यतीति नामसामर्थ्यं ज्ञात्वा पापिनो लोके भक्तानां नु श्रीनाम नाम्नि विश्वासं सर्वेषां कथं नामकी
र्त्तनमस्माकं संसारात्तारयिष्यतीति निश्चयात्तेषां नामैव श्रुतिस्मृत्युक्तं प्रायश्चित्तं विहितमित्याह त
द्रुक्तं वा मत्पुराणे सोपि देहस्य कर्मात्रेणादेहे यः क्लेशवर्द्धनः पापौघो विलयं याति दानमंत्राद्विधेयथा २
किं च तत्प्रायश्चित्तिकर्म जन्मलोके वा गतमानसमेव वा यत्न नष्टीयते पापे कलौ गोविंदकीर्त्तनात् ३ ननु अस्मे
न नाम्ना सर्वपापक्षयस्तत्संभावितं तत्कास्य हेतुरिति चेत्तत्राह स्मृतिमंकरंदे व्याससंस्मृतिसंमतिः चिकि
त्सा ज्योतिषं मंत्रेतत्पैव धर्मनिर्णयः अन्यासिद्धानि चैतानि यत्र न लक्ष्यानि हेतुभिः ४ इत्यादिवचना
द्धेतुः कुतर्को नामजपे न कार्यः विष्णुपुराणे सकृन्नारायणेत्युक्त्वा पुमान्कल्पशतत्रयं गंगादिसर्वती
र्थेषु स्नातो भवति पुत्रक ५ मधुरमधुरमेतं मंगलं मंगलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपं
सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत्कृष्णनाम ६ अस्यार्थः एतत्कृष्णनाम म
धुरमधुरं मिष्टान्मिष्टतरं तत्स्वयमपि मात्रे चान्मंगलादिके सर्वं तारयेत् उद्धरेत् कथंभूतं सकलनिगमव
ल्लीसत्फले वेदलतायाः वल्लीतस्याः सत्फलं सत्स्वरूपं फलं चित्स्वरूपं ज्ञानस्वरूपं श्रुतिरपि सत्यं ज्ञानमानंदं
ब्रह्मेति तत्सकृदपि परिगीतं कृत्वा कृष्णाकीर्तितं श्रद्धया भक्त्या हेलया वा किं विष्णुनाम्नेति सावधंते हे
भृगुवर मंगलानां मंगलं हरेर्नामकीर्तनं श्रवणं स्मरणं पराणां भक्त्या नामोद्दमिमर्थः पद्मपुराणे

म्रियमाणस्य नाम्नश्चेद्वृषलीपतेः वैकुंठनामग्रहणं जिह्वामेव न कामर्हति १२ तत्रोक्तं क्वचाहं कितवः ।
पापो ब्रह्मघ्नो निरपत्रपः क्व च नारायणेत्येतद्भगवन्नाम मंगलं १३ शुक उवाच एवं स विप्लावितसर्वध
र्मा दास्याः पतिः पतितो गर्ह्यकर्मणा निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् म्रि
यमाणो हरेर्नाम गृणन् पुत्रोपचारितं अजामिलोप्यगाद्धाम किं पुनः श्रद्धया गृणन् यस्मात् कृत्वा
त्रिपथमधुलिहन् पुनर्विसृष्टमायाया गुणेषु रमते वृजिनावहेषु १५ अन्यस्तु कामहतस्यात्मरजः
जः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधि
यो यमकिंकरास्ते १६ नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन्
स्वभर्तृगदितं यमवाक्यं श्रुत्वात एव यमकिंकराः अच्युताश्रयं जनं न अच्युतभक्तं ततः प्रभृति द्रष्टुं बिभ्यति
स्म भयं प्राप्नुवंतः कथंभूताः प्रतिशंकमानाः इतिहासमिमं गुह्यं भगवान् कुंभसंभवः कथयामा
स मलये आसीनो हरिमर्चयेत् पुनः पुनः विश्वासार्थं हरेः पादोस्पर्शान् इत्यर्थः इत्यजामिलाख्या
नात् भगवन्नाममहत्वं ज्ञात्वा उक्तं अग्निपुराणे न तावत्पापमस्तीह यावन्नाम्ना हृतं हरेः अतिरेक
भयाद्याज्ञः प्रायश्चित्तं तरे बुधाः १७ अतिरेकभयात् अधिकभयादित्यर्थः स्कांदे तु श्लोकः यस्मा
रयति मनानि त्रिलोकीसंभवानि च सनामकीर्तनेनैव तस्मै रामात्मने नमः इति श्रीरामनाममहा
त्म्ये श्रुतिस्मृतिपुराणेतिहासोक्ते अच्युताश्रमविरचिते त्रयोविंशप्रकरणं २३ पूर्वप्रकरणांते न
तावत्पापमस्तीह यावन्नाम्ना हृतं अतिरेकभयाद्याज्ञः प्रायश्चित्तं तरेद्बुधाः १ इत्युक्तं तस्यायमाशयः

39 तेदेवसिद्धपरिगीतगाथायेसाधवः समदृशोभगवत्प्रपन्नाः तान्नोपसीदतहरेर्गदयाभिगुप्तान्नै
षांवयंनचवयःप्रभवामदंडे ७ येभगवतेप्रपन्नास्तेदेवैःसिद्धैःपरिगीतपवित्रगाथावर्णितगु
णकथाः अतस्तान्नोपसीदततत्समीपमपिमागच्छतयेषांवयंवयः कालोपिनप्रभवति केचित्तु
हिंदंडार्थमानेयाइत्यत्राह तानितिद्वाभ्यां तानानयध्वमसतोविमुखान्मुकुंदपादारविंदमकरं
दरसादजस्रं निष्किंचनैःपरमहंसकुलैरसंगैर्जुष्टात्गृहेनिरयवर्त्मनिवद्धतृष्णान् असतोदु
ष्टान्तानेवाह मुकुंदपादारविंदयोर्मकरंदरूपोरसस्तस्माद्विमुखान् कथंभूतान्निष्किंचनै
रजस्रंजुष्टात् नेविताद् नेषांतापकमाह निरयवर्त्मनिसंसारमार्गेगृहेवद्धातृष्णायैस्तान् जि
ह्वानवक्तिभगवद्गुणनामधेयंचेतस्वनस्मरतितच्चरणारविंद कृष्णायनोनमतियच्छिरएकदा
पितानानयध्वमसतोकृतविष्णुकृत्यानिति ८ यद्येषांजिह्वादयस्त्रयः नकृतंविष्णुकृत्यंयेनाम
कीर्तनादियैस्तानविंदआनयध्वमित्यर्थः श्रीशुकउवाच तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमं
हसां महतामपिकौरव्यविध्येकांतिकनिष्कृतं ९ जगतोपिमंगलरूपंएकांतिकंप्रायश्चित्तिकंर
मर्थः एकांतिकमेवाह शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः यथासुजातयाभक्त्याशुध्येन्ना
त्माव्रतादिभिः १० उद्दामानिमहांतिआत्माचित्तं नएवंशुचिनिर्णीयधर्मंभागवतंनृपतेयाम्यपा
शान्निर्मुक्तंविप्रंमृत्योरमूमुचन् इतियमदूतनविसृष्टत्वात्मांसेवाटक्कृत्वाअजामिलःस्वात्मानंप्रशा
ह अथापिमेदुर्भगस्यविबुद्धोत्तमदर्शने भवितव्यंमंगलेनयेनात्मासंप्रसीदति ११ अन्यथा

भा॰ स॰
मा॰

यतोऽतिविक्रमस्य ननु सम्यक्कीर्तयितात स्वपुत्रे विक्रोश्य न तु हरिं स्मृतवान् अशुचिरपि म्रियमाणोऽस्य
चित्तोऽपि मतिमवाप न तस्य निर्हरणमात्रेऽप्येतावानाभासेनापि सर्वपापक्षयः इत्येव तत्र स्मार्तिस्मृत्यादिविधि
यत्नपापवासनातदर्थं स्मृत्यकर्मेव हरेर्गुणानुवादः खलु सत्त्वभावन इत्यत्र यत्नेऽर्थेऽर्थेन हि हादशा
हिमरणमिति भावः गतिमेव नव्यादिदंनमहाजनोऽयं देव्याविमोहितमतिर्वत मायया लं त्रय्यां जडी
कृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ५ महाजनो मन्वादिः अयं भावः यथाम्
तसंजीवनौषधिमजानन्तौ वैद्यौ तानिहत्यं त्रिकटुकनिंबादीतिस्मरंति तथा सर्वपापशोधमुख्यं
हरिनामातिरिक्तं महाजनो नित्यं स्मिदं मन्नाल्पाद्वादशाहादिकं स्मरतीति किंच मायया देव्या अले
मोहितमतिर्यज्जनः स पर रहस्यमवगन्तुं विभुत्तितायाम् अस्यानीयत्र यत्प्रवादे मनोहरायां त्रय्यां जडीकृतायाम्
मितिविषाम तिर्यस्य अतो महत्येवकर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते इत्यनेन हि प्राकृतस्य लोकस्य
इति मे त्वादौ स्वाहालेव स्वदानस्यादस्य ग्राहकोनास्तीति निर्मन्वादिभिर्नोक्तं यद्वा साधीनः सिद्धो लीला
वतारस्वगरलादिनिवारणाय न यथा न म पुंजनेन तथा तिल कुन्तापरस्यनय न्त्रिरस्ताय परमं मंगलं हरे ना
म उक्तं च यस्य स्मरणाच्च नामोच्चारणयोगयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ५ यद्वा नाम
महात्म्यज्ञानेऽपि सर्वमुक्तिप्रसंगादिति ये ध्यादिकं ग्रंथविस्तरभयात्तन्नातिप्रपंच्यते एवं विमृश्य सुधियो भग
वत्यनन्ते सर्वात्मना विदधते खलु भावयोगं तेमेनदंडमर्हन्त्यथ यद्यमीषां स्यात्पातकं तदपि हन्त्युरुगाय
वादः भावयोगं भक्तियोगं अमीषां नाविमानकेन स्यादेव यदि स्यात्तदुरुगायवादः नामकीर्तनं तत्र हन्तीति

40 त्यं हरेः पश्यत पुत्रकः अजामिलोपि येनासौ मृत्युपाशाद्विमुच्यते ॥ २१ ॥ येनैव तेन नाम्नाजामिलो महापातक्यामपि
मृत्युपाशात्संसारपाशान्मुक्तः किं वक्तव्यं पातकादिति एतावतैव लोकेस्मिन्पुंसां धर्मः परः स्मृतः भक्ति
योगो भवति तन्नामग्रहणादिभिः आदिशब्देन श्रवणस्मरणादीनां ग्रहः सत्कृतश्लोकः यन्नामस्मरणाद्दो
षाः सर्वे नश्यन्ति सर्वथा निर्दोषाय नमस्तस्मै रामभद्राय मेरिपोः इति श्रीरामनाममाहात्म्ये कृतिस्थितपुराणे
तिहासद्वाविंशतमं प्रकरणं ॥ २२ ॥ ननु सकृदुच्चारितेन नामाभासेन कथं सर्वपापक्षयः स्यात् श्रद्धाभक्त्यादि
सादरविधानात् तथाहि सायं प्रातः रणन्भक्त्या दुःखग्रामाद्विमुच्येत् अनुदिनमिदमादरेण शृण्वन्ति
ति भक्त्यावेश्य मनो यस्मिन्वाचा यन्नामकीर्त्तयन् त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः श्रवणकीर्त्तनध्यानैः
हरेरद्भुतकर्मणः जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् इमाद्विश्रम्भिन्नेव पुराणोतत्प्रपद्यते पुराणान्त
रेव आयासः स्मरणे कोस्य स्मृतो यच्छति शोभनं पापक्षयश्च भवति स्मरतां तमहर्निशमिति ॥ १ ॥ अत्रैव च
तत्प्रसंकीर्त्तनेन विलीनेति मस्तु केवलमेते सामस्तानामपि कोरन्ध विध्यैकोतिकनिष्कृतं ॥ २ ॥ इत्यादिना सम्यक्की
र्त्तनाद्यवगम्यते किं च तथा सति किमिति मन्वादयो द्वादशाब्दानि समरेषु प्रायश्चित्तमन्वपद्यन्तामिति चे
न्नेत्याह एतावतालमघनिर्हरणाय पुंसां संकीर्त्तनं भगवतो गुणकर्मनाम्नां विक्रुश्य पुत्रमघवान्यदजामिलो
ऽपि नारायणेति म्रियमाण इयाय मुक्तिं ॥ ३ ॥ भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्त्तनमिति यावत्
एतावतां पुंसामघनिर्हरणाय पापक्षयमात्राय अलं उपयोगेनास्ति अलंशब्दोऽत्र वारणे यथाहामरसिंह
अलं भूषणपर्याप्तिशक्तिवारणवाचकमिति ॥ ४ ॥ उपयोगाभावमेवाह अजामिलो महापातक्यपि नारा

रा न
ना॰

पादिभिः ८२ नायमर्जंमहृदयेंतदपीशाग्निसेवया तैलपीडानादिभिस्तापयत्यन्येव दूषयतेन एवं प्रथमोजातेम
लिनेंतस्यपापकर्तुर्हृदये यद्वातेषांपापानांहृदयेस्थंसंस्कारात्म्येनस्पृश्यति तदपीशाग्निसेवयाकीर्तना
दिस्पृश्यतीत्यर्थः अयंभावः महांतमपिपापानिसकृदुच्चारितेनैवनाम्नानश्यंति सकृत्प्रवर्तितेनदीपेनेवगा
ढध्वांतानितदाहृत्पापांतरस्यानुस्मृतिः दीर्घकालदीपधारणवत्सोनरस्यततस्तद्वासनातयातद्हृ
दयशुद्धिः एतदर्थमेवतत्रतत्रावृत्तिविधानं तथाहि आयासःस्मरणेकोस्यस्मृतोयच्छतिशोभनं पापी
तयश्चभवतिस्मरतमहर्निशं ८३ इत्यादिषु तदप्युक्तं गंगाम्बुवाद्भिःस्वल्पमलभावेनः तदपीशाग्निसेवयेति
च अतोस्यहरिनाम्नैवपापक्षयः वासनातयस्तुमहापुरुषदर्शनादिभिरिति तथापिप्रायश्चित्तमितिस्मा
र्त्ताश्चोक्तागितमितिचेत्तत्राह अज्ञानादथवाज्ञानादुत्तमश्लोकनामयत् संकीर्तितमघंपुंसोदहेदेधोयथान
लः ८४ अज्ञानादिति बालकेनप्रदीप्तोग्निर्यथाकाष्ठराशिंदहत्येवतद्वत् नन्वेवमपिपरिषदुपदिष्टंप्र
द्धाहीनेनचकृतंप्रायश्चित्तमितिचेत्तत्राह यथागदंवीर्यतममुपयुक्तंयदृच्छया अजानतोप्यात्मगुणंकुर्या
न्मंत्रोप्युदाहृतः ८५ अगदमौषधंवीर्यवत्तममितिवक्तव्येवीर्यतममित्युक्तंयदृच्छया श्रद्धाहीनमुपयुक्तंभ
क्षितंभिषग्गुणोदजानतोपिस्वगुणमारोग्यंकुर्यात् मंत्रोपिनामकलयासकार्यंकुर्यादेवनहिवस्तुश
क्तिःश्रद्धामपेक्षतइत्यर्थः तदुक्तंविष्णुधर्मोत्तरे हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः अनिच्छयापिसंस्पृ
ष्टोदहत्येवहिपावकः ८६ इत्यादि नचात्रप्रमाणंवक्तव्यमदृष्टत्वादित्याह अत्रत्रयस्तेपंकृतोजने वैस्वानां
वाकोस्फुताअजामिलोविमुच्यत्यधर्मप्रतिगमादूर्ध्वंहृतोनमुक्तंवनालात्ततियमस्याह नामोच्चारणमहात्म्य

५१ ष्कृतं यदसौ भगवन्नाम म्रियमाणः समग्रहीत् अथ तस्मादेनं मा मार्गेणामापनयत यतमशेषाणामघानां निष्कृ-
तायेन यद्यस्मात्समग्राहीत्संपूर्णं नामोच्चारितवान् नामैकदेशेनाप्यलमिति भावः म्रियमाणइत्य-
नेन पुनः पापांतरासंभावात् ननु यं पुत्रनामाग्राहीत् ननु भगवन्नाम तत्राह सांकेत्यं पारिहास्यं वा
स्तोभं हेलनमेव वा वैकुंठनामग्रहणमशेषाघहरं विदुः १४ सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं प-
रिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनामोच्चारणेनेति सावज्ञं एवंभूतमपि
वैकुंठनामोच्चारणं सकलजन्मांतरस्यपापहरं विदुः ननु नायं संकल्पपूर्वकं वैकुंठनामाग्रही-
त् किंतु पुत्रस्नेहपरवशः तत्राह पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः हरिरित्यवशेनाह पुमान्नार्ह-
ति यातनाः १५ अवशेनापि देहस्य पतनादियोगे हरिरित्याह स यातनां नार्हति पुमानित्यनेन नात्र वर्णाश्र-
मादिनियमः उक्तं भवति अवशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नः भग्नगात्रः संद-
ष्टः सर्पादिभिः तप्तो ज्वालादिभिः आहतो दंडादिना ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं न तु स-
नामग्रहणमात्रेण पापतारतम्यज्ञैर्ऋष्यादिभिरन्यथैवं तत्राह द्वाभ्यां गुरूणां च लघूनां च गुरूणि च ल-
घूनि च प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महात्मभिः १६ गुरूणां गुरूणि लघूनां
लघूनि प्रायश्चित्तानि पापानां तारतम्यं ज्ञात्वा महात्मभिर्मन्वादिभिरुक्तानि सत्यं तत्र तथैव व्यवस्था ह-
रिनाम्नस्तु नेयं व्यवस्थोक्ता विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः इति वचनात् न च स्मराविंदुपा-
नेमहापातकस्मरणावत् नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्य नायमतिभारः तैस्तान्यघानि पूयंते तपोदानव्र-

रा॰ म॰
ना॰

स्यात्तेभ्यरिनाममन्तामहे विप्रासो नातवेदसः स्मृत्यन्तरेतेनामचिह्निकृतेभ्यादिषु नामन्तस्तपोदानादि सर्वं धर्मे
ष्वाधिकारमवगम्यते उपपादितेच मंत्रार्थवादानामपि प्रमाणरूपः अनुवादरूपः भूतरूप इति स्वार्थे प्रामाण्य
दैवताधिकरणेन स्मार्त्तीनां तयार्णानामाभासमात्रेणैव सर्वांच निष्कृतेः स्यादिति ननु कामकृतानां बहूनां
पातकानां सहस्रशः आवर्त्तितानां द्वादशाब्दकोटिभिरपि अनिवर्त्तनीनां कथमेकमेव नामप्रायश्चित्तं स्या
त्तत्राह स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहन्ता ये च पातकिनोपरे ८ सर्वे
षामप्यघवतामिदमेव सुनिष्कृतं नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ९ सुनिष्कृते श्रेष्ठप्राय
श्चित्तं इदमेव हेतुः यतो नामव्याहरणात् तद्विषया नामोच्चारकं पुरुषविषया मदीयायमिति विष्णो
र्मतिर्भवति भवति श्रूयमेवोपपादयति न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान् व्रतादि
भिः यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकं ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतै
स्तथा शुध्यति उदाहृतैरुच्चारितैर्यथा नामपदैरिति नमो नमो मीमांसादिक्रियायोगोपि नापेक्षित इति दर्शितं किंच
तन्नामपदोच्चारणमुत्तमश्लोकस्य गुणानां चोपलंभकं व्यापकं भवति ननु कृच्छ्चान्द्रायणादिवन्नामापि निवृ
त्तिमात्रोपक्षीणमित्यर्थः नैकान्तिकं तद्धि कृतेपि निःकृते मनः पुनर्धावति चेदसत्पथे तत्कर्म निर्हारमभी
प्सतां हरेर्गुणानुवादः खलु सत्वभावनः १० नैकान्तिकं नात्यन्तशोधकं तन्निःकृते यस्मिन्कृतेपि
असत्पथे पापमार्गे मनो धावति कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव
महत्प्रायश्चित्तं यतो सौ गुणानुवादः खलु सत्वभावनः चित्तशोधकः अर्थेनमापनयनकृताशेषाघेन

42

मधुनिघ्नतानतस्मकालमेवास्मत्स्वामिनामकोवागच्छतीति विचार्यतत्समीपं विसृष्टाः शीघ्रमायमु
क्तवंतेमहोग्रान्विकृताकारान्महाहरिनिर्गतमद्वारे दृष्ट्वा यमदूतानूचुः किमर्थमत्रागतायूयंतान्ययम
दूताआहुरिमंपापिनंयमालयानेतुमागताः वयंपुनरूचुर्विष्णुभक्तास्ममापनयंतेतिमविघ्नवाक्यंस्मृत्वाउ
क्तवंतः कस्मादस्मान्निषेधथयूयंतत्राहुर्वैष्णवाः अयंहिकृतनिर्वेशोजन्मकोटीहमामपि यद्व्याजहारवि
वशोनामस्वस्त्ययनंहरेः १ यच्चस्मादिविवशोपिहरेर्नामव्याजहारउच्चारितवान् नकेवलंप्रायश्चितमा
त्रंहरेर्नामश्रवणेनापितत्समापनमपि तत्कृतः सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं बद्धःपरिक
रस्तेनमोक्षायगमनंप्रति २ इतिस्मृते मनुहारप्यान्यादिककर्मणांहुरणकरेहरेर्नामेतिग्रन्थे यच्चस्मृत
वनामोक्तानतपोयज्ञक्रियादिषु न्यूनंसम्पूर्णतांयातिसद्योवंदेतमच्युतं ३ इत्यादिवचनात्स्वान्तत्रेणत्वयंनि
वर्त्यंतेंदेर्नामकथंयस्मान्नत्राह यतेनैवह्यघोनोस्यकृतंस्यादघनिष्कृयः यदानारायणायेतिजगादचतु
रक्षरं ४ अघोनः अघवतःपापिनःप्रायश्चित्तं यः प्रायश्चित्तभावमात्रंचतुरक्षरंयत्रामजगादएतेनैवकेवले
नचतुरक्षरनामोच्चारणेनाधिकंचतद्दिनं नारायणायेत्यामगच्छेतेवंविक्रोशतःपुत्रंप्रेमभक्त्याह्वानेन अयंभावः क
र्मोगलेपिहरिनाम्नः सादिवानादिवयोगप्रक्रमेतसर्वप्रायश्चित्तार्थत्वंयुक्तमेव तथाहि अवशेनापियन्ना
म्निकीर्तितेसर्वपातकैः पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव ५ इतिवचनात् तावत्सहस्रशोनाम्ना
त्वानेन्यमवगम्यते नचैतदर्थवादइतिशंकनीयंविधिशेषत्वाभावान्नचविष्णुश्रवणादस्यशेषत्वाकल्प
नीयायदाग्नेयोष्टाकपालोभवमादिवद्यामार्थत्वेनदैविकस्यैनोपपत्तेः तथाचस्मृतिः मन्त्रास्मतं

रा म
ना

ॐ अजयन्नमस्करोति श्रीकृष्णं यस्यावतारगुणकर्मविडंवनानि नामानि येऽसुविगमे विवसा गृणन्ति ते
नैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं प्रपद्ये ४२ अयमर्थः यस्यावतारदेवस्यावतारा
दीनां विडंवनमनुकरणमस्ति येषु तानि नामानि येऽसुवियोगमे प्राणवियोगे विवशा अस्मावथ विने
द्रियाश्च यदि गृणन्ति उच्चारयन्ति ते अनेकजन्मशमलं अतीतानीतदेहेषु कृतं पापं सहसा तृणमात्रेण
हित्वा मत्काश्चपावृतं नेहं तं स्वरूपं संयान्ति अहमेव तस्य विद्यानेहमित्यपरो देवेन जाने तितमजं श्रीरामं
प्रपद्ये प्राप्नोति किंच अभक्तोऽपि पुमान्हरिनामकीर्तयन्सर्वपातकान्मुच्यते इत्याह पतितः स्खलितो
वार्तः क्षुत्वा वा विवशो गृणन् हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ४३ विस्तरहस्ये प्रह्लादः किन्नानेव
दानामग्रहणात् विस्तरेणोद्धृतैर्नेरेणे किं प्रयोजनं यच्चात्मनो वा ऋषिमाह कारणं गोविंदो गोविंद इति
स्मृते रहेति निर्भर्त्स्य गोविंदेति किरिम्पत्थे ऋषिकृतश्लोकः ३ इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणोक्तिनिद्दा
सोकेश्व चक्रनाथमविरचिते एकविंशप्रकरणं २१ एवं प्रकरणान्ते अजामिलनामज्ञानेन महापातक
व गोविंदनामसंकीर्तनमात्रेणाल्पपातीमुक्तं एतदर्थं श्रीमद्भागवते षष्ठस्कंधे अजामिलाख्यानं तस्य
देवपूर्वांके प्रमेये दर्शीनमात्रेणाल्पपातीमुक्तं एतदर्थं श्रीमद्भागवते षष्ठस्कंधे अजामिलाख्यानं तस्य
देवपूर्वांके प्रमेये दर्शयति तत्राजामिलः कश्चिद्द्विजः कान्यकुब्जे दासीपतिः दासीसंसर्गदुष्टाचारो द्विजाः अनः
समहापातकी तस्य महता कालेन स्तुरामन्त्रप्राप्तस्तत्काले यमदूतास्तं यत्नेनेनमागतास्तान्दृष्ट्वाश्च भयात्पुत्रस्नेहेन दूरस्थं पुत्रं नारायणेति सबालक्रीडासक्तमिनवालं नारायणेति अवादीत्
भयात्पुत्रस्नेहेनदूरस्थंपुत्रमल्लवालकेपुत्रंनारायणायेतिसवलिङ्गिराश्राकामितवांस्तेनारायणानां

४३ तेनप्रवेशितः यान्तितद्रूपतांराजन्सर्वंतद्रूपमेतज्जत् तद्रूपतांयान्तिएवंदेहमपरित्यज्यतेनैवशरीरेणतंप्राप्नो
ति सएवभवतीति स्मरणानुभावइत्यावत् नचात्रप्रमाणंवक्तव्यंप्रत्यक्षेणादृष्टत्वात् ततएवश्रीरामात्मा
नमात्मत्वेनाह रामोऽस्मीतिसर्वदाभावयेत्पूर्वोपक्रांतस्योत्तरमित्येवंज्ञेयं यस्यचवेदनात्तद्वेदनात्तदेवभव
तीतिवचनात् इतिसंक्षासितोध्यानेनसम्यक्सूक्तमिदानींसर्वसाधारणंवर्णाश्रमादीनांश्रीरामनामसं
कीर्तनमुच्यते तत्रादौसर्वधर्मरहितानामपिहसर्वांसकीर्तनेनैवोत्तमांगतिंप्राप्नुवंतीत्याह उक्तंचपद्म
पुराणे अनन्यगतयोमर्त्याभोगिनोपिपरंतपाः ज्ञानवैराग्यरहिताब्रह्मचर्यादिवर्जिताः सर्वधर्मोज्झिता
विष्णोर्नाममात्रैकजल्पकाः सुखेनयांगतिंयान्तिनतांसर्वेपिधार्मिकाः सर्वेपिधार्मिकाः निषेधाःस्युरेत
योरेवकिंकराः ३८ एतयोःस्मरणास्मरणयोःसर्वेविधिनिषेधाः किंकराःस्मरणास्मरणांतर्भूताःस्युर्भ
वंति विष्णोःस्मरणेविधयःकृताः अस्मरणेचनिषेधाःकृताइतिभावः अतएव अशुचिर्वाशुचिर्वापिगच्छंस्ति
ष्ठन्स्वपन्नपि वासुदेवस्यनामानिसदासर्वत्रकीर्तयेत् ३९ अस्पृष्टदेहेनामसंकीर्तनादोषइतिचेत्तत्र
आह नारदपंचरात्रागमेदेवताऋषिनामानिनोविःपरिकीर्तयेत् रामकृष्णस्यनामानिदिवानि
परिकीर्तयेत् तथाअन्यत्रापि विष्णोर्दिव्यानिनामानिसर्वदापरिकीर्तयेत् नाशौचंकीर्तनेयतस्सप
वित्रकरोयतः ४० इतितस्मात्सर्वस्यदिवारात्र्यादिवारात्र्यादिषुविष्णुनामसंकीर्तनंकार्यंसंसारसमुद्रभि
रितिसिद्धं कीर्तनात्किंस्यादित्याह अभक्तभक्तानामापन्नागमस्यागमस्यागमनादिजं तस्यपतेनात्रसंदे
हेगोविंदस्यकीर्तनात् ४१ इत्यग्निपुराणवचनात् भागवतेच नामग्रहणमात्रतःकैवल्यप्रदमेष

१म
गी॰

स्मायं लोको नास्ति धनार्जनविवाहाद्यसिद्धेः न च परलोकः धर्मस्यानिष्पत्तेः न च सुखं संशयेनैव भोगास्यासं
भवात् उपसंहरति योगेति योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं आत्मवंतं न कर्माणि निबध्नंति धनंजय
योगेन परमेश्वराराधनरूपेण तस्मिन्संन्यस्तानि समर्पितानि कर्माणि येन तं कर्माणि स्वफलैर्न बध्नंति
यतस्तु ज्ञानेन अकर्तात्मावबोधेन संछिन्नः संशयो देहाद्यभिमानलक्षणो यस्य तं चात्मवंतं अप्रमादिनं क
र्माणि लोकसंग्रहार्थानि स्वाभाविकानि वा न निबध्नंति यस्मादेवं तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासि
नात्मनः छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत आत्मनोऽज्ञानेन संभूतं हृदि स्थितमेनं संशयं
शोकादिनिमित्तं देहात्मविवेकज्ञानखड्गेन छित्वा कर्मयोगमाश्रयेति गीतास्वर्थे यथा योगप्रवृत्तिमाह
भक्तात्मनः कल्पो निश्चित्य देहान्ते दिद्योषधं देवज्ञस्येश्वरज्ञानाद्विष्णुर्द्विपरमामता भक्तात्मनः पेचभ
नत्रूपसत्तयो विशेषायंते तपश्च्यौद्गायणादिविद्यारामकृष्णादिमंत्रानुष्ठानेश्योपयंते बुद्धेर्मनसः ज्ञानेया
स्त्रात्स्य देवज्ञस्य जीवस्येश्वरज्ञानेन परिपूर्णमात्वं ईश्वर एवाहमस्मीति क्रमात् भक्तात्मनाऽहोनो ध्यायंते शुद्धि
तित्यर्थः न केवलं हरिस्मरणेन हरिमेव प्राप्नोति पुमान् किंतु यं यं चापि स्मरन्भावं त्यजत्यंते कलेवरं
तं तमेवैति कौंतेय सदा तद्भावभावितः यस्मादेवं तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च मय्यर्पित
मनोबुद्धिर्मामेवैष्यस्यसंशयं इति गीतास्वर्थे एतत्कृतः बह्वकालमभ्यासेन यतस्त्वस्मरणाभ्यास
येन तत्संपातादस्मृतिर्योगे सति ततोऽन्तरजन्मनि तद्देवासो प्राप्नोतीत्यर्थः भागवते यत्र यत्र मनो देही
धारयत्सकलं धिया स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां तदाहं दृष्टान्तेन कीटः पेशस्कृतं ध्यायन्कुड्यां

वेनैव वृजिनं संतरिष्यसि सर्वेभ्योपि पापकारिभ्यो यद्यप्यतिशयेन पापकारी त्वमसि तथापि सर्वं पापसमु
44 द्रं ज्ञानप्लवेनैव सम्यगनायासेन तरिष्यसि समुद्रवत्स्थितस्यैव पापस्यातिलेशत्वेन मात्रेणैव नाश इतिश्रा
ंतिदृष्टांतेन वारयन्नाह यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन यथैधांसि काष्ठानि प्रदीप्तोग्निर्यथा
भस्मीभावं नयति तथात्मज्ञानरूपोग्निः प्रारब्धकर्मव्यतिरिक्तानि सर्वाणि भस्मीकरोतीत्यर्थः
तथाचश्रुतिः यथापर्वतमादीप्तं नाश्रयंति मृगद्विजाः तद्वद्ब्रह्मविदो दोषा नाश्रयंति कदाचनेति
तत्रहेतुः नहि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति पवित्रं
शुद्धिकरमिह तपोयोगादिषु मध्ये ज्ञानतुल्यं नास्त्येव नहि सर्वे ज्ञानमेव किमिति नाभ्यस्यंतीत्यत आह तत
आत्मनि विषये ज्ञानं कालेन महता कर्मयोगेन संसिद्धो योग्यतां प्राप्तः सन्स्वयमेवानायासेन लभते न तु क
र्मयोगेन विनेत्यर्थः किंच श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः ज्ञानं लब्ध्वा परां शांतिमचिरेणाधि
गच्छति श्रद्धावानुपदिष्टेर्थे आस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठः संयतेंद्रियश्च तज्ज्ञानं लभते
नान्यः अतः श्रद्धादिसंपत्त्या ज्ञानलाभात् प्राक्कर्मयोगप्रवणश्चार्थमनुष्ठेयः ज्ञानलाभानंतरं तु न
तस्य किंचित्कृत्यमस्तीत्याह ज्ञानं लब्ध्वेति मोक्षमचिरेण प्राप्नोति ज्ञानाधिकारिणमुक्त्वा अनधिका
रिणमाह अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं लोकोस्ति न परो न सुखं संशयात्मनः
अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञाने जातेप्यश्रद्दधानश्च जातायामपि श्रद्धायां ममेदं सिध्येद्वा न
वेति संशयाक्रांतचित्तश्च विनश्यति स्वार्थाद्भ्रश्यति एतेषु त्रिष्वपि संशयात्मा सर्वथा विनश्यति यतस्त

गा॰ म
ना॰

गात्तृप्तिलक्षणं फलं प्राप्नोति तदेवेति मुक्तिनीजमनुत्तमं यस्मादेवं तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो म्रियते नयाति
नरकं शुद्धः संक्षीणाखिलपातकः स्वनियर्मसकृच्चयेष्वपुङ्क्ते अश्वमेधसहस्रैस्तु वाजपेयशतैरपि यत्पापं विल
यं याति स्मरते नरपातिन ह्यरौ ब्रह्महत्यासहस्राणि अगम्यागमनानि च एकेन ध्यानयोगेन नश्यन्त्येव त्या
नपेक्षणात् आत्मानं समत्यानाकर्णा वजपाच्युपतेर्गृहस्थादेराधिक्यमाह गृहस्थोक्तानि पापानि भवे
ताश्रमिणां यदि शौचवक्तो ध्यंने तेषां ब्रह्मणः प्राकृदर्शनात् ब्रह्मदर्शनात्प्राकृ अपरोक्षात्मज्ञानात्पूर्वमेव
मुमुक्षुदशायामाश्रमस्वीकारमात्रादेवेत्यर्थः शौचवक्तोथवं अल्पस्मरणमात्रेणापापशुद्धिरितियावत्
तदुक्तं एकरात्रोपितस्यापि यतेर्योगातिरुच्यते तत्पापाकाया गृहस्थेन प्राप्तुं क्रतुशतैरपीति वचनात् अत एवाश्र
मविशेषात् फलादिकमस्याचात इत्यर्थः तथाहि ज्ञाननिष्ठो विरक्तो वा मत्पेतकः सलिङ्गानाश्रमं स्तक्त्वा चरेद
विधिगोचरः लिङ्गानि दण्डकमण्डल्वादीनि चिह्नानि तैः सहाश्रमान्स्यजेत् अलपेतकः भोगवासनामात्रशू
न्यो यः कश्चन ज्ञानी वा विरक्तो वा हरिभक्तो वा श्रवणस्मरणस्मरणकीर्त्तनपर इत्यर्थः ज्ञाननिष्ठस्य ज्ञाना
भ्यासैनैव शुद्धिर्नान्यथा तस्य कर्मानधिकारादित्याह ज्ञानिनां सेवनाच्छुद्धिर्ज्ञानस्येतिन संशयः क्षीयन्ते चा
स्य कर्माणि ज्ञानेब्रह्मणि तद्विदः तद्विदः ब्रह्मविद इत्यर्थः ज्ञानस्य सेवनात् स्मरणात् ज्ञानिनः पुंसः शुद्धिः
पापक्षयो भवति कस्मिन्सति ब्रह्मणि ज्ञाने सतीत्यर्थः अत एव सर्वमन्यत्परित्यज्य यस्तु ब्रह्मणि वर्त्तते
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा किंच यदा लोयत्तु कौमारे यत्पाते यौवने कृते तत्सर्वं मतिलं ति प्र
स्मते विष्णोः प्रणश्यति ज्ञानस्यामर्थ्यं दर्शयति तदुक्तं गीतासु अपि चेदसि पापेभ्यः पापकृत्तमः सर्वं ज्ञानप्ल

45 दयोयदा तदा विद्यादिसंसारोत्पन्नतिर्भविष्यतीति एतस्मिन्नयस्य देहादिनाकृतकर्मणयाप्यात्मनो नास्ति अथवैतन्म
स्वरूपत्वाद्दिनिरतरमनन्तेथाने यस्य सपवत्सन्न्यासीदरलरलकाषायदण्डमात्रेण वेषधारकस्तथापि वेषधारणा
मात्रेण गृहस्थादीनां सेवनम् उक्तं भगवता दण्डमात्रावलम्बिनोऽदण्डिनोऽपि वा दण्डकाषायमात्रेण यतिः पूज्यो यु
धिष्ठिर गृहस्थादेरपि कस्मैसयाह सर्वत्वेयोनयोर्थ्यं हन्ते हन्सर्षपयोरिव अन्तरं हिमवहृष्टं तथाभिवृत्तगृहः।
स्थयोः आश्रमसीकारमात्रेण गृहस्थादेः पूज्यत्वमाह तेउलस्य यथा चर्मण्यथा ताम्रस्य कालिमा नश्यते कि
यया वत्स संन्यासेऽपि यद्दिजन्मनामिति भारतवचनात् पूज्य एव परमार्थस्तु भिन्नः पूर्वोक्तस्य कुतः विदुषस्सन्न्या
सेविविदिषासंन्यासेऽपि निर्दयोरुक्तत्वात् पुनः प्रकृतमध्यानमाह विष्णुस्मरणे च प्रायश्चित्तान्यशेषाणि तपः
कर्मात्मकानि वै यानि तेषामशेषाणां कृष्णानुस्मरणं परम् परमं कृष्णं चांद्रायणादिप्रायश्चित्तेभ्य इत्यर्थः किंच
कृतेपापेन तापो वै यस्य पुंसः प्रजायते प्रायश्चित्तं तु तस्यैव हरिसंस्मरणं परं सदा स्मरणे फलमाह प्रातर्निशित
यास्तायंमध्याह्नादिषु संस्मरन् नारायणमवाप्नोति सद्यः पापक्षयान्नरः किंच कृतेरताई तत्पूर्वोक्तस्मरणा
र्थं पुनर्लिखितमित्यर्थः किंच विष्णुस्मरणसंक्षीणसमस्तक्लेशसञ्चयः मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोनुमी
यते किंच वासुदेवे मनो यस्य जपहोमार्चनादिषु तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलं श्रीरामभक्तः सर्व
प्रारब्धवशात्स्वर्गं प्राप्नोति तदा तस्य विघ्नोऽन्तरायः यतो सौ स्वर्गः मुक्तिप्रतिबन्धकः अयं तत्सकाराधि का
रीहोमश्राद्धादिषु गृहस्थादिद्वयविषयकं तथाह यमः अद्वैतभावमाश्रित्य द्वैताचारेण वर्त्तते हृदेति
पितरस्तस्य हा कष्टं पतितः पुत्र इति पितृगाथाः अन्तरायः कस्मादुच्यते तत्राह हनाकष्टं रामनेपुत

रा. म
ना.

त्रमेवेतिचिंतनंध्यानमुच्यते ध्यानस्यविस्मृतिः सम्यक्समाधिरभिधीयइतिवसिष्ठोक्तवचनात् उक्तं
चमुरूप देशाज्ञाम्यादिसर्वधान्नवर्णाश्रमधर्मन्विनात् भावानेतान्परित्यज्यस्वतभावंभावयेद्बुधः विपदे
दोषमाह अहमेवापरंब्रह्मवासुदेवाख्यमव्ययं इतिस्यान्निश्चितोमुक्तोबद्धएवान्यथाभवेत् सर्वोपाधि
विनिर्मुक्तोचैतन्यंचनिरं मद्दूराहमितिज्ञातेकथंवर्णाश्रमीभवेत् वर्णाश्रमवानपुरुषोबद्धःआत्मानसे
ध्यानवान्मुक्तइत्यर्थः उक्तंच ब्रह्मबोध वर्णाश्रमाभिमानेनश्रुतेर्दासोभवेन्नरः वर्णाश्रमविनिर्मुक्तःश्रु
तेर्मूर्ध्निसवर्तते इतिज्ञाननिरूपणंकृत्वापुनर्ध्यानेनिरूपयति ब्रह्महत्यासहस्राणित्रगम्यागमनानि
च एकेनध्यानयोगेननश्यंत्यन्यान्यपितत्क्षणात् अतोज्ञानव्यतिरिक्तसर्वयोगेषुध्यानयोगःश्रेष्ठइत्यर्थः य
दिस्यान्मानकेकिविघ्नोमोक्षयोगसमाहतः योगमेवनिषेवेतनान्यंयत्नेसमाचरेत् योगशब्देनज्ञानयोगः
यद्वाध्यानयोगइत्यर्थः स्वकृतश्लोकः रामत्वमतिबिंबमस्मिमतेपार्थक्यमज्ञाणितोमायाभेदकरीन
ध्यानवविमोहंचत्वमेवधमः नादेवोमुपसंहृत्याङ्गरीति यालोकेषणास्त्वयः पश्चात्त्वमसीतिवाक्यघटनाम
त्याभवेन्निश्चितं इतिश्रीरामनाममहात्म्येकृतिस्मृतिपुराणेतिहासोक्तेस्वच्छनाश्रमचिन्तेविंशप्रकरणं २०॥
पूर्वप्रकरणे प्रसादायलुनस्यैवयस्याहंकारइष्यते अहंकारफलार्थित्वानत्तसन्न्यासिनोक्वचित् अहं
कारफलार्थित्वादिति अहंकारोनामदेहेस्मात्मबुद्धिर्देहएवाहमितिमानन्तमूत्रपदिष्टतत्वमस्यादिवाक्य
रस्यसन्यासिनोनास्त्येव अतःअहंब्रह्मास्मीतिनित्यमनुसंधानात् कर्मनदेहस्यैवविषयःमिथ्याभूतस्य
मिथ्याभूतमस्तुअयमात्मासमोनित्यश्चनकिंचित्करोतिनकिंचित्प्राप्नोतीति तदुक्तं ज्ञानामृतेनतृप्तस्य
कृतकृत्यस्ययोगिनः नैवास्तिकिंचित्कर्तव्यमस्तिचेन्नसतत्त्ववित् अतः तत्त्वमस्यादिवाक्यो— :सम्यग्बोध

कारफलार्थित्वान्नतत्संन्यासित्वः कुचित् तदुक्तं विधिषु श्राद्धेष्वधिकारी नाश्रमाद् इति तदुक्तं भगवता शौचमा
चमनं स्नानं न तु नोदनया चरेत् तथा वा सन्न्यासश्राद्धं प्राश्नं प्राश्नं भजेन्मुनि अथ सकलनित्यनैमित्तिकादिकर्म
त्यागात् शारीरकेवलकर्मकृतानि पदार्थज्ञानसाधनभूतश्रवणपरो भवेत् ननु कर्मत्वाविशेषाच्छारीरकेपि
कर्मणि दोषः स्यादिति चेन्नेत्याह तदुक्तं गीतासु निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कु
र्वन्नाप्नोति किल्बिषं शरीरं शरीरनिर्वाहकं मात्रम् यदुक्तं स्नानशौचभिक्षादिनात् शरीरकर्म विषयकेन नित्य
नैमित्तिकविषयमित्यर्थः यस्मादेव तस्मात्संन्यासपूर्वकं श्रवणं कर्तव्यमिति तथा च स्मृति नित्यं कर्म परि
त्यज्य वेदान्तश्रवणं विना वर्तमानस्तु सन्न्यासी पतत्येव न संशयः तेपरार्थो विवेकाय सन्न्यासः सर्वकर्मणा
कृत्वा विधीयते यस्मात्त्यागी पतितो भवेदिति तथा च श्रुतिः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्या
सितव्य इति तत्र श्रवणादेवात्मज्ञानं भवति ज्ञानादेव तु कैवल्यमिति श्रुते ज्ञानस्वरूपमाह यत्तत्त्वमसि त्रिदाका
रे मायातीतो हृदये ध्रुवं तदेवाहं परं ब्रह्मैकममलाभिरामिकमिति नाहं कर्ता कारयिता वा न च कार्यं नाहं
भोक्ता भोजयिता वा न च भोज्यं नाहं दुःखी दुःखयिता वा न च दुःखं सोऽहं प्रत्यक्चिन्मात्रस्वरूपः परमात्मेति
किं च नाहं मनुष्यो न च देवयक्षो न ब्राह्मणः क्षत्रियवैश्यशूद्रः न ब्रह्मचारी न गृही वनस्थो भिक्षुश्च नाहं नि
जबोधरूप इति यथा न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः अनेकात्मकत्वाविशुद्धैकसु
सिद्धस्तदेकोऽवशिष्टः शिवः केवलोहमिति हस्तामलकाचार्योक्तं पंचीकरणविवरणे च देहेन्द्रियमनोबु
द्धिप्राणाहंकृतिभिर्विलक्षणोऽस्म्यखिलाद्वयं परं ब्रह्मैवाहमस्मीत्यभेदेनावस्थानं समाधिरिति तथा रामाय
णे च तत्त्वावबोधपरैकः सर्वोत्तरणावकः प्रोक्तः समाधिशब्देन तत्तत्सौमवस्थिति किंचि सोऽहचिन्मा

रा॰ म॰
ता॰

रजनीपादे ब्रह्मध्यानं समाचरेत् रजन्याः रात्र्याश्चतुर्थपादे चतुर्थप्रहरे प्राप्ते सति शुचिर्भूत्वा आसने उपविश्या
स्थिरासनं ब्रह्मध्यानं निर्गुणोहं रामोस्मीति स्थिरचेता नन्वहं अदेहो रामो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् स
च्चिदानंदरूपोहं नित्यमुक्तस्वभाववान् इति तथा च श्रुतिः सदा रामोहमित्येतत्तत्त्वतः प्रवदंति ये न ते संसा
रिणो नूनं राम एव न संशयः श्रुतिस्तु एवं वेद स मुक्तो भवतीति याज्ञवल्क्यः नन्वहं सोस्म्यहं बोधे नित्यशुद्ध
विमुक्तैकमलेखं अहं दम... सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवती
ति श्रुतेः एवं निरंतरं कृत्वा ब्रह्मास्मीति भावना हरत्यविद्याविक्षेपान् रोगानिव रसायनमिति वेदांतप्रक
रणोक्तत्वात् नन्वहं सर्वेश्वराचार्यैः वैदिकं साधनं सर्वं ज्ञानकर्मात्मकं पुरा महानर्थफलायैव न मोक्षा
येति निश्चितिः तर्हि किमित्याह प्रथमपापात्मविज्ञानविरहादन्यसाधनैः यावत्किंचित्फलं नादः सर्वा
नर्थनिवृत्तये भवतीति विशेषः तथा च शारीरके मलिनत्वभाव न हि कदाचिदभूदहं मलं कदाचिद भवत्वं न
मः उभयं न न भस्य भवदहमित्वतयि नित्यमुक्तचितिसंस्मरणमित्युपदेशवाक्याद्यविचारेण हं ब्रह्मा
स्मीति भावयेत् सन्यासिनी विविदिषोः कर्तृत्वमाह कारकस्य करणेन तत्त्वज्ञानाभिव्यक्तेर्यथा पतितो य
था भवेत् अंजनकस्य परिवर्जनमात्रं यथा सद्य एव पतितो भवेदसौ कारकस्य कर्मणः करणेन यथा पतिः
पतितो भवेत् तथा अंजनकस्य ज्ञानमंजनकस्य ज्ञानहेतोः श्रवणस्य परिवर्जनेन त्यागेन पतितो भवेदित्य
र्थः नन्वज्ञानेशौचेतयानि भित्वा नित्यमेकांतशीलता यतेश्चत्वारि कर्माणि पंचमेनोपपद्यत इति यतेः
कर्मविधानदर्शनात् नातः कर्मत्यागे प्रत्यवाय इति चेत्तत्राह प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते अहं

47

मेभवं विशेषेणाधिमाधिः आधिस्तु मानसी व्यथा इतिवचनात् चित्तशुद्धित्वात्सर्वचिंतादि गच्छतीति
भावः भारते कथोक्तं आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः तत्राभिषेकं कुरु पाण्डुपुत्र
न वारिणा शुध्यति चांतरात्मा अंतरात्मा मनः इत्यर्थः इदानीं ज्ञानं ध्यानं च एकीकृत्य वदति ज्ञा
नहृदे ध्यानजले रागद्वेषमलापहे यः स्नाति मानसे तीर्थे स याति परमं पदं मानसी तीर्थे त्रसा
कारोनः करणवृत्तिरूपे हृदे स्नातो भवन् लाशयेय ध्यानध्यावाच्यविषयज्ञावके ज्ञानरूपे हृदे रागद्वेषलव
णयोर्मलयोर्नाशके श्रीविष्णुचिंतनमहत्वं दर्शयति कलौ पुण्यादिदोषान्यो विषयाकृष्टमानसः
कृत्वापि सकलं पापं गोविंदं संस्मरन् शुचिः पुमान्भवतीत्यर्थः तदुक्तं नारदीयसंहितायां केंद्रत्रिको
णकेजीवे शुक्रे वा यदि वा बुधे दोषाश्चिलक्षा यांति युक्तापापं हि गंगया गुरुर्बली त्रिकोणस्थः सर्व
दोषविनाशकृत् एवं नित्यं निखिलपापं स्मरणाद्धरेरेव नेदश्वभारते यस्य स्मरणमात्रेण जन्मसंसा
रबंधनात् विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्म
रेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः स्नानादिकर्म बाह्यमेव शोधयति हरिस्मरणेन जन्मसंसा
रबंधात् जन्म चाविद्याकार्यं संसारो विद्याबंधनात् बंधनं तस्मान्मुच्यते पुमान् तस्मै विष्णवे
नमः इति किं च अपवित्रः पवित्रो वा पुरुषः स बाह्याभ्यंतरः शुद्धो भवतीति हृदयार्थः कलिकल्मषमत्यु
ग्रं नरकार्तिप्रदं नृणां प्रयाति विलयं सद्यः सकृद्यत्र हि संस्मृते एकवारं विष्णुस्मरणे सति कलियुगो
त्पन्नाः सर्वदोषाः नरकप्रदाः विनाशं प्रयांतीत्यर्थः उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविष्ट

ग॰ म॰
ना॰

रादेविमुमंत्रस्येतिवामूलंमंत्रस्यैषुकालेषु तदुक्तं रामोध्येयः प्रणवत्वाद्यतीनांतु विशेषत इति
तत्रैतात्स्य स्थलेतारकं ब्राह्मणोनित्यमधीते सपाप्मानंतरति स विमुक्तात्माश्रितो भवति इति
याज्ञवल्क्य इतिश्रुतेः प्रायश्चित्तेष्वपि तेषु जपो प्रणवस्य जपादिषु तस्मात्सर्वप्रयत्नेन प्रणवैक
परोभवेत् किंच उपपातकेषु सर्वेषु पातकेषु महत्स्वपि अश्वमेधसहस्राद्धं
प्रणवं वेद यो नहि तत्तत् एतावत्प्रणवस्य जपस्य महात्म्यं यस्मात् तस्मान्नित्यमिदं कुर्याच्चेति
मुमुक्षुमात्मनः तेषामयं स्वाध्यायानानाम्नाद्विजो मुमुक्षुः शोधयेत् जपादित्रितयादन्यद्विशेषस
न्यासिनः शोधयेत् प्रायश्चित्तं तीर्थयात्रादिकेनाशीमर्थः प्रथममुपक्रांते ध्यानेयत्वित्रिष्वपि जपादि
षु मुख्यत्वेन तत्रैव ध्यानविशिष्टजपस्येति वचनात् तदुक्तं रामायणे तृणादमपि यश्चिन्तयति
हृत्पंकजे तथा तालमनर्थानां सत्तमपठति तत्त्वातो दिति किंच सर्वपापप्रसक्तोपि ध्यायन्नि
मिषमच्युतं द्विजस्तपस्वी भवति पंक्तिपावनपावनः तस्मात् ध्यानेन सदृशो नास्ति शोधनं पापक
र्मणां श्वपाकमपि भुंजानो ध्यायी नैव तु लिप्यते अन्यत्रापि कृष्णानुस्मरणादेव पापसंघातपं
जरं शतधा भेदमायाति गिरिर्वज्रहतो यथा इदं तु ध्यानविषयकमिति तदुक्तं ध्यान
ज्ञानयोः सारस्य सत्वात् यथाग्निरुद्धतशिखः कक्षं दहति सानिलः तथा चित्तस्थितो विष्णु
र्योगिनां सर्वकिल्बिषं तथान्यानि तत्र गृहस्थादीनामपि ध्यानेऽधिकारोस्तीति ज्ञातव्यं य॰
था विष्णुस्मृतेः सद्यः सेव्य पातित्य पातकं तथा स्मृत्वा शमयेति हृदयं व्याधिसम्भवे आधि

अमलया निष्कामया भक्त्या हरिः प्रीयते कृपां करोतीत्यर्थः सुरोऽसुरो वाप्यथवा नरो नरः सर्वात्मना यः सु
48 कृतज्ञमीश्वरं भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान् दिवं श्रीरामः कोशलानुत्तरान्
दिवं वैकुंठमनयत् नीतवान् तं श्रीरामं हे देवादयः भजेत सेवयेदित्यर्थः श्रीराममभजते नरे ची
र्णान्यपि प्रायश्चित्तानि न शोधयंतीत्याह प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं न निःपुनंति
राजेंद्र सुराभांडमिवापगाः यथाऽऽपगाः नद्यः सुराभांडमद्यस्य पात्रं न शोधयंतीत्यर्थः हरिकी
र्तनेन सर्वाणि पापानि नाशयतीत्याह मातृहा पितृहा गोघ्नो भ्रातृहा चार्यहाघवान् श्वादः पुल्क
सको वापि शुध्येरन् यस्य कीर्तनात् श्वादः श्वभक्षकः पुल्कसाकः कैवर्तः आचार्यहा गुरुघातकः पू-
तेसर्वे पूतेत्यर्थः इदमेवमुच्यते इति चैवमाह नाम्नोऽस्य यावती शक्तिः पापनिर्हरणे हरेः
तावत्कर्तुं न शक्नोति पातकं पातकी नरः अत एव यद्देशानुगत गोविंद केशव कृष्ण विष्णो हृषी
केशेत्याह राजानकेवलं केवलध्याने न ध्यानमतिरिक्ते नामस्मरणमित्यर्थः तत्कृतमस्तोकं पति
नयावन राम रमापते भगिरिकृपाकरुनाथ जगन्निवदपरे मम नास्ति मुलावदेह भवविमोचक मंत्र
भवार्णवे इति श्रीरामसत्तामसहात्म्ये श्रुतिसर्वलिपुराणोनिहायोक्ते अघ्यत्ताकृमविरचिते एकोनविं
शो प्रकरणं १९ एवं रहस्याहीरांचरणो विसृनामेव श्रेष्ठं प्रायश्चित्तमिति एवं
मुक्तं दुराचारोऽपि नाशितो प्राधान्येन ध्यानमेव प्रायश्चित्तमुच्यते तदुक्तं मतिविस्रतौ प्रायश्चित्तेषु स
वैष्णवत्वे ध्यानं विशिष्यते श्लोक यद्धर्मोऽयोवाप्यमलं मत्रसत्समस्रतः श्रीरामचंद्र श्रीवासुदेव द्वादशात

ए. म.
ना.

नास्त्वा संदृष्टिं [illegible] स्वाप्नो पृष्टो हृष्टमरणानि निजकं इत्यायः कुर्वीत दृष्ट्वा स्वजनमहोसयमं न
पश्येत् [illegible] नित्यमगवानस्य देवसेवास्य एवनिगाम हि धर्मराजः अन्येपि येहरिहरोक थनायरा
यणेत्यादयः पुनरहो परिवर्जनीया यमकिंकरास्ते येऽधर्मराजविनोलंलितप्रवेशानामाचलिसकलमं
षवीजतस्मै श्रीकृष्णायास्त्रभमुतः श्रुतिभिःषणस्यनिमंत्रपेत्वनवे तनपिवेत्समातः येविष्णुनमने
तिनामवक्त्रानयः स्मितिसपवाह जिह्वानवक्तिभगवद्गुणानामधेयं चेतन्ननस्मरतिनचरणारविंदं
कृष्णायतो नमतियच्छिरएकदापि तानानयध्वमसतोकृतविष्णुकृत्यान् अकृतविष्णुकृत्यानकृतानि
श्रवणास्मरणानामसंकीर्तनादीनि विष्णोः कृत्यानि येस्तान् हरे तिपदयंते निद्रेतिजेस्मनवदति तथा
वतनिद्रवाणि यस्य अशुभजनितदुर्मदस्य पुंसः कलुषमतेर्हृदि तस्य नास्त्यनंतः नसहतिपरसंप
देकरोतिकलुषमतिः पुरुषस्तताम सोधः नयचतिनदहातियस्य मनसिसमतसितनस्वजनादेनोथ
मस्य परमहृद्दिवायवैकलत्रेष्विततनयादिषु भ्रमत्वेधवरां प्रातमतिरूपयातियोर्थेतस्मात्तमथ
मचेष्टमेवहितासभक्तं अशुभमतिरसत्प्रवृत्तिसक्तः सततमनार्यविशीलसंगमत्तः अनुदिनकृत
पापबंधयुक्तः पुरुषपशुर्नहिवासुदेवभक्तः इतिविष्णुपुराणे सर्वेपिदेवदैत्याद्योवासुदेवमज
नेनतरंतीत्याह नचप्रह्रादोवदति दैत्यपुत्रान्प्रतिसप्रमत्तये देवोसुरोमनुष्योवायक्षोगंधर्वएववा
भजन्मुकुंदचरणौस्वस्तिमान्स्याद्यथावयं नालंद्विजत्वंदेवत्वमृषित्वंवासुरात्मजाः प्रीणनायमुकुंद
स्यनवृत्तंनबहुज्ञता नदानंनतपोनेज्यानशौचंनव्रतानिच प्रियतेमलयाभक्त्याहरिरन्यद्विडंवनं

49

हितकारिणश्च देवलोल्यनिरताज्ञननाशहेतून् नानानयाथमपराधकृतोंश्च हन्ताः एकादशीव्रतपराङ्मु
खस्वयशीले लोकापवादनिरते परनिंदकेच ग्रामस्यनाशकरमुत्तमनिंदकेचहन्ताःसमानयतविप्रथ
तेषुलुब्धयोविष्णुभक्तिविमुखोन्ननमंतियेचनारायणंतुशरणागतपालकेच विष्णालयेचनहियांतिन
रांश्चसर्वांस्तानानयध्वमतिपापरतान्सदैव तेभ्यःआज्ञादिति काशीखंडे यमोवाच गोविंदमाधवमुकुंद
हरेमुरारेशंभोशिवेशशशिशेखरशूलपाणे दामोदराच्युतजनार्दनवासुदेवत्याज्याभटाययतिसंततमा
मनंति गंगाधरांधकरिपोहरनीलकंठवैकुंठकैटभरिपोकमठाब्जपाणे भूतेशखंडपरशोमृडचंडिके
शत्याज्याभटा विष्णोनृसिंहमधुसूदनचक्रपाणेगौरीपतेगिरिशशंकरचंद्रचूड नारायणासुरनिबर्हण
शार्ङ्गपाणेत्याज्याभटा मृत्युंजयोग्रविषमेक्षणकामशत्रोश्रीकांतपीतवसनांबुदनीलशौरे ईशानकृत्ति
वसनत्रिदशैकनाथत्याज्याभटा० लक्ष्मीपतेमधुरिपोपुरुषोत्तमाद्यश्रीकंठदिग्वसनशांतपिनाकपाणे
आनंदकंदधरणीधरपद्मनाभत्याज्याभटा सर्वेश्वरत्रिपुरसूदनदेवदेवब्रह्मण्यदेवगरुडध्वजशंखपाणे त्र्य
क्षोरगाभरणबालमृगांकमौलेत्याज्याभटा श्रीरामराघवरमेश्वररावणारेभूतेशमन्मथरिपोप्रमथा
धिनाथ चाणूरमर्दनहृषीकपतेमुरारेत्याज्या० शूलिन्गिरीशरजनीशकलावतंसकंसप्रणाशनस
नातनकेशिनाश भर्गत्रिनेत्रभवभूतपतेपुरारेत्याज्याभ० गोपीपतेयदुपतेवसुदेवसूनोकर्पूरगौरवृ
षभध्वजभालनेत्र गोवर्द्धनोद्धरणधर्मधुरीणगोपत्याज्या० स्थाणोत्रिलोचनपिनाकधरस्मरारेकृष्णा
निरुद्धकमलाकरकल्मषारे विश्वेश्वरत्रिपथगार्द्रजटाकलापत्याज्या अष्टोत्तराधिकशतेनसुचारु

रा॰म॰
ना॰

मासाद्व्रतिषमहात्मानं यमः प्राह कमलनयन वासुदेव विष्णो धरणीधराच्युत शंखचक्रपाणे भवश
रणमितीरयंति ये वै भुवनं भद्रमहत्वतैरणांतानपापान् इंस्यंति न चारयेतीरघ्ये: एतद्बृहन्नारदीय
पुराणे यमो यमदूतान्प्रत्याह श्रुणुध्वं मद्वचो दूता हितं वक्ष्याम्यनुत्तमं धर्मेषु नियतान्भर्त्या मास
श्रुध्वं मयांतिके धर्मांनाह ये विष्णुभक्ति निरताः प्रयताः कृतज्ञा परकारिणी व्रतपरा विजितेंद्रिया
श्च नारायणाच्युत हरे शरणं भवेति शंसंति तान्वदंति समंतेन रमानसजध्वं नारायणाच्युत जनार्द
न कृष्ण विष्णो पद्मेश पद्मजनिनः शिवशंकरेति नित्यं वदंत्यखिललोकहिताः प्रशांताः दूराद्भ
लातनतान्व वैमव शिष्याः नारायणार्पित रहाहरिभक्तियुक्तान्याचारमार्गनिरतान्गुरुसेव
काश्च सत्पात्रदाननिरतान्करुणामयांश्च हरेसजध्वमतिशंहरिनामसक्तान् पाखंडसंगरहिता
न्द्विजभक्तिसक्तान्सत्संगलोलुपरतान्हरिनाममक्तान् शौमोहरौ च समबुद्धियुतांस्तथैव दूराद्भ
सुपकारपरांनराश्च ये वै हितात् हरिकथामृतसेवकेश्च नारायणस्मृति परायणमानसाश्च विप्रेंद्र
पादजलसेवनसंप्रहृष्टान् तान्पापिनी पचमहाः सततं त्यजध्वं शंखचक्रांकितान्सम्यान् रामकृसे
कजलसकान् धर्माश्चर्यान्नरांश्च वत्यजध्वं हरे लोभराः एतदेवोक्तं काशीखंडे द्विमुखीगोप्रदानाद्यः
कपिलादानतत्पराः निस्पृहासेममपाये च द्विजपादोदपाश्च ये स्नताः सारस्वते तीर्थे द्विजशुश्रूषका
श्च ये प्रतिस्पृहसमर्थापि ये प्रतिग्रहवर्जिताः न एते मक्षिया विप्रास्पंक तीर्थप्रतिग्रहाः एते सर्वो
सायाभुत्वर्यः इदानीतेयानेयाह्न्याह यमान्दूतान परिनिष्टुरपालिनस्थूलोकहिंषा द्विषाद्विजनाता

50 तैःपापैःप्रमुच्यते तस्मात्पापेजाग्यंस्तोत्रंसर्वात्प्रनाशनं प्रायश्चित्तंमयोक्तानांस्तोत्रंकृतवतेवरं प्रायश्चित्तैः
स्तोत्रजपैर्नतैनश्यतिपातकं ततःकार्याणिसिद्धितानिवैभवविमुक्तये पूर्वजन्मार्जितंपापमैहिकंच
नरेश्वरः स्तवस्यश्रवणादस्यसद्यएवविलीयते पापद्रुमकुठारोयंपापेवनदवानलः पापराशि
मस्तोमभानुरेषस्तवोनघ महाप्रकाशितस्तुभ्यंस्तथालोकानुकंपया स्तवोयंयोमयाप्रोक्तोरह
स्यंपितरादरात् इतिहासमिमंपुण्यंयःशृणोतिनरोधियाः तस्यापिपुण्यमहात्म्यंवक्तुंशक्तो
नयंहरि इतिश्रीवैशाखमहात्म्येनामप्रशंसाश्लोकः अस्यनतनाम्नाकथमस्यापापस्तयोभवेद
व्रतस्यैवायोवैः स्यातिश्रीराधिकाहृत्तेन्द्रवर्हिस्थामेहत्वापदहेचनाम इतिश्रीरामनाममाहात्म्ये
कृतिस्वरूपिणयाणिनिरासोनैकादशप्रकरणं ११ इदानींवर्णाश्रमोक्तंकर्म
चेद्धास्वदेवार्पणमनुष्ठानंसएवमोदहेतभक्तियोगोनाम्यत्माह भागवते वर्णाश्रमवतांध
र्मएषआचारलक्षणः सएवमद्भक्तियुक्तोनिःश्रेयसकरःपरःइतिभगवद्वचनात् इंद्रियसाफल्ये
भक्तस्याह श्रीवसुतंसोभवलिंगमानमेन्द्रदेवतापूजनिनदृष्टिचयः श्रेयानिविसर्गेरपतजनानां
पारोस्कंचानिभजंतितिनिनं उभयलिंगमाह तदुक्तं विशेषतद्विविधंचपंचलंचाचलमेवच व
लंसरूपमितानरूपमचलंप्रतिमादिकमितिवचनात् यद्वास्थूलसूक्ष्मरूपेणत्वेयतदेवहीरः तदे
वचवः यद्विसुचयंपश्यति नान्येवांगानियाविनस्वरूपेहकग्राहकानीत्यर्थः तदुक्तं तत्तुल्यता
निकर्माणिसदाप्रज्ञमनोवचः स्वांगेतद्विविध्याःमाससेव्यतेहरिरीश्वरः वासुदेवंयेभजंतिते

रा॰ म॰ बद्धो मुक्तो यायाद ज्ञानसंभवात् सत्यान्वत्तज्जानीवंद्रसाह्विकेयता प्रवर्त्तते स्मृतो चित्ते प्रायश्चित्ति
ना॰ रे स्थितिः हिरण्ये देवविस्तवे विनिर्मे विश्वे विश्वाधेनसः नमामि विष्णुं चित्तस्थमहंकारगतं हरिं चित्तस्थ
मीशमव्यक्तमनंतमपराजितं विष्णुमीड्यमशेषाणामनादिनिधनं विभुं विष्णुश्चित्तगतो यन्मे वि
ष्णुर्बुद्धिगतः स्वयं यश्चाहंकारगो विष्णुर्यो विष्णुर्मयि संस्थितः करोति कर्तृभूतो सौ स्थावरस्य चरस्य
च तत्पापं नाशमायातु तस्मिन्नेव हि कीर्त्तिते ध्यातो हरति तत्पापं स्वप्ने दृष्टस्तु भावनात् तन्नमा
मि महाविष्णुं प्रणतार्त्तिहरं हरिं जगत्यस्मिन्निरालंबमजमानजनमच्युत हस्तावलंबनं विष्णुं कीर्त्तया
मि परावरे सर्वेश्वरेश्वर विभो परमात्मन्नधोक्षज हृषीकेश हृषीकेश हृषीकेश नमोस्तु ते न
सिंहानंत गोविंद भूतभावन केशव दुरुक्तं दुष्कृतं ध्यातं शमय पापं नमोस्तु ते यन्मया चिंतितं दुष्टं स्व
चित्तवशवर्त्तिना अकार्यं महदत्युग्रं तच्छमं नय केशव ब्रह्मण्यदेव गोविंद परमार्थपरायण
जगन्नाथ जगद्धातः पापं शमय मेच्युत यन्मयापराह्ने सायाह्ने मध्याह्ने च तथा निशि कायेन मनसा वा
वाचा कृतं पापमजानता हृषीकेश हृषीकेश पुंडरीकाक्ष माधव पापं प्रशमयातु त्वं वाक्कृतं मम माध
व यद्भुंजन् यत्स्वपंस्तिष्ठन् यत्पन् जाग्रन् यदा तथा अकार्यं पापमर्थार्थं कायेन मनसा गिरा महदल्पम
पि प्राप्यादयो निरंतरकावहे तत्पापं प्रशमं सर्वं वासुदेवेति कीर्त्तनात् परेयामपरेयामपवित्रपर
मे च यत् इति संकीर्त्तिते विष्णौ यत्पापं तत्प्रणश्यति यत्प्राप्य न निवर्त्तंते गंधस्पर्शादिवर्जितं सूर
यस्तत्पदं विष्णोस्तत्सर्वं शमयत्वघं पापप्रनाशनं स्तोत्रं यः पठेच्छृणुयान्नरः शारीरैर्मानसैर्वाग्जैः कृ

51

किलभावदृष्टेन स्वर्गमाप्नोति किंलेन वा नव गंगादितीर्थेषु वसंति मनस्या देवालये पदि गणाःस्व तिम्ये वि

नाशमायाति कृतोपवासाभावो ज्ञितास्तेन फलं लभते श्रृणु राजन्महाभाग सद्यः प्रत्ययकारणं अका

लमपि प्रायः प्रवक्ष्यामि तवाग्रतः स्वल्पमप्यकृतं कर्म शतजन्मार्जितं नाशने यथाहरेर्यानवलेन पापं

विनाशमायाति महत्स्वयं प्रातः स्नात्वा माघमासि दाने स्नाने व पापं विलयं प्रयाति यथाहरेर्नाम

वस्तुनाद्दान्तयं यांति सर्वांसि च पातकानि एवं तनैर वा मेध्यागते विभाति स्नानेन तीर्थेन हरिस्तवेन तेजसा

वैनतेयस्य पन्नगाः स्वपातकाः विरुद्धं विनिहितो विंदनाम संकीर्तनादिह किं चित्रमत्र मधुसूदन

देवनस्य मासस्य पुण्यवने विहमाघवस्य दानैरवस्य विहितैरचराशिनाशः स्याद्स्य नाम पदका

ह्यपि सर्वलोके न देवपुण्यं परं अथ विचेसर्वत्र लोके सकृत्तेक सार्थं यत्र चाते केशवनाम लोके मासे

मृते माघवदेवभक्त्या श्रेवरीशउवाच धन्योस्म्यनुगृहीतोस्मि प्रभुमन्मत्कृतैत्वया विभो विकर्मोत्पत्तिनि।

यस्य वचनादेव हीयते संतः प्रतिष्ठादीनानां दैवाद्भुतपापिनां आर्तानामार्तिहंतारो दर्शनादेवस्य

यवः वहूनि दृष्टिनाप्तोते साधूनां पुण्यदर्शनात् आर्तानां मार्गमाणानां पश्चात्तापप्रयोगेषु या मोहा

स्वायम्पापानां तत्रो हन्तो हरिप्रियः सतां सभाषणादेवपुण्यतीर्थानि सेवनात् नारायणेति पठना

तन्नाम श्रवणादपि मुच्यते पातकैः सर्वैर्जनो भक्तिः परायणः पापप्रनाशनस्तोत्रं श्रोतुमिच्छामि

तद्विभो निविहितपातकं यस्य श्रवणादेव नश्यति नारद उवाच नमाकर्णय भूपाल स्तवेंद्र मितना

मृतं सदा कार्ये नरो भवत्याम्नु अतेपापराशिभि श्रवणमात्रेणादिव्यादेवीति सार्वभौ अन्येपि

ना॰ म
ना॰

न्तिमुखः नास्ति किंचिन्मत्कृतं कर्मकिंचित्तं पापं तन्नैवापि नवमगतकृतः क्वापि स्वफलं च प्रयच्छति कृतस्यैव ह
नाशोस्ति गुणगानाद्धरिनामस्य च तथापि वस्तुभिः पुण्यैर्हरिनयापाति सेव्यथ यद्युकं भवतापाजन्मायासाधि
कातो भवेत् तत्फलेन च न चापि स्मृताय सूत्र मयोदितं स्वल्पायास महायासौ पयस्वत योः महाव्रतस्त
स्मिन्स्तुः सततं कर्षकास्तयः स्निग्धापात्रादिमृत्पात्रौ प्रयासवद्गलन्ततः पंचगव्यामग्नसंतेवव्रतेगलेत तो
भवेत् तथा स्थापादिप्रभैवप्रायश्चित्तप्रसंगेन श्रमेतरात् दुःखमसंगमहत्त्वेन क्षितिनैव नियामकं फलं च सर्वोदितं
प्रास्यान्न देव स्मात्महोदयं तथाल्पनाशो महन्नाश महत्त्वाशलयाल्पत किंपुनर्विस्फुलिंगेन तनुगणराशिन
दह्यते यथा मिलो भिस्मपालदासो यतिनिमित्तिस्तत: धर्मपत्नीपरित्यागी निर्मयापापयिष्ठिरस्थित: स्त्रियमाणस्य
नाह्नांचक्रेनारायणेतिचतुराननमयहृत्तमानांदेलेमेस्वर्गलभं यत्निष्ठयापिदहतिस्वछोड्गनवहोयथा न
पावहति गोविंदनामश्चाजानाद्यपोषितं हत्यायुतेपापसहस्रमयुतं सर्वं गवाकोटिनिष्कवर्णं च लयामधेछामि
हरिप्रियेत्यासोविहनाम्नानिदितानिलयः विष्णुभक्तिमताविरयकिंचित्क्रियतेल्पके सततसाधवविगुणात
द्दृतयपक लेभवेत संदेहोऽत्र न कर्तव्यो मामायवेमासिमायवे समाराध्य जनो भक्त्यानिन्द्रेद्वाछितमायुयात्
सपन्नेंद्रविमिंदाराहाराहमेष्व यगजाः सवानि स्वर्गमोहौ चन हरेर्हरिभक्तितः एवं शास्त्रोक्तविधिनासत्ये
नापि न संशयः पापस्य महतोपि स्यात्त्वयः समकृत्नैव च फलाधिकं भवेद्दिधाक्राधिकाम्यापकर्मणः सत्या
धर्मस्य गानयोजुगं यथाविधिविधेरपि यथैकनाशेन जलेन कालेदेशेनरः स्नानपरः कथंचित् आजन्मतोभावद
तोपि दानानम्युद्यतोनेव मनेमनेनत प्रज्वाल्य वह्निं घृततैलसिक्तं प्रदहिणावर्तिशिखे स्वकाले प्रविश्य दह्यः

८५

52 अन्येष्वागमिना प्रोक्ता अपराधास्तथा शृणु। यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे। देवोत्सवाद्यसेवा च अप्रणाम
स्तदग्रतः। उच्छिष्टे सति चाशौचे भगवद्वन्दनादिकं। एकहस्तप्रणामश्च अग्रतः पुरस्तात्प्रदक्षिणं। पादप्रसार
णं चाग्रे तथा पर्यंकबन्धनं। शयनं भक्षणं चैव मिथ्याभाषणमेव च। उच्चैर्भाषितजल्पो च रोदनानि विग्रहा
ग्रहौ। निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं। कंबलावरणं चैव परनिंदा परस्तुतिः। अश्लीलभा
षणं चैव अधोवायुविमोक्षणं। शक्तौ गौणोपचारश्च अनिवेदितभक्षणं। तत्तत्कालोद्भवानां च फला
दीनामनर्पणं। विनियुक्तावशिष्टस्य प्रदानं व्यंजनादिके। पृष्ठीकृत्यासनं चैव परेषामभिवादनं। गुरौ
मौनं निजस्तोत्रं देवतानिंदनं तथा। एवमपराधा द्वात्रिंशत्प्रोक्ता विष्णोः परिकीर्तिताः। विष्णुपूजापराधेन
किमन्यच्छ्रोतुमिच्छसि। सूक्तं तन्नोक्तं श्रोतेनात्रिकसेव मिश्रकर्मसे होमकाद्दरे। पूजनेन कार्यमायवन
पृष्ठे ययतिद्दिने सप्तरात्रे विध्वंसके तत्रोक्ते हरिसेवकैः सह कथां तन्नामसंकीर्तनेन वा येन तन्नेन मच्युतप्रि
येन मासेनैव सर्वं भवेत्। इति श्रीभगवन्नाममहात्म्ये स्कन्दपुराणे तिहासे मार्कण्डेयश्रुतनाश्रमविरचि
ते सप्तदशप्रकरणं॥ १७॥ देवी उवाच। कथमेतद्विमुच्यामः स्वल्पाभ्यासेन यन्मुने। प्रभूः पापसमाचा
रे लभेद्ब्राह्मणत्वमुत्तमं। नारद उवाच। सम्यक्पृष्टं त्वया राजन् ब्राह्मण्यमतिदुर्लभं। तथापि गतयः सूक्ष्मा दुर्ज्ञे
या धर्मतत्त्वतः। विचित्राणि च कर्माणि विचित्राः कर्मशक्तयः। विचित्राणि च भूतानि विचित्रास्तु तभा
वनाः। कदाचित्सुकृतं कर्म कूटस्थमिव तिष्ठते। केनचित्कर्मणा स्वयः शुभेन परिवर्धते। फलं ददाति
हि महत्कोटिसहस्राणि युगानि यस्मिन्नेते बीजेन च यथा तथा। तत्तस्य फलदानस्य सम्प्रयतेका

व॰प॰ दक्षोन्नमिच्छसि ॥ अंबरीष उवाच ॥ द्वात्रिंशदपराधास्ते ह्यहो विष्णुनोदिताः ॥ तन्मे त्वं वा न प्रोक्तमिच्छामि कृपया वद मे
ना॰ मुने ॥ एवमंबरीषेणोक्तः श्रीनारदस्तं प्रति श्रीवराहोक्तिमाह ॥ वराह उवाच ॥ तिर्यक्पुंड्रपरो भूत्वा यः करोति मम
र्चने याचितः पंचगव्याद्यैः यः करोति महार्चनं ॥ अप्रक्षालितपादो यः प्रविशेन्मम मंदिरे ॥ मम दृष्टेऽभिषवे
ताम्बूलं चर्वयेत्तु यः ॥ कौसुंभशाकं मत्स्यं यो भक्षयेन्मम सेवकः ॥ कटवकपलाशोत्थैः पुष्पैः कुर्यान्ममार्चनं ॥ म
मार्चां मासवेलायां यः करोति विमूढधीः ॥ अवैष्णवस्य पक्वान्नं यो मह्यं विनिवेदयेत् ॥ अवैष्णवेषु पश्यन्मम
पूजां विदधाति यः ॥ छिन्नोन्नतं च पक्वान्नं यो मह्यं विनिवेदयेत् ॥ नीलीरंजितवस्त्रं यन्मामे मह्यं निवेदयेत् ॥
नवमप्रक्षालितं वस्त्रं जीर्णं यन्मे निवेदयेत् ॥ अशौचीचर्मलिप्तांगो मम पूजां विदधाति यः ॥ वातमूत्रनिरोधेन मम
नोऽकृत्वैनरः ॥ कृत्वाचामनमाचमनं धाम्नाकूर्मकंबलः ॥ पीठासनोपविष्टस्तु पूजयेद्यो निरासनः ॥ स्वस्पृश्य
पदहस्ते दीपं च कुरुते र्चने ॥ मम पूजको न कुरुते तेन पूजा च दामनी ॥ मम पूजकः शिवं द्वेष्टि प्रियो वा मां हि प्र
ते नरः ॥ भक्ता हृष्योर्नेक्कहस्तेर्दत्तं हृष्टविवामरं ॥ परस्य परिधानं यस्तरिधाया र्चयेत मां ॥ अस्नजपितावि
न्यंशे मसंभाव्यकपालितं कृतोयत्कमंकुरुते त्रिकालार्चनविघ्नकृत् ॥ अथ कारेस्तज्ञेन्मायः संभाष्य च
रजस्वला ॥ वामहस्ते च मां पूजा स्नापयेद्यस्तु मूढधीः ॥ गजहस्तेन सन्निधौ मम ग्रीम मम पूजां विदधाति यः ॥
अच्युतगडगडत्वं ममैमां स्वल्पं रविदहेत्त्वयः ॥ केचलेनयुतेनैव वधपयेन्मां विमूढधीः ॥ गजहस्ते सन्निधौ
ममैमां मम तां विदधाति यः ॥ वस्त्रेणापवत्रवातेन यूपं मह्यं निवेदयेत् ॥ महापराधानज्ञानी हि द्वात्रिंशन्नत्व
मासितान् ॥ सापराधः पूजयेत्त्रिस्त्ररयं यातसंशयं ॥ इति वाराहपुराणोक्ता अपराधाः प्रजाप्रयुक्ताः ॥ नारद उवाच

53 गदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ध्यायन्नभ्यर्चयेन्नृपाणिद्विसामसूक्तानि च प्राण्याज्यभागावा
घारौ दत्वा चाज्येन तं हविः जुहुयान्मूलमंत्रेण षोडशर्चा विधानतः धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृ
तं बुधः अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् मूलमंत्रं जपेद्ब्रह्मन्स्मरन्नारायणात्मकं दत्वाचमनकं मु
खे च विष्वक्सेनाय कल्पयेत् मुखवासं सकर्पूरं मंत्रेणाह्लादं च कल्पयेत् उपगायन्गृणन्नित्यं कर्माण्यभि
नयन्हरेः सकृत्याम्रवयेच्च एवं नमुहूर्तं दक्षिणो भवेत् सर्वैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि सन्नाम
सीद भवन्निति वदेत्तं दंडवत् शिरसा पादयोः कृत्वा बाहुभ्यां च भुजं प्रसार्य प्रपन्नं पाहि मामीश भीतं
मृत्युमहार्णवात् इति शेषं हरेर्दत्त्वा शिरसा मा प्रमाह्वरे उद्वासयेच्चेद्द्वास्यं ज्योतिर्ज्योतिषि तत्पुनः अ
र्चादिषु यदा यत्र श्रद्धा तां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्मानमवस्थितं एवं क्रियायोगपथैः
पुमान्वैदिकतांत्रिकैः अर्चन्नुभयतः सिद्धिं हरेर्विंदत्यभीप्सितां अर्चायाः स्थापनार्थं च मंदिरं कारयेद्दृढं
पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवादिकं पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुराग्रा
मान्दत्वा मत्सार्ष्टितामियात् प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं पूजयाथ ब्रह्मलोकं च त्रिभिस्तत्साम्यतामि
यात् तमेव नैरपेक्ष्येण भक्तियोगेन विंदति भक्तियोगं स लभते एवं यः पूजयेद्धरिं यत्नः स्वप्रणिपातनपत
यत्नेन हृष्टमनो हेमुसे नैवेद्येन यसार्जिन्येनमृत विद्याभ्यां हरिं हृष्यते सा बुद्धिर्विमले ऽशाखे यथवला या माथ
वज्रादिनौ शाजिद्यमनभाविणीभलिद्विने यतौ मिनारायणो मूलमंत्रेण कर्तव्यं शूद्रैः स्त्रीरपि पूजनं अ
द्ययान्तमनुद्दिश्य मामैतान्यैर्वैष्णवैः इति ते सर्वमाख्यातं पावनं माधवार्चनं सर्वपापक्षयकरं किमन्य

ना. म.
मा.

द् तद्वद्विदेव सदनेष्वथ शालग्रामेषु च शोभनायां शिलायां वा प्रतिमायां यथेष्टं समाराधयेत् पाद्यार्घ्याचमनीया
र्थं नीतद्रव्यपात्रमिति यावत् इत्यादीर्घेर्विधिनैर्मन्त्रैर्गोप्याभ्यां वाभिमन्त्रयेत् पीठेवाप्यग्निसंसिद्धे तत्र स्थाप
येत्परम श्रीजीवकल्पाख्ये ख्यातं नेत्रं सिद्ध भाविनं तथान्नमनयापीठे आद्रेवंसंप्रज्वलनन्मयः श्रीचा
ग्रावादिपुष्पाद्यन्वत्ताद्येतेनप्रपूजयेत् पाद्याद्याना चमनादीन् नानुपचारान्प्रकल्पयेत् धर्मादिभिश्च न
बभिः कल्पयित्वा सनेहहरेः पद्ममष्टदललं तत्कर्णिका केसरोज्ज्वले द्रुमाभ्यां वेदितेत्राभ्यां हृदेरूपमयसिद्ध
ये सुदर्शनं पांचजन्यं गदासीश्च पद्महले मुसले कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् नेदमनेदगरु
डेषु वंदेदुमेवच महाबलेबले चैव गरुडे कुमुदे तथा दुर्गां विनायके चैव विष्वक्सेनान् गरेहसमान् सोप
स्याने चाभिमत्यमनोयेष्वथ नानादिभिः चंदनागुरु कर्पूर कुंकुमागरु वासितैः सलिलेः स्नापयेन्मंत्रैर्नि
त्यहाविभवे सति सर्वाभरणे नवाकेन महापुरुष विद्यया पौरुषेणापि सूक्तेन सामनीराजनादिभिः व
स्त्रोपवीताभरणादृत्य मांग्यानुलेपनैः अलंकुर्वीत सप्रेम विस्मकोयथोचिते पाद्यमाचमनीयं च गंधं सुम
नसोदनान् धूपदीपोपहाराणि ददयाद्धेषु रथार्चकः गुडपायस सर्पीषि शष्कुल्यापूपमोदकान् संयाव
दधिसूपांश्च नैवेद्यं परिकल्पयेत् अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचने अन्नाद्यगीतन्त्यानि पर्व
णि स्युरुतान्वहे विधिना विहिते कुंडे मेखलागर्तवेदिभिः अग्निमाधायपरितः समूहेत्पाणिनोदि
कैः परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत ततः तप्तजांबूनद
दप्रख्यं शंखचक्रगदांबुजैः लसच्चतुर्भुजे शांतं पद्मकिंजल्कवाससं स्फुरत्किरीटकटककटिसूत्रवरां

54 वार्चनप्रकारं पाताललिवंडे वैशाखमहात्म्ये अंबरीषं प्रति श्रीनारद उवाच शृणु राजन्प्रवक्ष्यामि समासात्मा
यथार्चनं वैदिकं तांत्रिकं वापि मिश्रकं पापनाशनं अनंतस्यानंतपारस्य पूजाकांडस्य नो हरेः संक्षिप्त
वर्णयिष्यामि यथावदनुपूर्वशः वैदिकं तांत्रिकं मिश्रं श्रीविष्णोः पूजनं त्रिधा त्रयाणामीप्सितेनैव विधि
ना हरिपूजनं वैदिको मिश्रिको वापि मिश्रादीनां विधीयते तांत्रिको विष्णुभक्तस्य शूद्रस्यापि विधीयते
यथा स्वनिगमे प्रोक्तं द्विजत्वं प्राप्य पूरुषः यथा पूजेत मां भक्त्या श्रद्धया तन्निबोध मे अर्चायां स्थंडिले ग्नौ वा
सूर्ये वाप्सु हृदि वा द्विजे द्रव्येण भक्तियुक्तो वा स्वगुरौ वा ममायया पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये
उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना संध्योपास्त्यादिकर्माणि वेदनचोदितानि वै पूजां तैः कल्पयेत्सम्य
क्संकल्पः कर्मपावनीं शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृ
ता चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायां माधवार्चने पुराणान वेच सा
लिग्रामे स्थावरे वा वाहनं न विसर्जनं सालिग्रामशिलादौ च नित्यं सन्निहितो हरिः अस्थिरायां विकल्पः स्या
त्स्थंडिले नु भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं द्रव्यैः प्रसिद्धैर्देवस्य प्रतिमादिष्वमायिनः भ
क्तस्य च यथालब्धैर्हृदि भावेन चैव हि स्नानालंकरणं प्रेष्ठमर्चायामपि मत्प्रिये स्थंडिले तत्त्वविन्यासो वह्नौ
वाज्यप्लुतं हविः सूर्ये चार्घ्यं प्रेष्ठं सलिले सलिलादिभिः श्रद्धयोपहृतं प्रेष्ठं हरेर्भक्तेन वार्यपि गंधो
धूपः सुमनसो दीपोन्नाद्यं च किं पुनः शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः आसीनः प्रागुदग्वार्चेद
र्चायामथ संमुखः कृतन्यासः कृतन्यासां स्वेष्टां पाणिना प्रमृज्येत कलशं प्रोक्षणीयं च यथावदुपसाधयेत्

रा॰ म॰ ना॰

राघवात्स्वतिकथापरस्तोमनुजः चतुर्मुखात्मजार्दिकोदिवक्त्रोभवेन्नरः क्वापि विशुद्धचेताः सर्वैर्गुणाना
मपुत्रैकदेशं वदेत्सा देवदारुसत्विक्षोः तथा च स्मृतिः विशोर्न्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे
रजांसीति तस्मात् व्यासाद्यामनवः सर्वे स्तुवंतो मधुसूदनं मति क्षयान्निवर्तन्ते सोनगोविंदगुणास्तया
त श्रीमद्भागवते नांतं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे मे गायन्गुणा
न्दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारं एवं सति नन्वेतत्कंठशाल्कमथ
वाप्युपनिष्क्रिका रोगो वा सोनमानिह्वायानवक्त्रिहै वेरुणात् इति वाराहपुराणवचनेभ्यः श्रीभाग
वतेत्वाव गांदुन्यशेहामसतीचभार्याद्देहपराधीनमसत्मनाच विंतेत्वतीथीकृतमंगवाचेहीनोम
यारतातिदुःखदुःखी यस्मात्स्विलामीबहुभिः समालेवाचो विमिश्राउणाकर्मजन्मभिः प्राणातिश्र
मेतिपुनेतिवैअगघात्सदिवक्ताः श्रावयोभक्तामताः यस्मिन्नुः प्राणवियोगकालेत्वणासमावेश्यपसतो
विशुद्धं निहत्यकर्मार्गलमाशुयातिपरांगतिं ब्रह्ममयोर्कवर्णाः इदं हि योगेश्वरयोगनैपुणं हिरण्य
गर्भो भगवाञ्जगाद तत् यदंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झित दुष्कलेवरः स्थितिः सेवाग
तियां त्रासहतिश्चिनाह्यतिर्वचः भव्यान्सवाल्मिकेरामेमदीयेदेवतार्चने सुकृतश्लोकः नेदनेकस्य
मेपाल्लसेत्वर्वेयनराघव पापनाशनभक्तरत्नादेवमोचनपाहिमां इति श्रीरामनाममहात्म्ये श्रुति
स्मृतिपुराणेतिहासोक्तेश्च कृताश्रमविरचिते षोडशप्रकरणे १६ चतुर्दशप्रकरणे नरकेयेतिस
ग्रासः पूर्वं नायेकुलद्वये नदेवयांतितेसर्गेयदा चेतिसतोहमि त्यतिनाममहात्म्यप्रसंगेनोक्तेतमे

55 नम सर्वधर्मवहिर्भूतात्मापियोतिपदंमम ब्रह्महास्वर्णहारीच सुरापानीचयोनरः नारायणेतिसंकीर्त्य
मुच्यतेनात्रसंशयः अनेनेममुच्यतेनिमेवाराहेतिचकीर्त्तनात् सर्वदुःखविनिर्मुक्तोमुक्तिमाप्नोतिदु
र्लभं मातृहापितृहावापिसुरापोगुरुतल्पगः मुच्यतेनात्रसंदेहः कृष्णकृष्णेतिकीर्त्तनात् ब्रह्माण्डशतदा
नस्यफलेसमुदाहृते तत्फलंलभतेराजन्नकृतेगोविंदकीर्त्तनात् ब्रह्माण्डशतदानस्ययत्फलंसमुदाहृ
ते तत्फलंलभतेराजन्नकृतेगोविंदकीर्त्तने आयासंस्मरणेकोस्यस्मृतोयच्छतिशोभनं पापक्षयश्च
भवतिस्मरतांतमहर्निशं कलिप्रभावादुष्टोक्तिः पाखंडानांतथोक्तयः नाक्रमेरन्मनस्तस्ययस्यचे
तसिकेशवः कलिःकृतयुगंतस्यकलिस्तस्यकृतेयुगे हृदयेयस्यगोविंदोयस्यचेतसिनाच्युतः गोविंदे
तियेनेविनेकृतंतत्कृतम्ःसदैवसः यस्याग्रतलग्राह्येगच्छतस्तिष्ठतोपिवा नास्तिविष्णोःपरोदेवोनतपो
नशानात्परं तस्मात्प्रयानमत्रोक्तंवासुदेवस्यचिंतने विपदोनैवविपदःसंपदोनैवसंपदः विपद्विस्मर
णंविष्णोःसंपत्तस्यैवसंस्मृतिः सकृदुच्चारयेद्यस्तुजनार्दनाख्येतिहेलया ब्रह्महत्यादिपापेभ्योमुच्यते
नात्रसंशयः श्रीरामेतिवदन्विप्रोयातिब्रह्मसनातनं सर्वाचारविहीनोपितापक्लेशादिसंयुतः भक्त्या
णः स्मरणोविष्णोःस्मृतिःसेवासवेषमति स्वभोज्यस्यार्पणंदानेदानेपदसिद्धादिदुर्लभं प्राप्नोतीतिश्रु
तिः स्वप्नेतिनामस्मृतिरादिपुंसःक्षयंकरोतिक्षयपापराशेः प्रत्यक्षतः किंपुनरत्रपुंसोसंकीर्त्तितेना
म्निजनार्दनस्य आसीनोवाशयानोवातिष्ठन्वायत्रकुत्रवा नमोनारायणायेतिमंत्रैकशरणोभवेत् वि
नाशंतुःकृतस्यसहस्रसमावृतोपिक्षयःपरंतपरिमुक्तमभीप्समानः सप्नांतरेपिसहितोनिभयेनपश्यत्वा

री॰म॰
ना

नामधारिणे नमस्तेनामभागण्याय नमस्तेनामस्तेत्रिणे नमोस्तुनामधन्याय नमस्तेनामधोनतये न
मोस्तुनामविश्वाय नमस्तेनामहेतवे नमस्तेनामभक्ताय नमस्तेनामधारिणे नमोस्तुनामयोग्याय
नमस्तेनामवामसे नमस्तेनामविद्याय नमस्तेपीतवाससे नमोस्तुनामभोग्याय नमोनामप्रभावि
ने नमोस्तुनामसेव्याय नमोनामविभाविने श्रीविष्णोर्नाममाहात्म्यं यः पठेद्भक्तियान्वितः स याति
परमंस्थानं यत्र तिष्ठति चाच्युतः वाराहपुराणे इहजन्मकृतं पापमन्यजन्मकृतं पापमन्यजन्मकृतं च
यत् तत्सर्वं नश्यते शीघ्रं कीर्त्तनात्केशवस्य तु: नमः कृष्णाच्युतानन्तवासुदेवेत्युदीरितैः येर्भावभा
वितैर्विप्र न ते यमपुरं ययुः गरुडनाहरमथ्यानं तस्मात्छित्वचनमो पाद्मे पुण्डरीकाक्षनामसंकीर्त्त
नामृते [illegible] सातिस्थिरलक्ष्मीरारोग्ययोगाः सुचचेरूमाः लग्नं तदेव विद्यानैयत्र संस्मर्यते हरिः किंच
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरति
यो हरिचरणस्मरणपरस्य पुंसः मुहूर्त्ताद्यपेक्षानास्तीत्यर्थः अन्यच्च नरहरिचरणस्मरणात्कोटि
निहूर्तसकलकलुषाणां का षष्ठी का नवमी का भद्रा कुतो व्यतीपातश्च इति कृष्णकृष्णेति रामेति की
र्त्तयन्हरिं नरः राजसूयसहस्राणां फलमाप्नोति मानवः अत एव रामकृष्णस्य नामानि सदा
सर्वत्र कीर्त्तयेत नाशौचं कीर्त्तने तस्य स पवित्रं करो यतः श्रीमहादेवोवाच ममनामानि लो
केस्मिन्श्रद्धया यस्तु कीर्त्तयेत तस्यापराधकोटिस्तु क्षमाम्येव न संशयः ननाहंशेमहाभागपा
पंलोके वुविस्फुते याहं शोपरशीनाथ मम नाम्ना नदश्रोते ये कीर्त्तयंति नामानि विष्णोरमितते

56 तिमानवाः तेभूताः सर्वपापेभ्यः कर्मणानेनहेतुना गीताचममनामानिविचरेन्ममसन्निधौ इ
तिब्रवीमितेसत्यंक्रीतोहंनवचार्जुन गीताचममनामानियः ऊर्ध्वीकरतालिको इदंब्रवीमितेस
त्यंक्रीतोहंनवचार्जुन गीताचममनामानिन्नसेतिममसन्निधौ इदंब्रवीमितेसत्यंक्रीतोहंनवचा
र्जुन गीताचममनामानिन्नसेतिममसन्निधौ इदंब्रवीमितेसत्यंक्रीतोहंनवचार्जुन गीताच
ममनामानियेपठंतिनराभुवि तेषामहंपरिक्रीतोनान्यक्रीतोजनार्दनः श्रुताचममनामा
नियेपठंतिनराभुवि तेषामहंपरिक्रीतोनान्यक्रीतोजनार्दनः अष्टक्रयानरहतांतिममना
मानिचार्जुन अष्टदृष्णास्तेजनाः पार्थदृष्टमात्रेणवर्जयेत् भक्तोयेनरहतांतिममनामानिचा
र्जुन अष्टदृष्णास्तेजनाः पार्थदृष्टमात्रेणवर्जं स्वप्नेपिममनामानियेगृणंतिमानवाः अष्टदृष्णा
स्तेजनाः पार्थदृष्टमात्रेणवर्जयेत् निंदंतिममनामानिगतकर्माणिचार्जुन अष्टदृष्णास्तेजनाः
पार्थदृष्टमात्रेणवर्जयेत् अर्जुनउवाच भवत्येवमभवत्येवमभवत्येवमहामतेः सर्वपापपरित्याग
स्तारं तिनामवंयवाः नमोस्तुनामरूपायनामनामप्रकाशिने नमोस्तुनामसाध्यायनमस्तेनाम
योगिने नमोनामप्रसन्नायनमोनामप्रभाविने नमोस्तुनामशुद्धायनमोनामामलायच नमोस्तु
नामगम्यायनमोनामविशुद्धये नमोस्तुनामनन्दायनमोस्तुनामवेदिने नमोनामप्रियायास्तु नमो
नामभयायच नमोस्तुनामगर्भायनमस्तेनामज्ञप्तये नमोस्तुनामचेष्टायनमोनामव्रतायच नमो
स्तुनामयज्ञायनमस्तेनामदंडिने नमोस्तुनामधर्मायनमोनामपरायच नमोस्तुनामजीवायनमस्ते

रा॰ म॰
ना॰

देभ्योयस्यनामपरंतपः परनिंदासमायुक्तः परदारपरायणाः सपूतः सर्वपापेभ्योयस्यनामपरंतपः परनिंदास
मायुक्तः परदारपरायणाः सपूतः सर्वपापेभ्योयस्यनामपरंतपः मत्सरसंयुक्तः परजीवापहारकः सपू
तः सर्वपापेभ्योयस्यनामपरंतपः अशेषपातकैर्युक्तः स्वधर्मपरिवर्जितः सपूतः सर्वपापेभ्योनाममात्रैक
बांधवः अशेषपातकैर्युक्तः सर्वदोषपरिप्लुतः सपूतः सर्वपापेभ्योनाममात्रैकजल्पकः अशेषपात
कैर्युक्ताः सर्वदोषपरिप्लुतः येनेनरंतिपापिष्टाममनामप्रसादतः तरंत्येवतरन्त्येवतरंत्येवसुनिश्चितं
अशेषपातकैर्युक्ताममनामप्रसादतः हित्वैतिममनामानिवचसानापिवादिनः नाहश्रीनरकेमहाः
पतंतिशाश्वतोशाते सुकृतनप्राकः यद्बुद्धिबुद्धिपूर्वंयत्कलिसंभवजेनवचं तत्सर्वंनाशमायातिश्रीरामस
नामसंकीर्तनात् इतिश्रीराममनाममाहात्म्यंस्मृतिस्मृतिपुराणोतिहासोक्तंअच्युताश्रमविरचितेपंचदशप्रक
रणं १५ विसृज्यममनामानिकुर्वंतिकर्मचाखिले मत्कर्मणांफलंतेषांनाताप्र्यंयनंजप गीत्वात
ममनामानिकरोतिकर्मचाखिले सयातिपरमंस्थानंविष्णुनासहमोदते योनोदांतःक्षमाशीलो
ममनामपरायणाः तस्यतत्फलसत्योमेनवकोशक्तिमानहं विसृज्यममनामानिकुर्वंतिकर्मचाखि
ले अप्राप्यमद्दानंपार्थपमेस्युःकर्मवर्त्मसु सर्वथानिष्ठुकोनेयअमेतिचनरायमाः विसृज्यममना
मानिमायायामोहितचेतसः यदृच्छयाहरेनामधेयस्मरंनिदमाशयाः तेमुक्ताःसर्वपापेभ्योममनाम
प्रसादतः येनतेनप्रकारेणनाममात्रैकजल्पकः सपूतःसर्वपापेभ्योममनामप्रसादतः नामयुक्ता
नराणांत्रस्ताश्रियोभवतियोनरः सयातिपरमंस्थानंविष्णुनासहमोदते नामयुक्तानयतान्दृष्ट्वायेनमस्य

57 स्यामि सत्यं मम प्राणेति युक्तो यत्क त्वं मम नामानि कर्म कुर्वंति चाखिलं तेषां तत्कर्म वै याधनस्त्वायकदाचन
स्मरेति मम नामानि ये मत्काकर्म चाखिलं तेषां कर्माणि कुर्वंति ऋषयो भगवत्प्रियाः मम नाम सदा ग्रा-
ही यत्काकर्म चाखिलं स मुक्तः सर्वपापेभ्यो पद्मपुष्पजलादिवः यस्य चेतसि नामानि मम कर्माणि या-
स्त्रिव सनिता सकलाल्लोकान्मामाप्नोत्येव तत्वतः नामयुक्तानन्ताके विजास्येन रसमन्विताः कुर्वंति ये यु-
ग्या प्रीतिं न तथा वेदपारगाः गायंति मम नामानि मम कर्माणि चार्जुन नमस्तेषां नमस्तेषां नमस्तेषां
पुनः पुनः तस्मान्नामानि कौंतेय भजस्व दृढमानसः नामयुक्ताः प्रियास्माकं कर्मयुक्ता जनार्दन निर्विण्ण
चेतसा नाम मम गायंति जे नवः तेषां मध्ये त्वहं स्याता सत्यमेव ब्रवीमि ते श्रद्धया हेलया वापि गायंति ना-
मसंगात्ते मध्ये तेषां महं स्यानाको न्यस्मात्प्रियोऽर्जुन न तत्र विस्मयः कार्यो भवता मम नाम सु इदं सत्यमि-
दं सत्यं सत्यं सत्यं मेतु महं मि इति विज्ञापितः पार्थं त्वद्यामम वयाभय यत्वं वदामि ते सत्यं प्रियोयमम चा-
त्मने नामयुक्तः सदा पार्थ भव त्वं दृढचेतसा यपवगाथा विचरंति गीता तेषामिदं भागयमहो ति पुण्य
नामानि विशोर्मम तत्वनिष्ठाः स्वर्गेपि देवानि गादंति हृष्टाः कृष्णनामजनासक्तः कृष्णेनामजनप्रियः स-
मुक्तः सर्वपापेभ्य स्त्वात्मादेहाद्यथार्जुन मम नाम प्रसंगेन वदेदपि सकृद्यदा स मुक्तः सर्वपापेभ्यो वक्त्रा-
द्वाक्यमिवार्जुन यः स्मरेन्मम नामानि मम कर्माणि चार्जुन तदहं त्रोषये त्रिंमित्राभस्त्राभवार्णवे श्रद्धया
परया युक्तो मम नाम परायणाः तस्य चिंतां करोम्यत्र श्रद्धया परयायुतः यशो वासनायुक्तः कामक्रोध
परायणः स मुक्तः सर्वपापेभ्यो यस्य नाम परंतप ब्रह्महा च सुरापश्च स्तेयी सर्वोपहारकः स मुक्तः सर्वपा

ग स
ना.

ले तीर्थायसहस्राणि मामाश्रोत्येव तत्त्वतः ममनामानि कर्माणि समानानि च सर्वदा तस्मान्नामानि कर्मा
णि क्रियमाणानि देहिनां कर्मयुक्ताश्च नाः पार्थ नामयुक्तास्तथा स्मृता नामयुक्ता जनाः पार्थ कर्मयुक्ता
स्तथा स्मृताः नामैव परमा मुक्तिर्नामैव परमा गतिः नामैव परमा शान्तिः नामैव परमा स्थितिः नामैव परमा भु
क्तिः नामैव परमा मतिः नामैव परमा प्रीतिर्नामैव परमा स्मृतिः नामैव परमं पुण्यं नामैव परमं तप नामै
व परमो धर्मो नामैव कर्म चाखिलं नामैव कारणं जंतोर्नामैव प्रभुरेव च नामैव परमं साध्यं नामैव परमो
गुरुः नामैव परमं ज्ञानं नामैव निखिलं जगत् नामैव जीवनं जंतोर्नामैव विपुलं धनं नामैव जगतां
सत्यं नामैव जगतां प्रियं नामैव जगदाधारो नामैव जगतां परं नामैव शरणं जंतोर्नामैव जगतां गुरु
नामैव जगतां बीजं नामैव परमं पदं नामैव जगतां चैव फलं नामैव जगतां पिता नामैव जगतां जन्म नामैव
सचराचरं नामैव धार्यते विश्वं नामैव पाल्यते जगत् नामैव कार्यते कर्म नाम्नैव भुज्यते फलं नाम्नैव
सृज्यते विश्वं नाम्नैव लीयते जगत् नाम्नैव लीयते कर्म नाम्नैव लीयते फलं नाम्नैव सृज्यते नाम ।
मना नाम्नैव लीयते मनः नाम्नैव लीयते नाम जगदेतच्चराचरं नामैव ध्यायते विश्वं नामैव विश्वबोधकं
नामैव जनयेत्साधुवैराग्यं विषयादिषु हरेर्नामानि कर्माणि प्रशस्तानि युगे युगे हित्वा नामानि क
र्माणि न भवेन्निस्तरस्तथा शान्तो दान्तः क्षमाशीलो मम नामपरायणः तीर्थकुलसहस्राणि मामा
श्रोत्येव तत्त्वतः मम नाम सदा ग्राही मम नामप्रियः सदा सन्निवासकलं लोका मामाश्रोत्येव त
त्त्वतः येनामयुक्ता विचरंति स्मै मायकार्यकामास्तु विषयांश्च भोगान् तेषां हि भक्तिं परमां सुनिष्ठांदा

58 स्मरणमात्रेणनरोयातिनिरामयंपदं यःस्मरेतसदाकृष्णंनजानेतस्यकिंफलं भवेद्वाप्रणामेनकृष्णस्य
रैद्वास्मारयेद्धरिं तथापरैर्ध्यानेसोपिसमंधनंजय ममभक्तान्तनान्दृष्ट्वाभक्तानिंदतियेजना ते
षांकर्माणिनश्यंतिसत्यंसत्यंधनंजय अर्जुनउवाच तवोपभुक्तमन्नेभोयेभुंजंतेमधुसूदन तस्मा
त्किंफलंनाथवदस्वममसत्तम कृष्णउवाच अन्नंनिवेदितंविष्णोःसद्यन्नमतयेयदि गतान
नेतिस्वयंसयातिपरमांगतिं मदत्तंममयेद्भक्तामत्कर्मपरमंव्रतं सर्वेद्वाभक्तिमाश्रित्य
ततोयांतिपरांगतिं येचामदत्तंमन्निर्माल्यंयत्तोनिषिद्धितेमम उच्छिष्टमविशिष्टंचभक्तानांभो
जनेहिते अर्जुनउवाच किंभाग्यंकिंमभाग्यंचप्राणिनांपुरुषोत्तम तत्सर्वंश्रोतुमिच्छामिकथयस्य
सत्वनिश्चितं श्रीकृष्णउवाच वैराग्यंपरमंभाग्यंहरेर्नामग्रहःसदा हरेःकर्मपरंभाग्यंनास्तिभाग्य
मतःपरं अर्जुनउवाच तवनाम्नःफलंनाथकर्मणाश्चजनार्दन कथ्यतामेजगन्नाथयत्तत्त्वेनश्रो
तुमस्तदे कृष्णउवाच नकर्मसदृशंध्यानंनकर्मसदृशंव्रतं नकर्मसदृशंध्यानंनकर्मसदृशंफ
लं नकर्मसदृशस्त्यागोनकर्मसदृशंतपः नकर्मसदृशंपुण्यंनकर्मसदृशागतिः ननाम
सदृशंज्ञानंननामसदृशंव्रतं ननामसदृशंध्यानंननामसदृशंव्रतं ननामसदृशंध्यानंननामस
दृशंफलं ननामसदृशस्त्यागोननामसदृशःशमः योगःप्रोक्तोहरेर्नाममतप्रवक्ष्यामिषड्गुणाः नना
मसदृशंकर्मननामसदृशंतपः ननामसदृशीभक्तिर्ननामसदृशःप्रभुः उर्वन्नाकारयन्नापिम
कर्माण्याचरेत्तेन नीवाकुलसहस्राणिमाप्नोतिनतत्त्वतः स्मरन्नास्मारयन्नापिप्रत्यन्नामममेश

गी॰ मा॰

गरवोभक्तावयंचगरवोयथा यस्माकेवाथवाभक्ताभक्तानांवाथवावयं वैस्नवः परमोयस्मीवैस्नवः पर
मेतपः वैस्नवःपरमात्माध्योवैस्नवःपरमोगुरुः गायंतिवैस्नवःसर्वेममनामयुगेयुगे भक्तासर्वोगिना
मानिममपरायणाः ममनाममममनाममममनामैवकेवलंगातिलेषांगतिस्तेषांसन्निश्चितं मद्दयाहेलया
नामरटंतिमसन्नेतवः तेषांनाममसदापार्थवर्ततेहृदयेमम मद्भक्तायत्रगछंतितत्रगछामिपार्थिव
भक्तानाममनुगछेनित्यमुक्तयःत्रतेभिःसह भक्तानेवेवसेहृढ्यान्शिरस्येववसाम्यहं नाभौचशंकरो
देवः पदेषांथर्वेकिंकराः मानवाश्चेहृदेनामसेवंतेनित्यमेवच भक्ताममहृगामिसंत्यंतियत्रयोगेश्वरोहरिः
येमेभक्ताजनाः पार्थनमेभक्ताश्चतेनराः कामादिषुगणासेयुक्तानाममात्रैकवांधवाः प्रीतिंकुर्वंतिमेपा
र्थनतेपिप्रियदूताः येकेचित्स्थावराणिनोमभक्तामदर्थंसक्तवांथवाः तेषामहंपरिक्रीतोनान्यक्रीतोजना
र्दनः तेदेहांतविकलंममायत्रनातोहदेवःप्रियः तदेहांसफलंमन्येयत्रास्तेभगवत्प्रियः नायांति
समतांपार्थमद्भक्तानांकदाचन इंद्रःपतंतिभोगांतेकिंसिद्वलेकरिष्यति विहायकामान्यस्याचम
द्याभजन्सुभक्तान्ममभक्तियुक्तान् ममैवबंधूनपरमार्थयुक्तान्सदेवविश्वोद्दमस्त्रिविष्टान् नचम
क्ते समंज्ञानेनचभक्तेसमंफलं नचभक्तेःसमंपुण्यंनचभक्तेःसमंव्रतं नचभक्तेःसमंयागोनचभक्तेः
समागतिः अर्जुनउवाच कृष्णस्मरणमात्रेणप्राणान्मुंचंतियेनराः फलंतेषांकिमस्माकंवद स्व
मधुसूदन श्रीकृष्णउवाच कृष्णकृष्णेतियोगीत्वाप्रायातिभुवनेतरः तस्यानुगमनेपार्थसत्यंसत्यं
करोम्यहं कृष्णस्मरणमात्रेणप्राणान्मुंचंतियेनराः फलंतेषांनदास्यामितान्भजाम्येवपार्थिव कृ

६७

59 एवंप्रकारतो महापातकयुक्तोपि संयुक्तोऽणुपपातकैर्मुच्यते अश्वद्याशमनानामसहस्रकमिस्तकमनोचै
स्रवसहितामसर्वकेनाममाहात्म्यमादिसपुराणोक्तमुच्यते नमार्जुवानंगतिंक्र स्सकथयस्वमहाप्रभो नां
गतिंश्रोतुमिच्छामियागतिर्लोकदुर्लभा कांगतिंवैस्रवायांतिकिंकुर्वंतिसमानन किंध्यायंतिकिंमर्चं
तिप्रणमंतिचकिंप्रभो श्रीभगवानुवाच मद्भक्तिंवैस्रवायांतिप्रणमंतिचमांसदा मांध्यायंतिसदापा
र्थमामर्चंतिपुनःपुनः कुर्वंतिममकर्माणिशिवद्वेतिचपशोमले ममनामानिपुण्यानिगायंत्येवमहर्निशं
यद्गतिंवैस्रवायांतिनदेवायांतितद्गतिं नसूर्यःप्रतिभात्यत्रनाग्निर्नेयमिज्ञापतिः यद्गतिंवैस्रवायांति
तत्रयोगिनः नवायोर्गमनंतत्रलोकानांनैवचेतसां यद्गतिंवैस्रवायांतितत्रचसचराचरः नयां
तिधार्मिकाःसर्वेनतत्रतिहितोत्तमाः अर्जुनउवाच भक्तानांलक्षणंब्रूहिसकथयस्वपुनःपुनः तत्सर्वंश्रो
तुमिच्छामिनेत्रांचवहुसहस्रकृते कृष्णयत्रयत्रचभक्तास्तत्रतत्रस्थितोसिच गंगादिसर्वतीर्थानिवसंतितत्रस
र्वदा गायंतिवैस्रवामेवंकुर्वंतिमंगलेपरं सर्वतोमंगलेनेषांकुर्वंतेषाममंगलं तस्मात वैस्रवानभक्त
कौंतेयममाभक्तास्तानदेवते प्रणमंतिवैस्रवाःसर्वसर्वदेवाखिलेजन गायंतिवैस्रवाःसर्वंकुर्वंतिनाममंगले
नकानुममनामानितानामपहायंतिवैस्रवाः मद्भक्तोदुर्लभोयस्ससपदवसमदुर्लभा तस्मोद्भक्तभोनास्ति
सत्यंसत्यंधनंजयथामेमभक्तस्यनिरार्थीतमेमभक्तःस्पार्थिवः योमेभक्तस्यप्रेमार्थीसनरःपरमोमम मम
नामसदाग्राहीममकर्मप्रियंसदा तस्यैभक्तिंप्रदास्यामिनचमद्भक्तिंकदाचन वैस्रवालभतेभक्तिंभक्ता
मालभतेनरः तस्माद्वैवैस्रवोविस्नुःकलिमध्येविशेषतः जगतांगुरवोभक्ताभक्तानांगुरवोवयं सर्वत्र